कृष्णाभ्रलौहमलशुद्धविड़ङ्गचूर्णम्
प्रत्येकमेवपलिकं विधिवत् विधाय।
चव्यं कटुत्रयफलत्रय केशराज-
दन्ती पयोद चपलानलघण्टकर्णाः॥
माणोलकुच बृहती त्रिवृताः समूर्व्वा
वर्त्ताः पुनर्नविकया सहितास्तुमीषाम्।
मूलं प्रति प्रतिविशोधितमत्त्वमेकम्
चूर्णं तदर्द्धरसगन्धकमेकसंस्थम्॥
कृत्वार्द्रकीयरससम्बलितञ्च भूयः
संपिष्य तस्य वटिका विधिवत् विधेया।
हन्त्यम्लपित्त मरुचिं ग्रहणीमसाध्याम्।
दुर्णामकामलभगन्दरशोथगुल्मान्॥
शूलञ्च पाकजनितं सततान्निमान्द्यं।
सद्यः करोत्यपचितिं चिरनष्टवह्नेः।
कुष्ठं निहन्ति पलितञ्च वलिं प्रवृद्धां
श्वासञ्च कासमपि पाण्डुगदं निहन्ति॥
वार्य्यन्नमांसदधिकाञ्जिकतक्रमत्स्य-
वृन्ताम्लतैलपरिपक्वभुजोयथेष्टम्।
शृङ्गाटविल्वगुड़कच्चटनारिकेल
दुग्धानि सर्वविदलानि विवर्जयेत्तु॥

पानीयभक्तवटी॥ ११९॥

पानीयभक्तवटिकामाह कृष्णाभ्रेत्यादि शुद्धविड़ङ्गमिति तुषव-र्जितविड़ङ्ग', चपला पिप्पली, अनलश्चित्रकः, घण्टकर्णा खारकोन इति

दग्धशम्बूकं सिन्धूत्थं तुल्यं चौद्रेण मर्द्दयेत्।
निष्कैकेन निहन्त्याशु वातसंग्रहणीगदम्॥

शम्बूकादिवटी।

एकांशो रसराजस्य भागौ द्वौ हाटकस्य च॥
मुक्ताफलस्य चत्वारो भागाः षड्दीर्घनिःस्वनात्।
त्र्यंशं बलेर्वराट्याश्च टङ्कणो रसपादिकः॥
पक्वनिम्बुकतोयेन सर्वमेकत्रमर्द्दयेत्।
मूषा मध्ये न्यसेत् कल्कं तस्य वक्त्रं निरोधयेत्॥
गर्त्तेऽरत्निप्रमाणेन पुटेत् त्रिंशद्वनोपलैः।
स्वाङ्गशीतलतां ज्ञात्वा रसं मूषोदरान्नयेत्॥
ततः खल्लोदरेमर्द्द्य सुधारूपं समुद्धरेत्।
एतस्यामृतरूपस्य दद्याद्गुञ्जाचतुष्टयम्॥
घृतमाध्वीकसंयुक्तमेकोनत्रिंशदूषणैः।
मन्दाग्नौ रोगसंघे च ग्रहण्यां विषमज्वरे॥
गुदाङ्कुरे महाशूले पीनसे श्वासकासयोः।
अतीसारे ग्रहण्याञ्च श्वयथौ पाण्डुके गदे॥
सर्वेषु कुष्ठरोगेषु यकृत् प्लीहोदरेषु च।
वातपित्तकफोत्थेषु द्वन्द्वजेषु त्रिजेषु च॥
दद्यात् सर्वेषु रोगेषु श्रेष्ठमेतद्रसायनम्।

हिरण्यगर्भपोट्टलीरसः॥१२०॥

स्यातः। तदर्द्धं रसगन्धकमिति मिलितरसगन्धकं कर्षार्द्धं अन्ये तु
प्रत्येकं कर्षार्द्धमाहुः। इत्याम्लं महार्द्रकम्॥ ११९॥
हिरण्यगर्भपोट्टलिकायां दीर्घनिःस्वनं शङ्खं, बलेर्गन्धकस्य॥ १२०॥

शुद्धसूतस्य कर्षैकं कर्षैकं गन्धकस्य च।
द्वयोः कज्जलिकां कृत्वा तुल्यं व्योम प्रदापयेत्॥
केशराजस्य भृङ्गस्य निर्गुण्ड्याश्चित्रकस्य च।
ग्रीष्मसुन्दरमण्डुकी जयन्तीन्द्राशनस्य च॥
श्वेतापराजितायाश्च स्वरसं पर्णसम्भवम्।
रसतुल्यं प्रदातव्यं चूर्णञ्च मरिचोद्भवम्॥
देयं रसार्द्धभागेन चूर्णं टङ्कणसम्भवम्।
संमर्द्य वटिकां कुर्य्यात् कलायसदृशीं बुधः॥
हन्ति कासं क्षयं श्वासं वातश्लेष्मभवं रुजम्।
ज्वरेचैवातिसारे च सिद्ध एष प्रयोगराट्॥
चातुर्थके ज्वरे श्रेष्ठो महत्यातङ्कनाशनः।
दधिचावश्यकं देयं प्राहनागार्ज्जुनो मुनिः॥

रसाभ्रवटी॥ १२१॥

रसं गन्धं विषं व्योषं टङ्कणं लौहभस्मकम्।
अजमोदाहिफेनञ्च सर्वंतुल्यं मृताभ्रकम्॥
चित्रकस्य कषायेण मर्द्दयेदयाममात्रकम्।
मरिचाभां वटीं खादेदजीर्णंग्रहणीन्तथा॥
नाशयेन्नात्रसन्देहो गुह्यमेतच्चिकित्सितम्।

अग्निकुमारः॥

जातीफल लवङ्गाब्दत्वगेलाटङ्क रामठम्।
जीरकं तेजपत्रञ्च यमानी विश्वसैन्धवाः॥

रसाभ्रवटिकायां व्योमचूर्णं कृष्णाभ्रचूर्णम्॥ १२१॥

लौहमभ्रं रसोगन्धस्ताम्रं प्रत्येकशः पलम्।
मरिचं द्विपलं दत्त्वा छागीचीरेण पेषयेत्॥
धात्रीरसेन वा पेष्यं वटिकाः कुरु यत्नतः।
श्रीमद्गहननाथेन विचिन्त्य परिनिर्म्मितः॥
सूर्य्यवत्तेजसा चायं रसो नृपतिवल्लभः।
अष्टादशवटीं खादेत् पवित्रः सूर्य्यदर्शकः।
हन्ति मन्दानलं सर्व्वमामदोषं विसूचिकाम्।
प्लीहगुल्मोदराष्ठीला यकृत् पाण्डुत्वकामलाम्॥
सर्व्वानेव गदान् हन्ति चण्डांशुरिव पापहा।
वलवर्णकरो हृद्य आयुष्यो वीर्य्यवर्द्धनः॥
परं वाजीकरः श्रेष्ठः पटुद्रो मन्त्रसिद्धिदः।
अरोगी दीर्घजीवी स्याद्रोगीरोगाद्विमुच्यते॥
रसस्यास्य प्रसादेन वुद्धिमान् जायते भिषक्।

नृपतिवल्लभः। १२२॥

जातीफल लवङ्गाब्द त्वगेला टङ्करामठम्।
जीरकं तेजपत्रञ्च यवानी विश्वसैन्धवम्॥ *
लौहमभ्रं सताम्रञ्च रसगन्धकमेव च।
मरिचं त्रिवृतं रूप्यं प्रत्येकं द्विपलोन्मितम्॥
धात्रीरसे वटीं कुर्य्यात् द्विगुञ्जाफलमानतः।

नृपतिवल्लभे चत्वारोऽध्यायकम्॥ १२२॥

---

* रामठं हिङ्गु, हिं इति ख्यातः।

हन्ति शूलं तथा गुल्ममामवातं सुदारुणम् ॥
हृच्छूलं पार्श्वशूलञ्च चक्षुशूलं हलीमकम्।
शिरःशूलं कटीशूलमानाहमष्टशूलकम् ॥
क्रिमि कुष्ठानि दद्रूनि वातरक्तं भगन्दरम्।
उपदंशमतीसारं ग्रहण्यर्शः प्रवाहिकाम् ॥
नृपवल्लभराजीयं महेशेन प्रकाशितः।

राजवल्लभोरसः ॥

रसगन्धक लौहाभ्रं नागं चित्रं त्रिवृत्समम्।
टङ्गं जातीफलं हिङ्गुत्वगेलाब्दं लवङ्गकम् ॥
तेजपत्रमजाजी च यमानी विश्वसैन्धवम्।
प्रतेरकं तालकं चूर्णं मरिचतारयोस्तथा ॥
निरुत्थकं मृतं हेम तथा द्वादशरक्तिकम्।
आर्द्रकस्य रसेनैव धात्र्याश्च स्वरसेन च ॥
भावयित्वा प्रदातव्यो माषद्वयप्रमाणतः।
भक्षयेत् प्रातरुत्थाय पथ्यं भक्षेत् यथेप्सितम् ॥
अग्निमान्द्यमजीर्णञ्च दुर्नामं ग्रहणीं जयेत्।
आमाजीर्णप्रशमनः सर्वरोगनिसूदनः ॥
नाशयेदुद्धरान् रोगान् विष्णुचक्रमिवासुरान्।

बृहन्नृपवल्लभः ॥

मुक्ता सुवर्णं रसगन्धटङ्ग-
मभ्रं कपर्द्दीरसतुल्यभागः।
सर्वैः समं शङ्खकचूर्णमिष्टं
खल्ले च भाव्यातिविषा द्रवेण ॥

शीलञ्च कृत्वा मृदु कर्पटस्थं
संमाद्य भाण्डे दिवसार्द्धकञ्च ।
सर्वाङ्गशीते रस एष भाव्यो
धूस्तूर वह्नि मूषलीद्रवैश्च ॥
लौहस्य पात्रे परिभावितश्च
सिद्धो भवेत् संग्रहणीकपाटः ।
वातोत्तरायां मरिचाज्य युक्तः
पित्तोत्तरायां मधुपिप्पलीभिः ॥
कफोत्तरायां विजयारसेन
कटुत्रयेणाज्ययुतो ग्रहण्याम् ।
क्षये ज्वरेचार्शसि षट्प्रकारे
भगन्दरे चारुचि पीनसे च ।
मेहे च कृच्छ्रे गतधातुवर्द्धने
तुच्छादयश्चास्य महामयोघ्नम् ।

संग्रहग्रहणीकपाटः ॥

कर्षत्रयं मृतं कान्तं मृताभ्रं मृतताम्रकम् ।
मृतं तारं माक्षिकञ्च कर्षं कर्षं प्रदापयेत् ॥
मृतं स्वर्णं मृतं तारं टङ्कणं शृङ्गमेव च ।
वसिरं दन्तिमूलञ्च मरिचं तेजपत्रकम् ॥
यमानी वालकं मुस्तं शुण्ठकञ्च सधान्यकम् ।
सिन्धूद्भवं सकर्पूरं विडङ्गं चित्रकं विषम् ॥
पारदं गन्धकञ्चैव तोलमानं प्रदापयेत् ।
तोलद्वयं त्रिवृच्चूर्णं लवङ्गं तच्चतुर्गुणम् ॥

जातीकोषफलञ्चैव वराङ्गकन्तु तत्समम् ।
सर्व्वेषामर्द्धभागन्तु विड़ङ्गं तत्र मिश्रयेत् ॥
सर्व्वमेकीकृतं यद्यत् त्रुटिचूर्णञ्च तत्समम् ।
भावना च प्रदातव्या छागीदुग्धेन सप्तधा ॥
मातुलुङ्गरसैः पश्चात् भावयेत् सप्तवारकम् ।
छायाशुष्कां वटीं कृत्वा भक्षयेद्रक्तिकाम् ॥
मन्दानलं संग्रहणीं प्रवृद्धा
मामनुबन्धीं क्रिमि पाण्डुरोगम् ।
ऊर्द्ध्वास्रपित्तं हृदयामयञ्च
गुल्मोदरानाहभगन्दरञ्च ॥
अर्शांसि वै पित्तकृतानशेषान्
सोमं सशूलाष्टकमेव हन्ति ।
साजीर्णं विष्टम्भ विसर्पदाहं
विलम्बिकाञ्चाप्यलसं प्रमेहम् ॥
कुष्ठन्यशेषाणि च कासशोषं
हन्यात् सशोथं ज्वरमूत्रकृच्छ्रम् ।
मतान्तरे सर्व्वत भद्रनाम
महेश्वरेणैव विभाषितोयम् ॥

महाराजनृपतिवल्लभोरसः ॥ १२३ ॥

माक्षिकं लौहमभ्रञ्च वङ्गं रजतं हाटकम् ।

महाराज नृपवल्लभे कान्तं कान्तलौहं, शृङ्गी कर्कटशृङ्गी, वह्निः गजपिप्पली, तोलमानमिति प्रत्येकं तोलकमानं त्रुटीचूर्णन्तु तत्समिति मिलित सर्व्वचूर्णसमं सूक्ष्मैलाचूर्णमित्यर्थः ॥ १२२ ॥

ग्रन्थि यमानिका चोचं ताम्रं नागरटङ्कणम् ॥
सैन्धवं बालकं मुस्तं धन्याकं गन्धकं रसम् ।
शृङ्गी कर्पूरकञ्चैव प्रत्येकं माषकोन्मितम् ॥
माषद्वयं रामठं स्यान्मरिचानां चतुष्टयम् ।
जातीकोषं लवङ्गञ्च पत्रञ्च तोलकोन्मितम् ॥
नाभिशङ्खं विडङ्गञ्च माणं माषद्वयं विषम् ।
कर्षषट्कं सविमाषं सूक्ष्मैलानां ततः क्षिपेत् ॥
विडं कर्षद्वयं सर्वं छागीक्षीरेण पेषयेत् ।
चतुर्गुञ्जमितं खादेत् सानाह्यग्रहणीं जयेत् ॥
अम्भनानिर्मितोह्येष पूर्ववत् गुणकारकः ।
नाम्ना महाराजपूर्वो नृपवल्लभ उच्यते ॥

महाराजनृपतिवल्लभः ॥

इति ग्रहणीरोगचिकित्सा

अर्शोऽधिकारः ।

चतुर्भागं शुद्धसूतं पञ्चटङ्कणमभ्रकम् ॥
त्रिदिनं भावयेद्घर्म्मे द्रवैः श्वेतपुनर्नवैः ।
द्विगुञ्जं भक्षयेन्नित्यं वातदुर्नामशान्तये ॥
सिद्धचक्रेश्वरोनाम रसश्चार्शः कुलान्तकः ।

चक्रेश्वरोरसः ॥ १२४ ॥

पूर्वोक्त सङ्कतैरत्र यच्छव्यन्तरमर्शश्चिकित्सितमुच्यते तत्र प्रथमं चक्रेश्वररसमाह शुद्धसूतेति सूतचात्र सूतभस्म अथवा समानो गन्धको देयः ॥१२४॥

मृतसूतार्कहेमाभ्रतीक्ष्णं मुण्डञ्च गन्धकम् ।
मण्डूरञ्च समं ताप्यं मर्द्यं कन्याद्रवैर्दिनम् ॥
अन्धमूषागतं सर्वं ततः पाच्यं दृढाग्निना ।
चूर्णितं सितया मासं खादेत्तच्चार्शसांहितम् ॥
रसस्तीक्ष्णमुखोनाम चासाध्यमपिसाधयेत् ।

तीक्ष्णमुखोरसः ॥ १२५ ॥

शुद्धसूतं द्विभागञ्च मृतलौहञ्च ताम्रकम् ।
प्रत्येकं द्विपलं दन्ती त्र्यूषणं शूरणन्तथा ।
शुभा टङ्क यवक्षार सैन्धवं पलपञ्चकम् ।
पलाष्टकं स्नुहीक्षीरं द्वात्रिंशच्च गवां जलैः ।
आपिण्डितं पचेदग्नौ खादेन्माषद्वयं ततः ।
रसश्चार्धः कुठारोयं सर्वरोगकुलान्तकः ।

अर्धःकुठारोरसः ॥ १२६ ॥

मृतसूताभ्रवैक्रान्तं ताम्रं कांस्यं समं समम् ।
सर्वतुल्येन गन्धेन दिनं भल्लातकैर्द्रवैः ।
मर्दयेद्यत्नतः पश्चात् वटीं कुर्य्याद्द्विगुञ्जिकाम् ।
भक्षणाद्गुदजान् हन्ति द्वन्द्वजान् सर्वजानपि ।

चक्राख्योरसः ।

तीक्ष्णमुखरसे तीक्ष्णमुण्डञ्चेति तीक्ष्णलौहं मुण्डलौहञ्च, ताप्यं स्वर्णमाक्षिकम् ॥ १२५ ॥

अर्धःकुठाररसे शुभा वंशलोचना । चक्राख्यरसे वैक्रान्तं दग्धहीरकं तत्र भल्लातकस्यापि भागैकं ग्राह्यम् १२६ ॥

मृतसूताभ्रलौहार्कविषं गन्धं समं समम् ।
सर्वतुल्यन्तु भल्लातफलमेकत्र चूर्णयेत् ।
माषमात्रं लिहेदाज्यै रसश्चार्शांसि नाशयेत् ।
नित्योदितो रसोनाम गुदोद्भवकुलान्तकः ।

नित्योदितोरसः ॥ १२७ ॥

क्रिमिरिपुदहनव्योष त्रिफला सुरदारुचव्यभूनिम्बम ।
मागधीमूलमुस्तं सशटीवचाधातुमाक्षिकञ्चैव ।
लवणक्षारनिशायुग कुस्तुम्बुरुगजकणातिविषा ।
कर्षांशकान्येव समानि कुर्य्यात्
पलाष्टकं चाश्मजतोर्विदद्यात् ।
निष्पत्रशुद्धस्य पुरस्य धीमान्
पलद्वयं लौहरजस्तथैव ।
सिताचतुष्कं पलमत्र वांश्या
निकुम्भकुम्भत्रिसुगन्धियुक्तं
चन्द्रप्रभेयं गुड़िका विधेया
अर्शांसि निनाशयते षडेव ।
भगन्दरं कामलपाण्डुरोगं
विनष्टवह्नेः कुरुते च दीप्तिं
हन्त्यामयान् पित्तकफानिलोत्थान् ।

नित्योदितरसमाह मृतसूतेत्यादि मृतसूतस्थाने शुद्धसूतेति केचित् पठन्ति । सूतादिगन्धान्तानि षड्द्रव्याणि समभागानि । भल्लातं भल्लातफलं तच्च सर्वतुल्यं ज्ञेयम् । अभावे रक्तचन्दनम् । तन्त्रान्तरेऽस्य गुदजान्तकसंज्ञा ज्ञातव्या ॥ १२७ ॥

नाडीगते मर्म्मगते व्रणे च।
ग्रन्थ्यर्व्वुदे विद्रधिराजयक्ष्म
मेहे भगाख्ये प्रदरे च योज्या॥
शुक्रक्षये चाश्मरी मूत्रकृच्छ्रे
मूत्रप्रवाहेऽप्युदरामये च।
तक्रानुपानं त्वथमस्तुपानं
अाजोरसो जाङ्गलजो रसो वा॥
पयोथवा शीतजलानुपानं
बलेन नागस्तुरगोयवेन।
दृष्टा सुपर्णः श्रवणे वराहः
कान्त्या रतीशोधिषणश्च वुद्ध्या॥
न पान भोज्ये परिहार्य्यमस्ति
न शीतवातातपमैथुनेषु।
शम्भुं समभ्यर्च्च्य कृतप्रणामं
प्राप्ता गुडी चन्द्रमसः प्रसादात्।
शुक्रदोषान् निहन्त्याशु प्रमेहानपि दारुणान्।
वलीपलितनिर्म्मुक्तो वृद्धोपि तरुणायते।

चन्द्रप्रभागुडिका। १२८।

चन्द्रप्रभागुड़िकायां क्रिमिरिपु विड़ङ्गं, दहनश्चित्रकः, सुरदारु देवदारु, भूनिम्बं चिरता इति ख्याता, मागधीमूलं पिप्पलीमूलं, निशायुगं हरिद्राद्वयं, अश्वजतु शिलाजतु। निष्पत्रगुडस्य पुरस्ति विशुद्ध गुग्गुलोः। वांश्या वंशलोचना, निकुम्भी दन्ती, कुम्भी त्रिवृत्। वृद्धवैद्योपदेशेन मलाङ्कं रसगन्धकम्। केवलं सूक्तिं तस्यापि प्रलम्बा

माषशूरणभल्लातत्रिवृद्दन्तीसमन्वितम्।
त्रिकत्रयसमायुक्तं लौहं दुर्नामनाशनम्।

माषाद्यं लौहम्॥ १२९॥

रसगन्धकलौहानां प्रत्येकं भागयुग्मकम्।
त्रिकटुदन्तिकुष्ठैकं षड्भागं लाङ्गलस्य च।
चारसैन्धवटङ्गाणां प्रत्येकं भागपञ्चकं।
गोमूत्रस्य च द्वात्रिंशत् स्नुहीचीरं तथैव च।
यावच्च पिण्डितं सर्वं तावन्मृद्वग्निना पचेत्।
माषद्वयं ततः खादेत् दिवास्वप्नादि वर्जयेत्।
रसश्चञ्चुत् कुठारोयमर्शसां कुलनाशनः।

चञ्चुत्कुठारोरसः।

शिलागन्धकयोश्चूर्णं पृथग्भृङ्गरसाप्लुतम्।
सप्ताहं भावयेत् सर्पिर्मधुभ्याञ्च विमर्दयेत्।
अर्शसश्चानुलोम्यार्थं हताग्निबलवर्द्धनम्।
रक्तिकाद्वितयं खादेत् कुष्ठादिरहितो नरः।

शिलागन्धकवटकः॥ १३०॥

जातीफलं लवङ्गञ्च पिप्पली सैन्धवन्तथा।
शुण्ठीधुस्तूरवीजञ्च दरदं टङ्गणन्तथा।

दापयेद्रसम्। कश्चनकञ्च क्षिपेत् कश्चित् पलमानं भिषग्वरः। संमर्द्य मधुसर्पिभ्यामादौ रक्तिचतुष्टयम्। भक्ष्यं दद्यात् यथायुक्ति यावन्माष चतुष्टयम्। त्रिवृद्दन्तीत्रिजातानां कर्षमानं पृथक् पृथक्। केचित्तु इदं श्लोकत्रयं पठन्ति॥ १२८॥

माषादिलौहे लौहं सर्वचूर्णसमम्॥ १२९॥

शिलागन्धकवटके शिला मनःशिला॥ १३०॥

समं सर्वं विचूर्ण्याथ जम्भाम्भसा विमर्द्दयेत्।
जातीफलवटिकेयमर्शोऽग्निमान्द्यनाशिनी।

जातीफलादिवटी।

मृतसूताभ्रलौहानि मृतार्कगन्धकैः सह।
सर्व्वाणि समभागानि भल्लातं सर्वतुल्यकम्।
वन्यशूरणकन्दोत्थैर्द्रवैः पलप्रमाणतः।
मर्द्दयेद्दिनमेकञ्च माषमात्रं पिबेद्दृढैः।
भक्षणात् हन्ति सर्व्वाणि चार्शांसि च न संशयः।
असाध्येष्वपि कर्त्तव्या चिकित्सा शङ्करोदिता।
कुष्ठरोगं निहन्त्याशु मृत्युरोगविनाशिनी।

पञ्चाननवटी।

गन्धं रसेन्द्रं मृतलौहकिट्टं
फलत्रयं चूषणवह्निभृङ्गम्।
कृत्वा समं शाल्मलीका गुडूची
रसेन यामत्रितयं विमर्द्द्य।
निष्कप्रमाणं गदितानुपानैः
सर्व्वाणि चार्शांसि हरेद्रसस्य।

अष्टाङ्गोरसः॥ १३१॥

इत्यर्शोधिकारः।

अष्टाङ्गरसे लौहकिट्टं मण्डूरं फलत्रयं त्रिफला॥ १३१॥
इत्यर्शश्चिकित्सा।

अजीर्णाधिकारः।

एकैकं विषसूतञ्च जातीटङ्कं द्विकं द्विकम्।
कृष्णात्रिकं विश्वषट्कं गन्धं कपर्दकं द्विकम्।
देवपुष्पं वाणमितं सर्वं संमर्द्य यत्नतः।
महोदधि वटीनाम्ना नष्टमग्निं प्रदीपयेत्।
महोदधिवटी॥ १३२॥

शुद्धसूतं विषं गन्धमजमोदाफलत्रिकम्।
स्वर्जिचारं यवचारं वह्निसैन्धवजीरकम्।
सौवर्च्चलं विडङ्गानि सामुद्रं तूषणन्तथा।
विषमुष्टिसमं सर्वं जम्बिराम्लेन मर्द्दयेत्।
मरिचाभां वटीं खादेत् वह्निमान्द्यप्रशान्तये।
अग्नितुण्डीरसः॥ १३३॥

शुद्धसूतस्य कर्षैकं गन्धक तत् समं मतम्।
पिप्पली पञ्चलवणं मरिचञ्च फलत्रयम्।
चारत्रयं समं सर्वं चूर्णं कृत्वा प्रयत्नतः।
निर्गुण्ड्याश्च द्रवेनैव भावयेद्दिनमेकतः।
वडवानलनामायं मन्दाग्निञ्च विनाशयेत्।
वडवानलोरसः॥ १३४॥

अर्थः कार्य्यत्वात्तदनन्तरमग्निमान्द्यादिचिकित्सामाह एकैकमि-त्यादि फलं जातिफलम्। देवपुष्पं लवङ्गं वानमितमिति पञ्चभाग-मित्यर्थः॥ १३२॥

अग्नितुण्डीरसे वह्निश्चित्रकः, अजमोदा यमानी॥ १३३॥

वड़वानलरसे चारत्रयं यवचारसाचिचारटङ्कणचारम्॥ १३४॥

गन्धेशटङ्कणैकैकं विषमत्र त्रिभागिकम्
अष्टभागन्तु मरिचं जम्बाम्भो मर्द्दितं दिनम् ॥
तद्‌वटीं मुद्गमानेन कृत्वार्द्रेणप्रयोजयेत् ।
शूलारोचकगुल्मेषु विसूच्यां वह्निमान्द्यके ॥
अजीर्णे सन्निपातादौ शैत्ये जाड्ये शिरोगदे ।

हुताशनोरसः ॥ १२५ ॥

एक द्विक द्वादशभागयुक्तं
योज्यं विषं टङ्कणमूषनञ्च ।
हुताशनोनाम हुताशनस्य
करोति वृद्धिं कफजिन्नराणाम् ॥

वृहत्‌हुताशनोरसः ॥

शुद्धौ पारदगन्धौ च समानौ कज्जलीकृतौ ।
तयोरर्द्धं विषं शुद्धं तत्समं टङ्कणं भवेत् ॥
भृङ्गराजद्रवैर्भाव्यं त्रिदिनं यत्नतः पुनः ।
मुद्गप्रमाणा वटिका कर्त्तव्या भिषजां वरैः ॥
वटीद्वयं हरेत् शूलमग्निमान्द्यं सुदारुणम् ।
अजीर्णं जरयत्याशु धातुपुष्टिं करोति च ॥
नानाव्याधिहराचेयं वटी गुरुवचो यथा ।
अनुपानविशेषेण सम्यक् गुणकरी भवेत् ॥

अमृतकल्पवटी ॥ १२६ ॥

हुताशनरसे देयः पारदः ॥ १२५ ॥
अमृतकल्परसे तत्समर्मितविषसमम् ॥ १२६ ॥

रसेन्द्रगन्धौ सह टङ्कणेन
समं विषं योज्यमिहत्रिभागम्।
कपर्द्दशङ्खाविहनेत्रभागौ
मरिचमत्राष्टगुणं प्रदेयम्॥
सुपक्वजम्बीररसेन घृष्टः
सिद्धो भवेदग्निकुमार एषः।
विसूचिकाजीर्णसमीरणार्त्तौ
दद्यादिवल्लं यहणीगदे च॥

अग्निकुमारोरसः॥ १३७॥

शुद्धसूतं द्विधागन्धं गन्धतुल्यञ्च टङ्कणम्।
फलत्रयं यवक्षारं व्योषं पञ्चपटूनि च॥
द्वादशैतानि सर्वाणि रसतुल्यानि दापयेत्।
संमर्द्द्य सप्तधा सर्वं भावयेदार्द्रकद्रवैः॥
संशोष्य चूर्णयित्वा तु भक्षयेदार्द्रकाम्बुना।
शाणमात्रं वयोवीक्ष्य नानाजीर्णप्रशान्तये॥
रसश्चाग्निकुमारोयं महेशेन प्रकाशितः।
महाग्निकारकश्चैव कालभास्करतेजसाम्॥
अग्निमान्द्यभवान्रोगान् शोथं पाण्डामयं जयेत्।
दुर्नामग्रहणीसामरोगान् हन्ति न संशयः॥
यथेष्टाहारचेष्टस्य नास्त्यत्र नियमः क्वचित्।

वृहदग्निकुमारोरसः॥ १३८॥

अग्निकुमाररसे भागत्रयमितरैकभागापेक्षया एवं सर्वत्र। कपर्द्दशङ्खं दग्धाजम्बीररसे प्रक्षिप्य शोधयन्ति वृद्धाः॥ १३७॥

व्योषं जातीफले द्वे च लवङ्गञ्च वराङ्गकम्।
पत्रं शृङ्गी कणा टङ्गं यमानी जीरकद्वयम्॥
सैन्धवञ्च विड़ं हिङ्गु रसं गन्धञ्च रौप्यकम्।
लौहभस्म समं सर्वं जम्बीररसमर्द्दितम्॥
चतुर्गुञ्जां वटीं कृत्वा खादेदजीर्णशान्तये।
अत्यग्निकारकश्चायं रसश्चाग्निकुमारकः॥
संग्रहग्रहणीञ्चैव वातपित्तकफोद्भवाम्।
नाशयेदामदोषञ्च त्रिदोषजनितञ्च यत्॥
शूलदोषं विसूचीञ्च भास्करस्तिमिरं यथा।

अपरबृहदग्निकुमारोरसः॥ १३९॥

लवङ्गं चित्रकं शुण्ठी जयपालं समं समम्।
टङ्गणञ्च प्रदातव्यं वृद्धदारस्य कार्षिकम्॥
चतुर्द्दशभावनाश्च दन्तीद्रावैः प्रदापयेत्।
निम्बार्केन त्रिधा देया वृद्धदारेण पञ्चधा॥
रसं गन्धञ्च गरलं मेलयित्वा विभावयेत्।
आर्द्रकस्य रसेनैव चित्रकस्य रसेन वा॥
मुद्गप्रमाणां वटिकां कृत्वा खादेद्दिने दिने।

अग्निकुमाररसे रसापेक्षयाद्विगुणं गन्धं टङ्गणञ्च, पटूनि लवणानि, द्वादशैतानीति फलत्रयादिपञ्चपटून्तानि द्रव्याणि रसतुल्यानि॥ १३८॥

अपरबृहदग्निकुमाररसे जातीफले इति जातीफल जातीकोषे, वराङ्गं गुड़त्वक्॥ १३९॥

क्षुत्पिपासाकरीचेयं जीर्णज्वरविनाशिनी ।

बृहन्महोदधिवटी ॥ १४० ॥

पारदामृतलवङ्गगन्धकं भागयुग्ममरिचेन मिश्रितम् ।
जातिकाफलमथार्द्धभागिकं तिन्तिड़ीफलरसेन मर्द्दितम् ॥
माषमात्रमनुपानयोगतः सद्य एव जठराग्निदीपनः ।
संग्रहग्रहणीकुम्भकर्णकं सामवातखड़्दूषणं जयेत् ॥
वह्निमान्द्य दशवक्त्रनाशनो रामबाण इव विश्रुतोरसः ।

रामबाणरसः ॥ १४१ ॥

शुद्धसूतं विषं गन्धं समं सर्वं विचूर्णयेत् ।
मरिचं सर्वतुल्यञ्च कण्टकार्य्याः फलद्रवैः ॥
मर्द्दयेद् भावयेत् सर्वमेकविंशतिवारकम् ।
त्रिगुञ्जां वटिकां खादेत् सर्वाजीर्णप्रशान्तये ॥
अजीर्णकण्टकः सोयं रसो हन्ति विसूचिकाम् ।

अजीर्णकण्टकोरसः ॥

शुद्धसूतं द्विधागन्धं त्रिभागं तीक्ष्णभस्मकम् ।
त्रिभिः समं विषं देयं चित्रकक्काथभावितम् ॥
धूर्त्तबीजस्य भस्मापि द्वात्रिंशद्भागसंयुतम् ।
कटुत्रयं त्रिभागं स्यात् लवङ्गैला च तत्समम् ॥

बृहन्महोदधिरसे लवङ्गादिसर्वं कर्षपरिमितं मन्तोत्वा इत्यादि द्रवैर्भावयेत् । ततः रसगन्धविषमेकीकृत्य आर्द्रकादि रसैर्भावयेत्॥१४०॥

रामबानरसे रसादि गन्धान्तानां चतुर्णां समभागं मरिचञ्चैक भागापेक्षयाद्विगुणं, मिलितापेक्षयेति केचित् । जातिकाफलमर्द्धभागिकमिति एक भागापेक्षया । तिन्तिड़ीफलमपक्कतिन्तिड़ीफलम्॥१४१॥

जातीफलं तथा कोषमर्द्दभागं नियोजयेत् ।
तथार्द्धं लवणं पञ्च स्नुह्यर्कैरण्डतिन्तिड़ी ॥
अपामार्गाश्वत्थजञ्च क्षारं दद्याद्विचक्षणः ।
हरीतकी यवक्षारं स्वर्जिका हिङ्गुजीरकम् ।
टङ्कणञ्च सूततुल्यं चाम्लयोगेन मर्द्दयेत् ।
भोजनान्ते प्रयोक्तव्यो गुञ्जाफलप्रमाणतः ॥
रसः पाशुपतीनाम सद्यः प्रत्ययकारकः ।
दीपनः पाचनो हृद्यः सद्यो हन्ति विसूचिकाम् ॥
तालमूलीरसेनैव उदरामयनाशनः ।
मोचरसेनातीसारं ग्रहणीं तक्रसैन्धवैः ॥
सौवर्च्चलकणाशुण्ठीयुतः शूलं विनाशयेत् ।
अर्शो हन्ति च तक्रेण पिप्पल्याराजयक्ष्मकम् ॥
वातरोगं निहन्त्याशु शुण्ठी सौवर्च्चलान्वितः ।
शर्कराधान्ययोगेन पित्तरोगं निहन्त्ययम् ॥
पिप्पली क्षौद्रयोगेन श्लेष्मरोगञ्च तत्क्षणात् ।
अतःपरतरो नास्ति धन्वन्तरिमतोरसः ॥

पाशुपतीरसः ॥ १४२ ॥

टङ्कणाङ्गस्य चूर्णं स्यात्तथा लवणपञ्चकम् ।
तिन्तिड़ीक्षारकञ्चैव कटुकत्रयमेव च ।

पाशुपतरसे तीक्ष्णभस्मकमिति ख्यातलौहम् । सूतादिविषपर्य्यन्तं द्रव्यं चित्रकद्रकाथेन भावयेत् । स्नुह्यादि अश्वगन्धान्तानां क्षारं, पुनःपञ्चलवणञ्च टङ्कणादिकञ्च प्रत्येकं रससम मित्यर्थः ॥ १४२ ॥

तथैव हिङ्गुकं ग्राह्यं विषपारदगन्धकम् ।
अपामार्गस्य वह्नेश्च क्वाथैर्निम्बाकजैर्द्रवैः ॥
भावयेत् सर्वचूर्णं तदम्लवर्गैर्विशेषतः ।
यावत्तदम्लतां याति गुड़िकामृतरूपिणी ॥
सद्यो वह्निकरीचैव भस्मकञ्च नियच्छति ।
भुक्ताकण्ठन्तु तस्यान्ते खादेच्च गुड़िकामिमाम् ॥
तत्क्षणाज्जारयत्याशु पुनर्भोजनमिच्छति ।
हन्ति वातं तथा पित्तं कुष्ठानि विषमज्वरम् ॥
गुल्माख्यं पाण्डुरोगञ्च निद्रालस्य मरोचकम् ।
शूलञ्च परिणामोत्थं प्रमेहञ्च प्रवाहिकाम् ॥
रक्तस्रावञ्च शोथञ्च दुर्नामानि विशेषतः ।

बृहच्छङ्खवटी ॥ १४३ ॥

माक्षिकं रसगन्धौ च हरितालं मनःशिला ।
त्रिवृद्दन्तीवारिवाहं चित्रकञ्च महौषधम् ॥
पिप्पली मरिचं पथ्या यमानी कृष्णजीरकम् ।
रामठं कटुकापाथि सैन्धवं साजमोदकम् ॥
जातीफलं यवक्षारं समभागं विचूर्णयेत् ॥
आर्द्रकस्य रसेनैव निर्गुण्ड्याः स्वरसेन च ।

बृहच्छङ्खवटिकायां चिञ्चाक्षारं तिन्तिड़ीफलत्वक्भस्म । अत्र अम्लवर्गैर्भावयेदित्युक्तं तमम्लवर्गमाह । अम्लवेतसजम्बीरलुङ्गाम्लचणकाम्लकाः । नागरङ्गं तिन्तिड़िकं चिञ्चाफलञ्च निम्बुकम् । चाङ्गेरी दाड़िमं लोलं करमर्द्दस्तथैव च । व्यक्ताम्लोयं गणः प्रोक्तो वेतसाम्लस्तूत्तमः । जम्बीर चणकाम्लञ्च सर्वत्रैव प्रशस्यते ॥ १४२ ॥

सूर्य्यावर्त्तरसेनैव तुलस्याः स्वरसेन च ॥
आतपे भावयेद्वैद्यः खल्लपात्रे च निर्म्मले ।
पेषयित्वा वटीं खादेत् गुञ्जाफलसमप्रभाम् ॥

भुक्तोत्तरीये बहुभोजनान्ते
मुहुर्मुहुर्वाञ्छति भोजनानि ।
आमानुबन्धे च चिराग्निमान्द्ये
विड्‌विग्रहे पित्तकफानुबन्धे ॥
शोथोदरे चार्शगदेप्यजीर्णे
शूलप्रदोषे प्रभवे ज्वरे च ।
शस्तावटी भक्तविपाकसंज्ञा
सुखं वपाच्याशु निरस्य कोष्ठम् ॥

भक्तविपाकवटी ॥ १४४ ॥

अभ्रकं पारदं ताम्रं गन्धकं मरिचानि च ।
समभागमिदं चूर्णं चाङ्गेरीरसमर्द्दितम् ॥
मर्द्दिते हि रसे भूयो जयन्ती सिन्धुवारयोः ।
भावनापि च कर्त्तव्या गुञ्जापरिमिता वटी ।
तप्तोदकानुपानेन चतस्रस्तिस्र एव वा ॥
वह्निमान्द्ये प्रदातव्या वट्याः पञ्चामृतास्तथा ।

पञ्चामृतवटी ॥

पलं रसस्य द्विपलं बलेःस्या
च्छुल्वायसी चार्द्धपलप्रमाणे ।

भक्तविपाकिकायां बारिवाह' मुस्तकं, रामठ' हिङ्गु ॥ १४४ ॥

संचूर्ण्य सर्वं द्रुतमग्नियोगा
देरण्डपत्रे ऽथ निवेशनीयम् ॥
कृत्वाथतां पर्पटिकां विदध्या-
ल्लौहस्य पात्रे त्ववपूतमस्मिन्।
जम्बीरजं पक्वरसं पलानां
शतं नियोज्याग्निमथाल्पमल्पं
जीर्णे रसे भावितमेतदेतैः
सुपक्वकोलोद्भववारिपूरैः
सवेतसाम्लैः शतमत्रयोज्य
समं रजष्टङ्कणजं सुभृष्टम् ॥
विड़ं तदर्द्धं मरिचं समञ्च।
तत् सप्तवारं चणकाम्लकेन।
क्रव्यादनामा भवति प्रसिद्धो।
रसस्तु मन्थानकभैरवोक्तः ॥
माषद्वयं सैन्धवतक्रपीत।
मेतत् सुधन्यं खलुभोजनान्ते।
गुरूणि मांसानि पयांसि पिष्टम् ॥
घृतानि सेव्यानि फलानि चापि।
मात्रातिरिक्तान्यपि सेवितानि।
यामद्वयाज्जारयति प्रसिद्धः ॥

कार्श्यस्थौल्यनिवर्हणो गरहरः सामार्त्तिनिर्नाशनः
गुल्मप्लीहनिसूदनो ग्रहणिकाविध्वंसनः स्रंसनः ॥
वातश्लेष्मनिवर्हणः श्रमहरः शूलार्त्तिशूलापहः।

वातग्रन्थिमहोदरापहरणः क्रव्यादनामा रसः॥

क्रव्यादोरसः॥ १४५॥*

चारद्वयं सूतगन्धौ पञ्चकोलमिदं समम्।
सर्वतुल्या जया देया तदर्द्धं शोग्रुवल्कलम्।
एतत् सर्वं जयाशिग्रुवह्निमार्कवजै रसैः।
भावयेत्त्रिदिनं घर्मे ततो लघुपुटे पचेत्।
भावयेत् सप्तधाचार्द्रद्रवैर्ज्वालानलो भवेत्।
पाचनो दीपनो ह्यश्चोदरामयनाशनः॥

ज्वालानलोरसः॥ १४६॥

अमृतवराटमरिचैर्द्विपञ्चनवभागयोजितैः क्रमशः।

क्रव्यादरसे बलेर्गन्धकस्य। शुल्वायसोचार्द्धपलप्रमाणे इति ताम्रलौहयोः प्रत्येकमर्द्धपलत्वम्। रसादिलौहान्तानां चतुर्द्रव्याणां यथोक्तभागान् गृहीत्वा लौहपात्रे जम्बीररसं निम्बाकरसं वा शतपलं दत्वा तल्लौहपात्रतले अल्पमात्रमग्निं प्रज्वाल्य शनैःशनैः पचेत्। जीर्णे जम्बीररसे सति भावयेत् पञ्चकोलकाथैः अम्लवेतसकाथैर्वा ततः रसादीनां चतुर्णां समभागं टङ्कणं विड़ं विड़लवणं तच्च टङ्कणार्द्धभागं, मरिचसमञ्च तदिति मरिचचूर्णं टङ्कणतुल्यमित्येके अन्ये तु सर्वचूर्णसममिति। एतत् सर्वमेकीकृत्य चणकाम्लैर्भावयेत्॥ १४५॥

ज्वालानलरसे जया विजया, मार्कवो भृङ्गराजः। भावयेत्त्रिदिनमिति प्रत्येकैस्त्रिदिनं भावयेत्॥ १४६॥

---

* इममेवरसं कामराजो लिखतिस्म इति रसेन्द्रचिन्तामणिः कामराजमते पलं रसस्य द्विपलं बलेः स्यादित्यादि। अन्यरसवित्पण्डितमते तु द्विपलं गन्धकं शुद्धमित्यादि। एतच्च रसेन्द्रचिन्तामणावद्रष्टव्यम्।

वटिकामुद्गसमाना कफत्रिदोषवह्निमान्द्यहारिणी ।
अभ्रं पारदगन्धकौ सदरदौ ताम्रञ्च तालं शिला ॥
वङ्गञ्च त्रिफला विषञ्च कुनटी भागास्त्रयो दन्तितः ।
शृङ्गीव्योषयमानी चित्रजलदं द्वे जीरके टङ्कणम् ॥
एलापत्रं लवङ्ग हिङ्गुकटुकी जातीफलं सैन्धवम् ।
एतान्यार्द्रकचित्रदन्ती सुरसा वासानीरैर्विल्वजैः ॥
पत्तोत्थैरपि सप्तधा सुविमले खल्ले विभाव्यान्वितः ।
खादेद्वल्लमितं तथा च सकलव्याधौ प्रयोज्या बुधैः ॥
विड्बन्धे कफजे त्रिदोषजनिते ह्यामानुबन्धेऽपि च ।
मन्दाग्नौ विषमज्वरे च सकले शूले त्रिदोषोद्भवे ॥
हन्यात्तानपि भक्तपाकवटिका भूयश्च सामं जयेत् ।

बृहद्भक्तपाकवटी ॥ १४७ ॥

लवङ्गशुण्ठीमरिचानि भृष्टसौभाग्यचूर्णानि समानिकृत्वा ।
भाव्यान्यपामार्गहुताशवाराप्रभूतमांसादिकजारणाय ॥

लवङ्गादि ॥ १४८ ॥

लवङ्गजातीफलधान्यकुष्ठं
जीरद्वयं त्र्यूषणत्रैफलञ्च ।

बृहद्भक्तपाकवटिकायां दरदं हिङ्गुलं तालं हरितालं शिला मनःशिला, कुनटी नैपालीमनःशिला, अभ्रादिकुनट्यन्तानां प्रत्येकं भागैकं दन्तिनस्त्रयोभागाः, तथा शृङ्ग्यादिसैन्धवान्तानां प्रत्येकं भागैकम् । एतत् सर्वमेकीकृत्य आर्द्रकादिस्वरसैः सप्तवारं भावयेत् ॥ १४७ ॥

लवङ्गादिवटिकायां भृष्टसौभाग्यचूर्णानि भृष्टटङ्कणचूर्णानि । उत्तार्यस्त्रिलवकः ॥ १४८ ॥

एलात्वचं टङ्कवराटमुस्तं
वचाजमोदा विड़सैन्धवञ्च ।
तदर्द्धकं पारदगन्धमभ्रं
लौहञ्च तुल्यं सुविचूर्ण्य सर्वं
तन्नागवल्लीदलतोयपिष्टं
वल्लप्रमाणां वटिकाञ्च कृत्वा ।
प्रातर्वदध्यादपिचोष्णतोये
रियं निहन्यादुग्रहणीविकारम् ।
अमानुबन्धं सरुजं प्रवाहं
ज्वरं तथा श्लेष्मभवं स शूलम् ॥
कुष्ठाम्लपित्तं प्रवलं समीरं
मन्दानलं कोष्ठगतञ्च वातम् ।
वटी लवङ्गाद्या वसुप्रणीता
तथा सवातं विनिहन्ति शोघ्रम् ॥

लवङ्गादिवटी ॥ १४९ ॥

जातीफलं लवङ्गञ्च पिप्पली सिन्धुरामृतम् ।
शुण्ठी धुस्तूरवीजञ्च दरदं टङ्कणन्तथा ॥
समं सर्वं समाहृत्य जम्बाम्भसा विमर्द्दयेत् ।
वल्लमानावटीकार्य्याचाग्निमान्द्यप्रशान्तये ॥

जातीफलादिवटी ॥ १५० ॥

इहलवङ्गादिवटिकायां तदर्द्धमिति एकभागपेक्षया अर्द्धभाग-त्वम् ॥ १४९ ॥

जातीफलादिवटिकायां सिन्धुःसिन्धुवारः, भद्रस्तुसैन्धवमित्याह ॥१५०॥

सार्द्धकर्षं रसेन्द्रस्य गन्धकस्य तथैव च।
विषं कर्षत्रयं दद्यात् सर्वतुल्यं मरिचकम्।
दग्धशङ्खञ्च तत्तुल्यं पञ्चकर्षाणि नागरात्।
स्वर्ज्जिका रामठकणा सिन्धुसौवर्च्चलं विड़म्॥
सामुद्रमौद्भिदञ्चैव भावयेत् निम्बुकद्रवैः।
वटी ग्रहण्यम्लपित्तशूलघ्नी वह्निदीपनी॥
वह्निमान्द्यकृतान् रोगान् सामदोषं विनाशयेत्।

शङ्खवटी॥ १५१॥*

रसं गन्धः मृतं ताम्रं मृतमभ्रं फलत्रयम्।
चूर्णञ्च दन्तीवीजञ्च सर्वं खल्ले विमर्द्दयेत्।
द्रोणपुष्पीरसैश्चापि भावयेच्च पुनःपुनः।
अस्य मात्रा प्रदातव्या गुञ्जैक वा त्रिगुञ्जिका।
चिन्तामणिरसोह्येष चाजीर्णे शस्यते सदा।
आमवातं ज्वरं हन्ति सर्वशूलनिसूदनः॥

चिन्तामणिरसः।

रसनिष्कं गन्धनिष्कं निष्कमात्रं प्रदीपनम्।
मानमर्द्धं प्रदातव्यं चुल्लिका लवणं भिषक्॥
मर्द्दयित्वा प्रदातव्यमथास्य माषमात्रकम्।

शङ्खवटिकायां तत्तुल्यमिति मरिचतुल्यं सिन्धु सैन्धवं औद्भिदं पांशुलवणं प्रत्येकमिति नागरादित्रिप्रत्येकं पञ्चकर्षाणीत्यर्थः॥१५१॥

---

* दग्धशङ्खस्य चूर्णं स्यात् तथा लवणपञ्चकमित्यादि बृहत्शङ्खवटीका भैषज्यरत्नावल्यामनुसर्त्तव्या।

अजीर्णे चाग्निमान्द्ये च दातव्यो रसवल्लभः ॥

प्रदीपनीरसः ॥ १५२ ॥

रसस्यैकं पलं दत्वा नागञ्च गन्धकं पलम् ।
चारत्रयं पलं देयं लवङ्गं पलपञ्चकम् ॥
दग्धमूलीजयाचूर्णं तद्द्रवेण तु भावयेत् ।
चित्रकस्य रसेनाथ भृङ्गराजरसेन तु ॥
शिग्रुमूलद्रवैश्चापि ततो भाण्डे निरुध्य च ।
याममात्रं पचेदग्नौ मर्द्दयेदार्द्रकद्रवैः ॥
ताम्बुलीपत्रसंयुक्तं खादेन्निष्कमितं सदा ।

विजयरसः ॥ १५३ ॥

माक्षिकं रसगन्धौ च हरितालं मनःशिला ।
गगनं कान्तलौहञ्च सर्वमेतच्च कार्षिकम् ॥
विषदन्ती वारिवाहं चित्रकञ्च मलौषधम् ।
पिप्पली मरिचं पथ्या यमानी कृष्णजीरकम् ॥
रामठं कटुकापानी सैन्धवं साजमोदकम् ।
जातीफलं यवचारं समभागं विचूर्णयेत् ॥
आर्द्रकस्य रसेनैव निर्गुण्ड्याः स्वरसेन च ।
सूर्य्यावर्त्तरसेनैव ज्योतिष्मत्यारसेन च ॥

प्रदीपनरसे प्रदीपनं विषं मानमर्द्धमित्यत्र पलमर्द्धमिति केचित् पठन्ति ॥ १५२ ॥

विजयरसे रसादिविजयाचूर्णान्तं सर्वमेकीकृत्य यथोक्तरसैः सप्तसप्तवारं विभावयेत् । ततः पुटपाकविधिना यामैकं पचेत् ॥ १५३ ॥

आतपे भावयेद्वैद्यः कृत्वा गुञ्जामितां वटीम्।
भक्षयेत्तां वटीं प्राज्ञो लवङ्गेन नियोजिताम्॥

भुक्तोत्तरीये बहुभोजनान्ते
आमानुबन्धे चिरवह्निमान्द्ये
विड्विग्रहे वातकफानुबन्धे
शोथोदरानाहगदेष्वजीर्णे
शूले त्रिदोष प्रभवेज्वरे च।
शस्तावटी भक्तविपाकसंज्ञा।

महाभक्तपाकवटी॥

ताम्रं पारदगन्धकं त्रिकटुकं तौल्यञ्च सौवर्चलम्।
खल्ले मर्द्द्य दिनं निधाय सिकताकुम्भेषु यामन्ततः
स्विन्नं तेष्वपि रक्तशाकिनीभवं चारं समं भावयेत्।
एकीकृत्य च मातुलुङ्गकजलैर्न्नाम्नारसो राक्षसः॥

रसराक्षसः॥ १५४॥

त्रिफलामुस्तवेल्लैश्च सितया कणया समम्।
खरमञ्जरीवीजैश्च लौहं भस्मकनाशनम्॥

त्रिफलालौहम्॥ १५५॥

अपामार्गस्य च पत्रं मरिचञ्च समं समम्।
अम्लरोनीयुतं पिष्टमञ्जनात् सूचिकां जयेत॥

रसराक्षसमाह ताम्रमित्यादि ताम्रादि सर्वं खल्लेदिनं संमर्द्द्य वालुकायन्त्रे पचेत्। ततस्तुल्यं रक्तपुनर्नवाक्षारं विमिश्रय मातुलुङ्गरसैः सप्ताहं भावयेत्॥ १५४॥

त्रिफलालौहमाह त्रिफलेत्यादि खरमञ्जरीवीजमपामार्गवीजं त्रिफलादिसर्वद्रव्यतुल्यं मृतलौहं देयम्॥ १५५॥

टङ्गणं रसगन्धौ च समं भागत्रयं विषात्।
कपर्द्दशङ्खयोस्त्वंशं वसुभागं मरिचकम्॥
दिनं जम्बाम्भसा पिष्टं वल्लमात्रं प्रदापयेत्।
विसूचीशूलविष्टम्भ वह्निमान्द्ये ज्वरे तथा॥
अजीर्णे संग्रहण्याञ्च सिद्धस्याग्निकुमारकः।

अग्निकुमारः॥ १५६॥

द्वे चारौ रसगन्धकौ समनवौ चारेण तुल्यं विषम्।
चिञ्चा शङ्खं चतुर्गुणं रसवरैर्निम्पाकजातैः क्वतम्॥
वारम्बारमिदं सुपाकरचितं लौहं चिपेद्धिङ्गुकम्।
भूयष्टङ्कसमं समर्द्दितमिदं गुञ्जाप्रमाणं भजेत्॥
ख्याता शङ्खवटी महाग्निजननी शूलान्तकृत्पाचनी।
कासश्वासविनाशिनी चयहरी मन्दाग्निसन्दीपनी॥
वातव्याधिमहोदरादिशमनी तृष्णामयोच्छेदिनी।
सर्व्वव्याधिनिसूदनी क्रिमिहरी दुष्टामयध्वंसिनी॥

शङ्खवटी॥ १५७॥*

इत्यजीर्णाधिकारः।

अग्निकुमारे समभागमिति प्रत्येकं भागैकम्। वसुभागमिति भागाष्टकम्॥ १५६॥

शङ्खवटिकायां द्वौ चाराविति यवचारं स्वर्जिकाचारञ्च। समनवौ समभागौ। चिञ्चा चिञ्चाफलत्वग्भस्म वारम्बारमिति निम्बाकजैः रसैः सप्तवारं भावयेदित्यर्थः॥ १५७॥

इत्यग्निमान्द्यादिचिकित्सा।

---

* सारकलिकाधृता महाशङ्खवटीका भैषज्यरत्नावल्यामनुसर्त्तव्या।

अथ क्रिमिरोगचिकित्सा ।

विड़ङ्गं द्विपलञ्चैव विषचूर्णं तदर्द्धकम् ॥
लौहचूर्णं तदर्द्धञ्च तदर्द्धं शुद्धपारदम् ।
रसतुल्यं शुद्धगन्धं छागीदुग्धेन पेषयेत् ॥
छायाशुष्कां वटीं कृत्वा खादेत् षोड़शरत्तिकाम् ।
धान्यजीरानुपानेन नाम्ना कालानलोरसः ॥
उदरस्थं क्रिमिं हन्यादुग्रहरुग्गणैः समन्वितम् ।
अग्निदः शोथशमनो गुल्मप्लीहोदरान् जयेत् ॥
गहनानन्दनाथेन भाषितो विश्वसम्पदे ।

क्रिमिकालानलोरसः ॥ १५८ ॥

शुद्धसूतं समं गन्धमभ्रं लौहं मनःशिला ।
धातकी त्रिफला लोध्रं विड़ङ्गं रजनीद्वयम् ॥
भावयेत् सप्तधा सर्वं शृङ्गवेरभवै रसैः ।
चणमात्रां वटीं कृत्वा त्रिफलारससंयुताम् ॥
भक्षयेत् प्रातरुत्थाय क्रिमिरोगोपशान्तये ।
वातिकं पैत्तिकं हन्ति श्लैष्मिकञ्च त्रिदोषजम् ॥
क्रिमिविनाशनामायं क्रिमिरोगकुलान्तकः ।

क्रिमिविनाशोरसः ॥ १५९ ॥

अजीर्णात् क्रिमिसम्भव इत्यजीर्णानन्तरं क्रिमिचिकित्सामाह ।
तत्र क्रिमिकालानलरसे लौहचूर्णं तदर्द्धकमिति विषार्द्धं लौहचूर्णमेव-
मन्यत ॥ १५८ ॥

क्रिमिविनाशरसे रजनीद्वयमिति हरिद्राद्वयं, शृङ्गवेररसैरार्द्रक-
रसैः ॥ १५९ ॥

सूतं गन्धं मृतं लोहं मरिचं विषमेव च।
धातकी त्रिफला शुण्ठी मुस्तकं सरसाञ्जनम्॥
त्रिकटु मुस्तकं पाठा वालकं बिल्वमेव च।
भावयेत् सर्वमेकत्र स्वरसैर्भृङ्गजैस्ततः॥
वराटिकाप्रमाणेन भक्षणीयो विशेषतः।
क्रिमिरोगविनाशाय रसोयं क्रिमिनाशनः॥

क्रिमिरोगारिरसः।

शुद्धंसूतं शुद्धगन्धमजमोदाविड़ङ्गकम्।
विषमुष्टि ब्रह्मवीजं क्रमाद्द्विगुणितं भवेत्॥
चूर्णयेन्मधुना मिश्रं निष्कैकं क्रिमिजिद्भवेत्।
कीटमर्द्दोरसोनाम मुस्ताक्वाथं पिवेदनु॥

कीटमर्द्दोरसः॥ १६०।

क्रिमिघ्नं किंशुकारिष्टवीजं सुरसभस्मकम्।
वल्लद्वयं चाखुपर्णीरसैः क्रिमिविनाशनः॥

क्रिमिघ्नोरसः॥ १६१॥

क्रमेण वृद्धं रसगन्धकाजमोदा विड़ङ्गं विषमुष्टिका च।
पलाशवीजञ्च विचूर्णमस्य निष्कप्रमाणं मधुनावलीढ़म्।
पिवेत् कषायं घनजं तदूर्द्धं रसोयमुक्तः क्रिमिमुद्गराख्यः।

कीटमर्द्दरसे ब्रह्मवीजमिति भार्गीवीजम्॥ १६०॥

क्रिमिघ्नरसे क्रिमिघ्नं विड़ङ्गं किंशुकः पलाशस्तस्य वीजं याड़ अरिष्टवीजं निम्ववीजम्॥ १६१॥

क्रिमिं निहन्यात् क्रिमिजांश्च रोगान् सन्दीपयत्यग्निमयं चिरात्तु॥

क्रिमिमुद्गरो रसः।

पारदं गन्धकं शुद्धं वङ्गं शङ्खं समं समम्।
चतुर्णां योजयेत्तुल्यं पथ्याचूर्णं भिषग्वरः॥
दण्डयन्त्रेण निर्मथ्य पटोलस्वरसं क्षिपेत्।
कार्पासबीजसदृशीं वटिकां कुरु यत्नतः॥
त्रिवटीं भक्षयेत् प्रातः शीततोयं पिबेदनु।
केवलं पैत्तिके योज्यः कदाचिद्वातपैत्तिके॥
श्रीमद्गहननाथोक्तः क्रिमिधूलिजलप्लवः।

क्रिमिधूलिजलप्लवो रसः॥ १६२॥

विशुद्धं पारदं गन्धं वङ्गं तालं वराटकम्।
मनःशिला कणाकाचं सोमराजी विडङ्गकम्॥
दन्तीबीजञ्च जैपालं शिला टङ्गणचित्रकम्।
कर्षमात्रन्तु प्रत्येकं वज्रीक्षीरेण मर्द्दयेत्॥
कलायसदृशीं कृत्वा वटिकां भक्षयेत्ततः।
क्रिमिकाष्ठानलो नाम रसोऽयं परिनिर्मितः॥
श्लैष्मिके श्लेष्मपित्ते च श्लेष्मवाते च शस्यते।

क्रिमिकाष्ठानलो रसः॥

लाक्षाभल्लातश्रीवासश्वेतापराजिताशिफा॥
अर्ज्जुनस्य फलं पुष्पं विडङ्गमजगुग्गुलुः।

क्रिमिधूलीजलप्लवरसे पथ्याचूर्णं हरीतकीचूर्णम्॥ १६२॥

एभिः कीटाश्च साम्यन्ते तिष्ठतापि गृहे सदा ॥
भुजङ्गा मूषिका दंशाः मशकामा मतङ्गजाः ।
दूरादेव पलायन्ते किन्नकीटाश्च ये पराः ॥

लाक्षादिवटी ॥ १६३ ॥

शुद्धसूतमिन्द्रयवमजमोदा मनःशिला ।
पलाशबीजं गन्धश्च देवदालग्राद्रवैर्दिनम् ॥
संमर्द्य भक्षयेन्नित्यं शालपर्णीरसैः सह ।
सितायुक्तं पिबेच्चानु क्रिमिपातो भवत्यलम् ॥

क्रिमिहरोरसः ॥ १६४ ॥

रसं गन्धश्च मरिचं जातीफल लवङ्गकम् ।
कणा तालं शुण्ठी गङ्ग प्रत्येकं भागसम्मितम् ॥
सर्वचूर्णसमं लौहं विडङ्गं सर्वतुल्यकम् ।
लौहं विडङ्गकं नाम कोष्ठस्थ क्रिमिनाशनम् ॥
दुर्नाममर्शश्चैव मन्दाग्निश्च विसूचिकाम् ।
शोथं शूलं ज्वरं हिक्कां श्वासं कासं विनाशयेत् ॥

विडङ्गलौहम् ॥ १६५ ॥

इति रसेन्द्रसारसंग्रहे क्रिमिचिकित्सा ॥

लाक्षावटीकायां श्रीवासः नवनीतखोटी, श्वेतापराजिताशिफा श्वेतापराजितामूलं, अर्जुनस्य फलं पुष्पमिति अर्जुनस्य फलं पुष्पञ्चेत्यर्थः ॥ १६३ ॥

क्रिमिहररसे देवदाली हस्तिघोषकफलम् ॥ १६४ ॥

विडङ्गलौहे लौहस्य तत्सममिति रसादितालकान्तानां तुल्यं लौहं तथा मिलितसर्वचूर्णसमं विडङ्गचूर्णम् ॥ १६५ ॥

इति क्रिमिचिकित्सा ।

अथ पाण्डुरोगचिकित्सा।

लौहचूर्णं निशायुग्मं त्रिफला रोहिणीयुतम्॥
प्रलिह्यान्मधुसर्पिभ्यां कामला पाण्डुशान्तये।

निशालौहम्॥ १६६॥

धात्री लौहरजः व्योष निशाचोद्राचशर्करा:।
भक्षणात् विनिहन्त्याशु कामलञ्च हलीमकम्॥

धात्रीलौहम्॥

शुद्धसूतं तथा गन्धं मृत ताम्राभ्रगुग्गुलु।
जैपालवीजं तुल्यांशं घृतेन वटकीकृतम्॥
भक्षयेद्बदरास्थ्याभं शोथपाण्डुप्रशान्तये।
पञ्चाननवटी ख्याता पाण्डुरोगकुलान्तिका॥

पञ्चाननवटी॥ १६७॥

हिङ्गुलसम्भवं सूतं गन्धकं काशीशोद्भवम्।
लौहं ताम्रं वराटञ्च तुल्यं हिङ्गुफलत्रिकम्॥
स्नुहीचीरं यवक्षारं जैपालं दन्तिकं त्रिवृत्।
प्रत्येकं शाणभागन्तु छागीचीरेण पेषयेत्॥

पुरिषक्रिमितः पाण्डुरोगस्य प्रदुर्भावात् क्रिम्यनन्तरं पाण्डुरोग-चिकित्सामाह, तत्र निशालौहे निशायुगं हरिद्राद्वयं अत्र सर्वद्रव्यसमं लौहं प्रदेयं लौहप्राधान्यात् पाण्डुरोगहरत्वाच्च लौहाभावे मण्डूरं प्रदेयमित्यपदिशन्ति वृद्धाः॥ १६६॥

पञ्चाननवटिकामाह शुद्धसूतमित्यादि, अत्र सर्वसमं जैपाल-चूर्णम्॥ १६७॥

चतुर्गुञ्जां वटीं खादेद्धारिद्रा मधुना सह।
प्राणवल्लभनामायं गहनानन्दभाषितः।
श्लेष्मदोषं समालोक्य युक्त्या च त्रुटिवर्द्धनम्॥
निहन्ति कामलां पाण्डुमानाहं श्लीपदन्तथा।
गलगण्डं गण्डमालां व्रणांश्च च हलीमकम्॥
शोथं शूलमूरुस्तम्भं संग्रहग्रहणीं जयेत्।
वान्तिं मूर्च्छां भ्रमिं दाहं कासं श्वासं गलग्रहम्॥
असाध्यं सन्निपातञ्च जीर्णज्वरमरोचकम्।
वातरक्तं तथा शोषं कण्डूं विस्फोटकापचीम्॥
नातः परतरं किञ्चित् कामलार्त्तिरुजापहम्।

प्राणवल्लभोरसः॥ १६८॥

पलं सूतं पलं गन्धं पथ्या चित्रकयोः पलम्।
मुस्तैलापत्रकाणाञ्च प्रतिसार्द्धं पलं क्षिपेत्॥
त्र्यूषणं पिप्पलीमूलं विषञ्चापि पलं न्यसेत्।
नागकेशरकं कर्षमेरण्डस्य पलन्तथा॥
पुरातनगुडेनैव तुलेनैव विमिश्रयेत्।
मर्द्दयेत् कनकद्रावैर्भावयेच्च घृतान्विताम्॥
वटिकां वदरास्थ्याभां कारयेद्भक्षयेन्निशि।
पाण्डुरोगहरःसोयं रसः कामेश्वरः स्वयम्॥

कामेश्वरोरसः॥ १६९॥

प्राणवल्लभरसे काश्मीरोद्भवं कुङ्कुमं, ताम्रमित्यत्र टङ्कणमिति केचित् पठन्ति॥ १६८॥

कामेश्वररसे वह्निश्चित्रकः पत्रं तेजपत्रं तुलेनेति सर्व्वचूर्णतुल्येन, कनकद्रावैर्धूस्तूररसैः॥ १६९॥

पलं लौहस्य किट्टस्य पलं गव्यस्य सर्पिषः ।
सितायाश्च पलञ्चैकं क्षौद्रस्यापि पलन्तथा ॥
तोलैकं कान्तलौहस्य त्रिकत्रयसुभावितम् ।
ततः पात्रे विधातव्यं लौहे च मृन्मये तथा ॥
हविषा भावितञ्चापि रौद्रे च शिशिरे तथा ।
भोजनादौ तथा मध्ये चान्ते चापि प्रदापयेत् ॥
अनुपानं प्रदातव्यं बुद्ध्वा दोषबलाबलम् ।
कामलां पाण्डुरोगञ्च हलीमकं सुदारुणम् ॥
निहन्ति नात्र सन्देहो भास्करस्तिमिरं यथा ।

त्रिकत्रयाद्यं लौहम् । १७० ॥

विडङ्ग मुस्त त्रिफला देवदारुषडूषणैः ।
तुल्यमात्रमयश्चूर्णं गोमूत्रेऽष्टगुणे पचेत् ॥
तैरक्षमात्रां गुड़िकां कृत्वा खादेद्दिने दिने ।
कामलापाण्ड़ुरोगार्त्तः सुखमापद्यते चिरात् ।

विड़ङ्गादिलौहम् । १७१ ॥

त्रिकत्रयादिलौहे लौहं किट्टस्य मण्डूरस्य । अत्र शीताक्षौद्रे प्रक्षेपणीये ॥ १७० ॥

विड़ङ्गादिलौहे तुल्यमात्रमयश्चूर्णमिति विड़ङ्गादीनाञ्चूर्णसमं लौहचूर्णमित्यर्थः । अत्र लौहस्य प्राधान्यात् तदपेक्षयैव गोमूत्रस्याष्टगुणत्वम् । पक्वावतारिते विड़ङ्गादिचूर्णानि प्रक्षेप्याणि । अन्ये तु विड़ङ्गादिचूर्णैः सह लौहचूर्णस्य पाकः । गोमूत्रस्याष्टगुणत्वं सर्वचूर्णापेक्षयैव, अत्र द्रवद्वैगुण्यं न व्यवहरन्ति वृद्धाः । पाकश्चात्र गुड़पाकेनेत्याहुः । अक्षमात्रां गुड़िकां कुर्य्यात् न तु तत् प्रमाणं खादेत् । मात्रा च देहाग्निबलापेक्षिणी एवं सर्वत्र मण्डूरपाकादौ ॥ १७१ ॥

विड़ङ्गत्रिफलाव्योषं शुद्धलौहन्तु तत्समम्।
पुरातनगुड़ेनाथ लेहयेद्दिनसप्तकम्॥
श्वयथुं नाशयेच्छोद्रं पाण्डुरोगं हलीमकम्।

विड़ङ्गादिलौहम्॥

मानचैकं ततःसूतं वड़भ्रं वसुलौहकम्।
गन्धकं त्रिफलाव्योषं चूर्णं मोचरसस्य च॥
मूषलीचामृतासत्वं प्रत्येकं पञ्चभागिकम्।
भावयेत् सर्व्वमेतच्च त्रिफलानां कषायके॥
भावना विंशतिर्द्देया दशरात्रं सुभावना।
शिग्रुचित्रकमूलाभ्यां मष्टधा च पृथक् पृथक्॥
त्रैलोक्य सुन्दरोनाम रसो निष्कमितोदितः॥
सितया च समं चोद्रैः शोथपाण्डुचयापहः।
ज्वरातिसारसंयुक्त सर्व्वोपद्रवनाशनः॥

त्रैलोक्यसुन्दरोरसः॥ १७२॥

दार्व्वी सत्रिफलाव्योष विड़ङ्गान्ययसोरजः।
मधुसर्पिर्युतं लिह्यात् कामलापाण्डुरोगवान्।

दार्व्यादिलौहम्॥ १७३॥

शालियष्टिकगोधूमयवमुद्गादयोहिताः।
रसाश्च जाङ्गलभवा मधुराः पाण्डुरोगिणाम्॥
पाण्डुरोदिता योगाघ्नन्ति ते कामलामपि॥ १७४॥

त्रैलोक्यसुन्दररसे अमृतासत्वं गुड़ूचीसत्वम्॥ १७२॥
दार्व्यादिलौहे दार्व्वी दार्व्वीत्वक् लौहचूर्णं सर्वसमम्॥ १७३॥
पाण्डुरोगचिकित्सा कामलायामप्यतिदिशति पाण्डुरो-
त्वादि॥ १७४॥

सूतकं गन्धकं लौहमभ्रकञ्च पलं पलम्।
वराटिकाशङ्खकञ्च प्रत्येकार्द्धपलं हरेत्॥
गोक्षुरबीजचूर्णञ्च पलैकं तत्र दीयते।
सर्वमेकीकृतं चूर्णं वासयन्त्रे विभावयेत्॥
पटोलं पर्पटी भार्गी विदारीशतपुष्पिका।
कुण्डली दन्ती वासा च काकमाचीन्द्रवारुणी॥
वर्षाभूकेशराजश्च शालिञ्च द्रोणपुष्पिका।
प्रत्येकार्द्धपलैर्द्राबैर्भावयित्वा वटीं कुरु॥
चतुर्गुञ्जवटीं खादेच्छागीदुग्धानुपानतः।
गहनानन्दनाथोक्तश्चन्द्रसूर्य्यात्मकोरसः॥
हलीमकं निहन्त्याशु पाण्डुरोगं सकामलम्।
जीर्णज्वरं सविषममम्लपित्तमरोचकम्।
शूलं प्लीहोदरानाहमष्ठीलां गुल्मविद्रधिम्॥
शोथं मन्दानलं हिक्कां कासं श्वासं वमिं भ्रमिम्।
भगन्दरोपदंशञ्च दद्रुकण्डूव्रणानि च॥
दाहं तृष्णामुरस्तम्भमामवातं कटीग्रहम्।
युक्तोमध्वेन मद्येन सुरयुषेण वारिणा॥
गुडूची त्रिफला वासा क्वाथनीरेण वा क्वचित्।

चन्द्रसूर्य्यात्मकोरसः॥ १७५॥

रसं गन्धं मृतं ताम्रं जयपालञ्च गुग्गुलु।
समांशमाज्यसंयुक्तां गुड़िकां कारयेद्भिषक्॥

चन्द्रसूर्य्यरसे कुण्डली गुडूची वर्षाभु पुनर्नवा॥ १ १७५॥

एकैकां भक्षयेन्नित्यं शाण्डुशोथप्रशान्तये ।
शीतलञ्च जलञ्चाम्लं वर्जयेत् पाण्डुसूदने ।

पाण्डुसूदनोरसः ॥ १७६ ॥

पञ्चकोलं समरिचं देवदारुफलत्रिकम् ।
विड़ङ्गमुस्तयुक्ताश्चभागास्त्रिपलसम्मिताः ॥
यावन्त्येतानि चूर्णानि मण्डूरं द्विगुणं ततः ।
पक्त्वा चाष्टगुणे मूत्रे घनीभूते तदुद्धरेत् ॥
ततोऽक्षमात्रान् वटकान् पिबेत् तक्रेण तक्रभुक् ।
पाण्डुरोगं जयत्याशु मन्दाग्नित्वमरोचकम् ॥
अर्शांसि ग्रहणीदोषमूरुस्तम्भमथापि वा ।
क्रिमिं प्लीहानमानाहं गलरोगञ्च नाशयेत् ॥
मण्डूरोवज्रनामायं रोगानीकप्रणाशनः ।

मण्डूरवज्रवटकः ॥ १७७ ॥

पारदं गन्धकं लौहं विषमभ्रकमेव च ।
समांशं मरिचस्याष्टौ टङ्गणञ्च चतुर्गुणम् ॥
भृङ्गराजरसैः सप्तभावनाचाम्लवेतसैः ।
गुञ्जाद्वयं पर्णखण्डे खादेत् सायं निहन्ति च ॥

पाण्डुसूदने रसादिगुग्गुल्वन्तं पञ्चद्रव्यं समभागं ह्रतं सर्वसमं गुड़िका तु पुरुषोचिता ज्ञेया ॥ १७६ ॥

मण्डूरवज्रवटके अत्र लौहकिट्टस्य प्रधान्यात् तदपेक्षयैव गोमूत्रस्याष्टगुणत्वं आसन्नपाके पञ्चकोलादिचूर्णं प्रक्षेप्यम् ॥ १७७ ॥

पाण्डुतामरुचिञ्चैव मन्दाग्निं ग्रहणीं ज्वरम्।
वातश्लेषभवान् रोगान् जयेदचिरसेवनात्॥

लघ्वानन्दरसः।

त्रिकटुत्रिफलावह्नि विड़ङ्गं लोहमभ्रकम्॥
एतानि समभागानि घृतेन वटिकां कुरु।
कामलां पाण्डुरोगञ्च हृद्रोगं शोथमेव च॥
भगन्दरं क्रिमिकोष्ठं मन्दानलमरोचकम्।
तान् सर्व्वान् नाशयेदाशु बलवर्णाग्निवर्द्धनः॥
सम्भोहलोहनामायं पाण्डुरोगे च पूजितः।

सम्भोहलोहः।

खिन्नमष्टगुणे मूत्रे लौहकिट्टं सुशोधितम्।
पाकान्ते त्र्यूषणं वह्नि वरा दार्व्वी सुरद्रुमान्॥
विड़ङ्गबीजचूर्णञ्च मुस्तं किट्टसमं क्षिपेत्।
प्रातःकर्षं भजेदस्य जीर्णे तक्रौदनं भजेत्॥
हलीमकं पाण्डुरोगमर्शांसि श्वयथुस्तथा।
ऊरुस्तम्भं जयेदेतत् कामलां कुम्भकामलाम्॥

त्र्यूषणादिमण्डुरम्।

त्रिफलाया गुडूच्या वा दार्व्व्या निम्बस्य वा रसः॥
प्रातर्माक्षिकसंयुक्तः शीलितः कामलापहः।

इति पाण्डुरोगाधिकारः॥

अथ रक्तपित्तचिकित्सा।

मृतार्कं मृतवङ्गञ्च मृताभ्रञ्च समाक्षिकम्।
अमृताम्बरसैर्भाव्यं त्रिसप्तक पुटे पचेत्।
वासा चीरविदारीभ्यां चतुर्गुञ्जाप्रमाणतः॥
भक्षणाद्धि निहन्त्याशु रक्तपित्तं सुदारुणम्।

अर्केश्वरः॥ १७८॥

सूतं गन्धं माक्षिकञ्चैव लौहं
सर्व्वं घृष्ट्वा त्रैफलेनोदकेन।
लौहे पात्र गोमयेग्नौ पुटित्वा
रात्रौ दद्याद्रक्तपित्तप्रशान्त्यै।

सुधानिधिरसः॥ १७९॥

आमला पिप्पलीचूर्णं तुल्यया सितया सह।
रक्तपित्तहरं लौहं योगराजमिदं स्मृतम्॥
वृष्याग्नि दीपनं बल्यमम्लपित्तविनाशनम्।
पित्तोत्थानपि वातोत्थान् निहन्ति विविधान् गदान्।

आमलाद्यं लौहम्॥ १८०॥

पाण्डुरोगवत् रक्तपित्तस्यापि पित्तरक्तकरणत्वाव्यभिचारात् पाण्डुरोगानन्तरं रक्तपित्तचिकित्सामाह। तत्र अर्केश्वररसे अर्कस्ताम्र अमृता गुडूची; माक्षिकं स्वर्णमाक्षिकम्॥ १७८॥

सुधानिधिरसे त्रैफलोदकेन त्रिफलाक्काथेन। भावनापात्र लौहपात्रं गोमयाग्निना कर्त्तव्या॥ १७९॥

आमलादिलौहे लौहमिति सर्वचूर्णसमं लौहम्। शतमूल्यादि लौहे सिताशर्करालौहमिति सर्वचूर्णसमम्॥ १८०॥

शतमूली सिता धात्री नागकेशरचन्दनैः।
त्रिकत्रयतिलैर्युक्तं लौहं सर्वगदापहम् ॥
तृष्णादाहज्वरच्छर्दिरक्तपित्तविनाशनम्।

शतमूल्याद्यं लौहम्।

रक्तपित्ते पिबेद्ग्रासमसहितं पर्पटीरसम्। *
वासाद्राचाभयानाञ्च क्वाथं वा शर्करान्वितम् ॥
योगवाहिरसान् सर्वान् रक्तपित्ते प्रयोजयेत्।
मृताभ्रं मुण्डतीक्ष्णञ्च माक्षिकं रसतालकम् ॥
गन्धकञ्च भवेत्तुल्यं यष्टिद्राचामृताद्रवैः।
दिनैकं मर्द्दयेत् खल्ले सिताक्षौद्रसमन्वितम् ॥
माषमात्रं निहन्त्याशु रक्तपित्तं सुदारुणम्।
ज्वरं दाहं चतक्षीणं तृष्णां शोषमरोचकम् ॥

रक्तपित्तान्तकोरसः ॥ १८१ ॥

रसस्य द्विगुणं गन्धं माक्षिकञ्च शिलाजतु।
चन्दनं गुडूचो द्राक्षा मधुपुष्पञ्च धान्यकम् ॥
कुटजस्य त्वचं वीजं धातकीनिम्बपत्रकम्।
यष्टिमधुसमायुक्तं मधुशर्करयान्वितम् ॥
विधिना मर्द्दयित्वा तु कर्षमात्रन्तु भक्षयेत्।
धारोष्ण पयसायुक्तं प्रातरेव समुत्थितः ॥
पित्तं तथाम्लपित्तञ्च रक्तपित्तं विशेषतः।

रक्तपित्तान्तकरसे रसतालकं हरितालमेव ॥ १८१ ॥

---

* पर्पटीरसमिति चेत्पर्पटीकाथं चेतपापड़ा इति लोके।

निहन्ति सर्व्वदोषञ्च ज्वरं सर्वं न संशयः॥
रसामृतरसोनाम गहनानन्दभाषितः।

रसामृतरसः।

कुष्माण्डकात् पलशतं सुस्विन्नं निष्कुलीकृतम्।
पचेत्तस्मि घृतप्रस्थे शनैस्ताम्रमयेदृढ़े॥
यदा मधुनिभः पाकस्तदाखण्डशतं न्यसेत्।
पिप्पली शृङ्गवेराभ्यां द्वे पले जीरकस्य च॥
त्वगेलापत्रमरिचधान्यकानां पलार्द्धकम्।
न्यसेच्चूर्णीकृतं तत्र दर्व्व्या सङ्घट्टयेत पुनः॥
तत्पक्वं स्थापयेद्भाण्डे दत्वा क्षौद्रं घृतार्द्धकम्।
तद्यथाग्निबलं खादेद्रक्तपित्तक्षतक्षयी॥

खण्डकुष्माण्डकः॥ १८२॥

शर्कंरातिलसंयुक्तं त्रिकत्रययुतन्त्वयः। *
रक्तपित्तं निहन्त्याशु चाम्लपित्त हरंपरम्॥

शर्क्करादं लौहम्॥ १८३॥

कुष्माण्डखण्डे निष्कुलीकृतमिति निस्त्वगस्थिकृतं किञ्चित्खण्डं कृत्वा उत्स्विद्य क्षौमे निवेश्य पीड़येत् ततः आतपे मनाक् संशोष्य पिष्ट्वा च पलशतं गृहीत्वा पक्तव्यम्। पिप्पलीशृङ्गवेराभ्यां द्वे पले जीरकस्य चेति कणाशुण्ठ्योः प्रत्येकं पलद्वयं जीरकस्य च द्वे पले। अत्र खण्डामलकमानानुसारात् कुष्माण्डकद्रवात् पात्रम् पाकार्थ दातव्यं यावान् यावरसो भवेदिति व्यक्तव्यम्। पाकस्थाल्युर्द्दया। आसन्नपाके पिप्पल्यादिचूर्णं प्रक्षेप्यं सुशीते च मधुप्रक्षेपणीयम्॥१८२॥

शर्क्करादिलौहे लौहं सर्वचूर्णसमम्॥ १८३॥

---

* त्रिकत्रययुतं त्रिकटुत्रिफलात्रिमदयुक्तमित्यर्थः।

लौहाच्चतुर्गुणं चीरमाज्यं द्विगुणमुत्तमम् ।
चूर्णं पादन्तु वैडङ्गं दद्यान्मधु सिते समे ॥
ताम्रपात्रे दृढ़े पक्वा स्थापयेत् घृतभाजने ।
माषकादिक्रमेणैव भक्षयेद्विधिपूर्वकम् ॥
अनुपानं प्रयुञ्जीत नारिकेलोदकादिकम् ।
रक्तपित्तं जयेत्तीव्रमम्लपित्तक्षतक्षयम् ॥
प्रहृष्टकान्तिजननमायुष्यमुत्तमोत्तमम् ।

समशर्करलौहम् ॥ १८४ ॥

सूतं वा मूर्च्छितं सूतं कार्पासकुसुमद्रवैः ।
मर्द्दयेद्दिनमेकन्तु तेन पूर्य्या वराटिका ॥
निरुध्यचान्धमूषायां भाण्डे रुद्ध्वा पुटे पचेत् ।
उद्धृत्य चूर्णयेत् श्लक्ष्णं मरिचैर्द्विगुणैः सह ।
गुञ्जामात्रं घृतेनैव भक्षयेत् प्रातरुत्थितः ।
उडुम्बरं घृतञ्चैव अनुपानं प्रयोजयेत् ॥
कपर्द्दको रसोनाम रक्तपित्तविनाशनः ।

कपर्द्दकोरसः ॥ १८५ ॥

नीलोत्पलसिताक्षौद्रसंयुक्तं पद्मकेशरम् ।
तण्डुलोदकपानेन रक्तपित्तं नियच्छति ॥

इति रक्तपित्तचिकित्सा ।

समशर्करलौहे मधुसिते चेति प्रतेयकं लौहसमम् । मृद्वया पाके-जाते लौहात् पादिकं विड़ङ्गनिकरचूर्णं प्रक्षेप्यं, शीते मधु-देयम् ॥ १८४ ॥

कपर्द्दकरसे तेन पूर्य्यावराटिकेति तेनौषधेन वराटिकापूरणीया ॥ १८५ ॥

अथ यक्ष्माधिकारः॥

रास्नाश्वगन्धाकर्पूरभेकपर्णी शिलाह्वयैः।
त्रिकत्रयसमायुक्तं लौहं यक्ष्मान्तकृन्मतम्॥
सर्वोपद्रवसंयुक्तमपि वैद्यविवर्जितम्।
हन्ति कासं स्वराघातं राजयक्ष्म क्षतक्षयम्॥
बलवर्णाग्निपुष्टीनां वर्द्धनं दोषनाशनम्।

रास्नादिलौहम्॥ १८६॥

रसभस्मत्रयो भागा भागैकं हेमभस्मकम्।
मृततारस्य भागैकं शिलगन्धकतालकम्॥
प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत्।
वराटिका तेन पूर्य्या क्षाजाक्षीरेण टङ्कणम्॥
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तां निरोधयेत्।
शुष्कं गजपुटे पाच्यं चूर्णयेत् स्वाङ्गशीतलम्॥
दशपिप्पलिकैः क्षौद्रैर्मरिचैर्वा घृतान्वितैः।
गुञ्जाचतुष्टयञ्चास्य क्षयरोगप्रशान्तये॥
सघृतैर्द्दीपमेहाथ वातश्लेष्मभवे क्षये।
रसोराजमृगाङ्कोयं नानारोगनिसूदनः।

राजमृगाङ्कोरसः।

स्याद्रसेन समं हेममौक्तिकं द्विगुणं भवेत्।
गन्धकञ्च समं तेन रसतुल्यन्तु टङ्कणम्॥

यक्ष्मरूपेषु पित्तातुरक्तस्य क्षागम इति रक्तपित्तानन्तरं राजयक्ष्मचिकित्सितमुच्यते। रास्नादिलौहे भेकपर्णी थानकुनी, शिला शिलाजतु, मनःशिलेति केचित्। रास्नादीनां चूर्णसमं लौहम्॥ १८६॥

तत्सर्वं गोलकं कृत्वा काञ्जिकेन च पेषयेत्।
भाण्डे लवणपूर्णेऽथ पचेद्यामचतुष्टयम्॥
मृगाङ्कसंज्ञको ह्येषो राजयक्ष्मनिकृन्तनः।
गुञ्जाचतुष्टयञ्चास्य मरिचैः सह भक्षयेत्॥
पिप्पलीदशकैर्व्वापि मधुना सह लेहयेत्।
पथ्यन्तु लघुभिर्मांसैः प्रयोगेऽस्मिन् प्रयोजयेत्।
व्यञ्जनैर्घृतपक्वैश्च संस्कृतैर्ह्यविदाहिभिः।
वृन्ताकबिल्वतैलानि कारवेल्लञ्च वर्जयेत्।
स्त्रियं परिहरेद्दूरं कोपञ्चापि विवर्जयेत्। मृगाङ्कः॥
रसं वज्रं हेम तारं नागं लौहञ्च ताम्रकम्॥
तुल्यांशं मरिचं देयं मुक्ताविद्रुम माक्षिकम्।
शङ्खं तुत्थञ्च तुल्यांशं सप्ताहं चित्रकद्रवैः॥
मर्द्दयित्वा विचूर्ण्याथ तेन पूर्य्या वराटिका।
टङ्कणं रविदुग्धेन मुखं लिप्त्वा निरोधयेत्॥
मृद्भाण्डे तां निरुध्याथ सम्यग्गजपुटे पचेत्।
आदाय चूर्णयेत्सर्वं निर्गुण्ड्या सप्तभावयेत्।
आर्द्रकस्य रसैः सप्त चित्रकस्य च विंशतिः॥
द्रवैर्भाव्यं ततश्चास्य देयं गुञ्जा चतुष्टयम्।
क्षयरोगं निहन्त्याशु साध्यासाध्यं न संशयः॥
योजयेत् पिप्पली क्षौद्रैः सघृतैर्मरिचैस्तथा।
महारोगाष्टके कासे श्वासे चैवातिसारके॥ *

---

* वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दाराः। अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः।

पोट्टलीरत्नगर्भोयं सर्वरोगकुलान्तकः।

रत्नगर्भपोट्टलीरसः॥ १८७॥

भस्मसूतात् चतुर्थांशं मृतस्वर्णं प्रदापयेत्।
द्विगुणं गन्धकं दत्वा मर्द्दयेत् चित्रकाम्बुना॥
पूर्य्या वराटिका तेन टङ्कणेन निरुध्य च।
भाण्डे चूर्णप्रलिप्तेऽथ क्षिप्ता रुद्धा च मृण्मये॥
शोषयित्वा गजपुटे पुटेत्तु चापराह्निके।
स्वाङ्गशीतं समुद्धृत्य चूर्णयित्वा तु विन्यसेत्॥
एष लोकेश्वरोनाम वीर्य्यपुष्टिविवर्द्धनः।
गुञ्जाचतुष्टयञ्चास्य पिप्पलीमधुसंयुतम्॥
मरिचैर्घृतयुक्तैश्च भक्षयेद्दिवसत्रयम्।
अङ्गकार्श्येऽग्निमान्द्ये च कासे पित्तचयेपि च॥
लवणं वर्जयेत्तत्र साज्यं दधि च योजयेत्।
एकविंशदिनं यावत् सघृतं मरिचं पिबेत्॥
पथ्यं मृगाङ्कवद्देयं शयितोत्तानपादतः।
ये शुष्काविषमाशनैः क्षयरुजाव्याप्ताश्चयेऽशीलया॥
पाण्डुत्वेन हताश्च वैद्यविधिना ये स्वाधीना दुर्भगाः।
ये तप्ता विविधैर्ज्वरैः श्रमसदोन्मादैः प्रमादं गताः॥

रत्नगर्भपोट्टलिकायां वज्रं हीरकं तदभावे वैक्रान्तं, नाग सीसकम्। तुल्यांशं मरिचमिति मरिचचूर्णमेकभागसमम्। आदाय चूर्णयेत् सर्वमिति वराटिकयासहैव॥ १८७॥

ते सर्वे विगतामया हतरुजाः स्युः पोट्टलीसेवनात्।

लोकेश्वरपोट्टलीरसः॥ १८८॥

रसस्य तुल्यभागेन हेमभस्म प्रयोजयेत्।
मनःशिला गन्धकञ्च तुल्यं माक्षिकतालकम्॥
विषं टङ्गणकं सर्वं रसतुल्यं प्रदापयेत्।
मर्द्दयेत्सर्वमेकत्र खल्लपात्रे च निर्म्मले॥
जयन्ती भृङ्गराजोत्थैः पाठाया वासकस्य च।
अगस्तिलाङ्गलाम्नीनां स्वरसैश्च पृथक् पृथक्॥
भावयित्वा विशोष्याथ पुनश्चार्द्रकवारिणा।
सप्तधा भावयित्वा च रसः कनकसुन्दरः॥
गुञ्जाद्वयं त्रयं वास्य राजयक्ष्मप्रशान्तये।
मधुना पिप्पलीभिर्वा मरिचैर्वा घृतान्वितम्॥
सन्निपाते प्रदातव्य मार्द्रकस्य रसेन वै।
जयपालरजोभिर्वा गुल्मिने शूलरोगिणे॥
अम्लवर्ज्यं चरेत्पथ्यं बल्यं हृद्यं रसायनम्।
वर्ज्जयेल्लवणं हिङ्गु तक्रं दधिविदाहि यत्॥

कनकसुन्दरीरसः॥ १८९॥

रसभस्मत्रयोभागा भागैकं हेमभस्मकम्।
मृतताम्रस्य भागैकं तोलैकं गन्धकस्य च॥
मर्द्दयेच्चित्रकद्रावैर्दिनयामान्ते समुद्धरेत्

लोकेश्वरपोट्टलिकायां द्विगुणं गन्धकमिति रसात् द्विगुणं गन्धकमित्यर्थः॥ १८८॥

कनकसुन्दररसे द्व्यंशभागेन चतुर्थभागेन क्रमाद्विस्तिकः॥ १८९॥

पूर्य्या वराटिका तेन टङ्कणेन विलेपयेत्॥
वराटीं पूरयेद्भाण्डे रुद्धा गजपुटे पचेत्।
विचूर्णयेत् स्वाङ्गशीते पोट्टलीं हेमगर्भिकाम्॥
मृगाङ्कवत् चतुर्गुञ्जाभक्षणाद्राजयक्ष्मनुत्।

हेमगर्भपोट्टली॥

रसं गन्धञ्च तुल्यांशं द्वौ भागौ टङ्कणस्य च।
मौक्तिकं विद्रुमं शङ्खभस्मदेयं समांशिकम्॥
हेमभस्मार्द्धभागञ्च सर्वं खल्ले विमर्द्दयेत्।
निम्बुद्रवेण संपिष्य पिण्डिकां कारयेत्ततः॥
पश्चाद्गजपुटं दत्वा सुशीतञ्च समुद्धरेत्।
हेमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धं दरदं नतम्॥
एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत्।
ततः पूजां प्रकुर्वीत रसस्य दिवसे शुभे॥
सर्वाङ्गसुन्दरोह्येष राजयक्ष्मनिकृन्तनः।
वातपित्तज्वरे घोरे सन्निपाते सुदारुणे॥
अर्शांसि ग्रहणीदोषे मेहे गुल्मे भगन्दरे।
निहन्ति वातजान् रोगान् श्लैष्मिकांश्च विशेषतः॥
पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा।
भक्षयेत् पर्णखण्डेन सितया चार्द्रकेण वा॥

सर्वाङ्गसुन्दरोरसः॥ १८०॥

सर्वाङ्गसुन्दररसे रसगन्धं सर्वतुल्यं मौक्तिकादीनि स्वर्णार्द्धभागानि॥ १८०॥

पलं कपर्दचूर्णस्य पलं पारदगन्धयोः ।
माषञ्च टङ्गणस्यैव जम्बीराद्भिर्विमर्द्दयेत् ॥
पुटेल्लोकेश्वरो नाम्ना लोकनाथरसोत्तमः ।
हन्ति कुष्ठं रक्तपित्तमन्यान् रोगान् बलाद्द जयेत् ॥
पुष्टिवीर्य्यप्रसादौजःकान्तिलावण्यदःपरः ।
कोऽस्तिलोकेश्वराद्न्यो नृणां मन्मुखोद्गतः ॥
पथ्यं शाल्योदनं सर्पिर्द्दधिशाकं सहिङ्गुकम् ।
नित्यं यामद्वयादूर्द्ध्वं कार्य्यं वारत्रयं दिवा ॥
त्र्यहाद्गुचौवावान्ते वा लग्नः सूतो न चेत् पुनः ।
अष्टमेऽह्नि प्रदातव्यः पूर्ववत् कार्य्यसिद्धये ॥
प्रथमे सप्तमे देया लावशूरणमुद्गकाः ।
द्वितीये माषगोधूमं भक्ष्यं पूर्वोदितञ्च यत् ॥
देयानि मत्स्यमांसानि तृतीये मर्द्दनादिकम् ।
तैलबिल्वारणालानि कोपस्त्री स्वप्नजागरान् ॥
त्यजेत् कादीनि द्रव्यानि हृद्यं स्वादु च शीलयेत् ।
वायौ सेव्यं पयःकोष्णं पित्ते तु ससितं हितम् ॥
मन्दाग्नौ चोरबीजानि तिलेचु कदलीफलम् ।
खर्ज्जूरं मांसमृद्विका सितादिसकलं भजेत् ॥
वीर्य्यच्युतौ नारिकेलजलं तालफलानि च ।
आनाहारुचिमूर्च्छार्त्तिधूमोद्गारविसूचिकाः ॥
एतेषु लघुशाल्यन्नं केवलं सघृतं हितम् ।
अतिवान्तौ पिबेच्छिन्नारसं चौद्रेण संयुतम् ।
सचौद्रं वासकं रक्तपित्तेऽरुचिविपर्य्यये ॥
भृष्टधान्यं सितायुक्तमथवा चौद्रसंयुतम् ।

यवान्नं मधुसंयुक्तं पिवेद्वा माहिषं दधि॥
घृतान्नं भक्षयेन्नित्यं सुखोष्णेन च वारिणा।
छिन्नाम्बुसहितं देयं दाहे जीर्णं सुधाजलम्॥
आर्द्रकं सर्षपं रम्भाफलं भृङ्गं कफोल्बने।
अनेऽप्युपद्रवायेस्युस्तत्तच्छान्त्यै यथौषधम्।
द्वात्रिंशत्‌दिवसे कार्य्यं स्नानमामलकैस्तिलैः।
युक्तं सेव्यं वले जाते शनैरग्निवलादनु।

लोकेश्वरोरसः।

रसभस्महेमभस्मतुल्यं गुञ्जाद्वयं भजेत्।
दोषं वुद्धानुपानेनमृगाङ्कोयं चयापहः॥ स्वल्पमृगाङ्कः।
काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम्।
विद्रुमञ्चाभया तारं कस्तूरी च मनःशिला।
प्रत्येकं विन्दुमात्रन्तु सर्वं संमर्द्य यत्नतः।
वारिणा वटिका कार्य्या द्विगुञ्जाफलमानतः॥
अनुपानं प्रयोक्तव्यं यथादोषानुसारतः।
चयं हन्ति तथा कासं श्लेषपित्तसमुद्भवम्।
प्रमेहं विविधञ्चैव दोषत्रयसमुत्थितम्।
कफजान् वातजान् रोगान् नाशयेत सद्य एव हि।
वलवृद्धिं वीर्य्यवृद्धिं लिङ्गदार्ढ्यं करोति च॥
श्रीकरः पुष्टिजननः नानारोगनिसूदनः।
गहनानन्दनाथोक्तो रसोयं काञ्चनाभ्रकः।

काञ्चनाभ्ररसः॥ १९१॥

काञ्चनाभ्ररसे विन्दुमात्रं कर्षपरिमितमित्यर्थः॥ १९१॥

काञ्चनं रससिन्दूरं मौक्तिकं लौहमभ्रकम्।
विद्रुमं मृतवैक्रान्तं तारं ताम्रञ्च वङ्गकम्॥
कस्तूरिका लवङ्गञ्च जातीकोषैलवालुकम्।
प्रत्येकं बिन्दुमात्रञ्च सर्वं मर्द्द्यं प्रयत्नतः॥
कन्याक्षीरेण संमर्द्द्य केशराजरसेन च।
अजाक्षीरेण संभाव्यं प्रत्येकं दिवसत्रयम्॥
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक्।
अनुपानं प्रयोक्तव्यं यथा दोषानुसारतः॥
क्षयं हन्ति तथा कासं यक्ष्माणं श्वासमेव च।
प्रमेहान् विंशतिञ्चैव दोषत्रयसमुद्भवान्॥
सर्वरोगं निहन्त्याशु भास्करस्तिमिरं यथा।

बृहत्काञ्चनाभ्ररसः॥

शिलाजतु मधुव्योष ताप्यं लौहरजस्तथा।
क्षीरेण लोहितस्याशु क्षयं क्षयमवाप्नुयात्॥

शिलाजत्वादिलौहम्॥ १८२॥

हेमभस्मरसभस्मगन्धकं मौक्तिकन्तु रसटङ्कणन्तथा।
तारकं गरुड़ं सर्वतुल्यकं काञ्जिकेन परिमर्द्द्य गोलकम्॥
मृत्स्नया च परिवेष्ट्य शोषितं भाण्डके लवणगर्भपाचयेत्।
एकरात्रं मृदुसंपुटेन वा सिद्धिमिति कुमुदेश्वरोरसः॥

शिलाजत्वादिलौहे मधुयष्टिमधु, ताप्यं स्वर्णमाक्षिकम्। लौहं सर्वचूर्णसमम्॥ १८२॥

वङ्गमस्य मरिचैर्घृताप्लुतै राजयक्ष्मपरिशान्तये पिबेत् ॥

कुमुदेश्वरो रसः ॥ १८३ ॥

त्रिकटुत्रिफलैलाभिर्जातिफललवङ्गकैः ।
नवभागोन्मितैस्तुल्यं लौहपारदसिन्दूरम् ॥
मधुना क्षयरोगांश्च हन्त्ययं यक्ष्मकेशरी ।

क्षयकेशरी रसः ॥

रसगन्धकयोर्ग्राह्यं कर्षमेकं सुशोधितम् ।
अभ्रं निश्चन्द्रकं दद्यात् पलार्द्धञ्च विचक्षणः ॥
कर्पूरं शाणकं दद्यात् स्वर्णं तोलकसम्मितम् ।
ताम्रञ्च तोलकं दद्याद्विशुद्धं मारितं भिषक् ॥
लौहं कर्षं क्षिपेत्तत्र वृद्धदारकजीरकम् ।
विदारीशतमूली च तुरकञ्च बला तथा ॥
मर्कट्यतिबलाचैव जातीकोषफले तथा ।
लवङ्गं विजयाबीजं श्वेतखर्जरसन्तथा ॥
शाणभागं समादाय चैकीकृत्य प्रयत्नतः ।
मधुना मर्दयेत्तावद्यावदेकत्वमागतम् ॥
चतुर्गुञ्जाप्रमाणेन वटिकां कुरु यत्नतः ।
भक्षयेद्वटिकामेकां पिप्पली मधुना सह ॥

वृहच्चन्द्रामृतो रसः ॥ १८४ ॥

कुमुदेश्वरे तारकमित्यत्र तालकमिति केचित् पठन्ति तारकं रौप्यं गरुड़ं स्वर्णमाक्षिकम् ॥ १८३ ॥

वृहच्चन्द्रामृतरसे तुरकं कोकिलाक्षबीजं मर्कटी शूकशिम्बी श्वेतखर्ज्जरसं श्वेतधूनकम् ॥ १८४ ॥

निरुत्थभस्मसौवर्णं द्विगुणं भस्मसूतकम्।
द्विगुणं भस्मसुक्तोत्थं शुकपुच्छं चतुर्गुणम्॥
मृततास्रञ्च पञ्चांशं तारभस्मचतुर्गुणम्।
समभागं प्रवालञ्च रसतुल्यञ्च टङ्कणम्॥
सर्वमेकत्र संमर्द्य त्रिदिनं लुङ्गवारिणा।
ततश्च गोलकं कृत्वा शोषयित्वा खरातपे॥
लवणैः पात्रमापूर्य्य तन्मध्ये गोलकं क्षिपेत्।
तन्मुखन्तु मृदारुद्ध्वा पचेत् यामचतुष्टयम्॥
आकृष्य चूर्णयेच्छुद्धं चतुःषष्टिविभागतः।
वज्रं वा तदभावे तु वैक्रान्तं षोड़शांशिकम्॥

महामृगाङ्कः खलु एष सिद्धः।
श्रीनन्दिनाथप्रकटीकृतोयम्॥
वल्लोस्य सेव्यो मरिचाज्ययुक्तः।
सेव्योथ वा पिप्पलिकासमेतः॥

सर्वोपचाराः कर्त्तव्याः सर्वेंक्षयगदोदिताः।
बल्यं हृद्यञ्च भोक्तव्य त्यजेत् सूतविरोधि यत्॥
यक्ष्माणं वहुरूपिनं ज्वरगदं गुल्मं तथा विद्रधिम्।
मन्दाग्निं स्वरभेदकासमरुचिं कान्तिञ्च मूर्च्छां भ्रमिम्॥
अष्टावेवमहागदान् गरगदान् पाण्डुामयान् कामलान्।
पित्तोत्थांश्च समयकान् वहुविधानन्यांस्तथा नाशयेत्॥

महामृगाङ्कोरसः। १९५॥

महामृगाङ्के द्विगुणं भस्मसूतकमिति स्वर्णापेक्षया द्विगुणं रस-सिन्दूरमित्यर्थः। शुकपुच्छं गन्धकम्। चतुःषष्टिविभागत इति

मृतमभ्रं मृतं सूतं मृतं लौहञ्च ताम्रकम् ।
मृतं नागञ्च कांस्यञ्च मण्डूरं विमलं मृतम् ॥
वङ्गं खर्परकं तालं शङ्खटङ्कणमाक्षिकम् ।
मृतं स्वर्णं मृतं कान्तं वैक्रान्तं विद्रुमौक्तिकम् ॥
वराटं मणिरागञ्च राजपट्टञ्च गन्धकम् ।
सर्वमेकत्रसंचूर्ण्य खल्लमध्ये विनिःक्षिपेत् ॥
मर्द्दयेत्त्वग्निभानुभ्यां प्रपुटेत्त्रिदिनं लघु ।
भावयेत्पुटयेदेभिर्वारांस्त्रिंश पृथक् पृथक् ॥
मातुलुङ्गवरावह्निस्वम्लवेतसमार्कवैः ।
इयमारार्द्रकरसैः पाचितो लघुवह्निना ॥
वातपित्तकफोत्क्लेयान् ज्वरान् संमर्द्दितानपि ।
सन्निपातं निहन्त्याशु सर्वाङ्गैकाङ्गमारुतान् ॥
सेवितश्च सितायुक्तो मागधीरजसायुतः ।
मधुकार्द्रकसंयुक्तस्तद्व्याधिहरणौषधैः ।
सेवितो हन्ति रोगौघां व्याधिवारणकेशरी ।
क्षयमेकादशविधं शोषं पाण्डुं क्रिमिं जयेत् ॥
कासं पञ्चविधं श्वासं मेहमेदो महोदरम् ।
अश्मरीं शर्करां शूलं प्लीहगुल्मं हलीमकम् ॥
सर्वव्याधिहरो बल्यो वृष्यो मेध्यः रसायनः ।
क्षयकेशरी ॥ १९६ ॥

पुटदानानन्तरं सर्वचूर्णाच्चतुःषष्टिविभागतः वज्रं देयं वज्राभावे षोड़शांशं वैक्रान्तं प्रदातव्यम् ॥ १९५ ॥

क्षयकेशरिकायां मृतं सूतं रससिन्दूरं, रविताम्रं, शिवा शिवा-

चन्दनं मधुकं चीरं पीतं रुधिरवान्तिजित् ।
भृङ्गराजस्य पत्रन्तु चूर्णितं मधुना सह ॥
गोलकं धारयेदास्ये कासारिष्टप्रशान्तये ।
पिवेद्वान्तिप्रशान्त्यर्थं चोद्रैश्छिन्नारुहारसम् ॥

भस्मीभूतं रजतममलं तत्समं व्योमचूर्णम् ।
सर्व्वैस्तुल्यं त्रिकटुसवरं सर्व्वमाज्येन युक्तम् ॥
लीढ़ं प्रातःच्चपयतितरां यक्ष्मपाण्डूदरार्शः ।
श्वासं कासं नयनजरुजः पित्तरोगानशेषान् ।
रजतादिलौहम् ॥ १९७ ॥

इति राजयक्ष्माधिकारः ।

अथ कासचिकित्सा ।

कर्षं शुद्धरसेन्द्रस्य गन्धकस्याभ्रकस्य च ।
ताम्रस्य हरितालस्य लौहस्य च विषस्य च ॥
मनःशिलायाः चाराणां वीजस्य धुस्तूरस्य च ॥
मरिचस्य च सर्व्वेषां समं चूर्णं प्रकल्पयेत् ।

अत्र, मनःशिलेति भट्टः । राजपट्टं कान्तपाषाणं तदभावे गोदन्ता । अग्निभानुभ्यामिति चित्रकार्काभ्याम् । मार्कवं भृङ्गराजं हयमारं करवीरम् । अभ्रादिसर्व्वं चित्रकार्करसैर्भावयेत् । ततः मृदुवह्निना त्रिदिनं पुटेत् एवं वारत्रयं कुर्य्यात् तत उद्धृत्य लौहपात्रे कृत्वा मातुलुङ्गादिरसैर्लघुवह्निना भावयेत् ॥ १९६ ॥

रजतादिलौहे यमलं मलरहितम् । सवरमिति त्रिफलासहितं सारं नवनीतकम् ॥ १९७ ॥

जयन्ती चित्रकं मानं खण्डकर्णौथमण्डुकी ॥
शक्राशनं भृङ्गराजं केशराजार्द्र सिन्धुकम् ।
एतेषां स्वरसेनापि कर्षमात्रेण मर्द्दयेत् ॥
कलायपरिमाणान्तु वटिकां कारयेद्भिषक् ।
आर्द्रकस्वरसेनैव पञ्चकासं व्यपोहति ॥
हन्ति कासं तथा श्वासं यक्ष्माणं सभगन्दरम् ।
अग्निमान्द्यारुचिं शोथमुदरं पाण्डुकामलम् ॥
रसायनी च वृष्या च बलवर्णप्रसादिनी ।

बृहद्रसेन्द्रगुड़िका ॥ १९८ ॥

पारदं गन्धकं शुद्धं मृतलौहञ्च टङ्कणम् ।
रास्नाविड़ङ्गत्रिफला देवदारु च चित्रकम् ॥
अमृता पद्मकं क्षौद्रं विषञ्चैव विमर्द्दयेत् ।
द्विगुञ्जं वातकासार्त्तः सेवयेदमृतार्णवम् ॥

अमृतार्णवो रसः ॥ १९९ ॥

भस्म ताम्राभ्रकान्तानां कासमर्द्दत्वचोरसैः ।
मणिजैर्वेतसाम्लैश्च दिनं मर्द्दं सुपिण्डितम् ॥
निष्कार्द्धं पित्तकासार्त्तो भक्षयेच्च दिनत्रयम् ।

यक्ष्मरूपेषु कासपाठात् कासापेक्षया च यक्ष्मासम्भवात् यक्ष्मानन्तरं कासचिकित्सामाह। बृहद्रसेन्द्रगुड़िकायां रसादिमनःशिलान्तानां त्रयोदशद्रव्याणां प्रत्येकं कर्षमात्रम्। खण्डकर्णः श्वारकोण इति ख्यातः, मण्डूकपर्णी थानकुनी। जयन्त्यादीनां स्वरसः पृथक् कर्षपरिमितः ॥ १९८ ॥

अमृतार्णवे अमृता गुडूची पद्मकं पद्मकाष्ठम् ॥ १९९ ॥

कासश्वासाग्निमान्द्यञ्च क्षयञ्चापि निहन्त्यलम् ॥

पित्तकासान्तको रस ॥ २०० ॥

रसगन्धकताम्राभ्रशङ्खटङ्कणलोहकम्।
मरिचं कुष्ठतालीशं जातीफललवङ्गकम् ॥
कार्षिकं चूर्णमादाय दण्डे नामर्द्दं भावयेत्।
भेकपर्णीकेशराज निर्गुण्डी काकमाचिका ॥
द्रोणपुष्पी शालपर्णी श्रीमसुन्दरकं तथा।
भार्गी हरीतकी वासा कार्षिकैः पत्रजैरसैः ॥
वटिकां कारयेद्वैद्यः पञ्चगुञ्जाप्रमाणतः।
वातजं पैत्तिकं कासं श्लैष्मिकं चिरजन्तथा ॥
श्रीमद्गहननाथेन काससंहारभैरवः।
रसोयं निर्मितो यत्नाल्लोकरक्षणहेतवे ॥
वासा शुण्ठी कण्टकारी क्काथेन पाययेद्बुधः।
कासं नानाविधं हन्ति श्वासमुग्रमरोचकम् ॥
बलवर्णकरःश्रीदः पुष्टिदः कान्तिवर्द्धनः।

काससंहारभैरवः ॥ २०१ ॥

शुद्धसूतं सतालञ्च तालार्द्धं रसखर्परम्।
वङ्गं ताम्रं घनं कान्तं कांस्यं गन्धं पलं पलम् ॥
केशराजरसेनैव भावयेद्दिवसत्रयम्।
कुलत्थस्य रसेनैव भावयेच्च पुनः पुनः ॥

पित्तकासान्तकरसे कासमर्द्दो कालकासन्दा इति ख्याता। मणिजैर्वकपुष्पैः ॥ २०० ॥

कासंसंहारभैरवे भेकपर्णी थानकुनी भेकपर्ण्यादीनां स्वरसः प्रत्येकं कर्षपरिमित द्रव्यः ॥ २०१ ॥

एलाजातीफलाख्यञ्च तेजपत्रं लवङ्गकम् ।
यमानीजीरकञ्चैव त्रिकटू त्रिफलासमम् ॥
भावयेच्च रसेनैव गोलयेत् सर्वमौषधम् ।
छायाशुष्का वटी कार्य्या चणकप्रमिता शुभा ॥
शीताम्बुना पिवेद्धीमान् सर्वकासनिवृत्तये ॥
मत्स्यं मांसं तथा चीरं पथ्यं स्यात् स्निग्धभोजनम् ।
क्षयकासं तथा श्वासं सज्वरं वायविज्वरम् ॥
हलीमकं पाण्डुरोगं शोथं शूलं प्रमेहकम् ।
अर्शोनाशं करोत्येव वलवृद्धिञ्च कारयेत् ॥
वर्जयेच्छाकमम्लञ्च भ्रष्टद्रव्यं हुताशनम् ।

लक्ष्मीविलासोरसः ॥ २०२ ॥

रसगन्धकयोश्चूर्णमेकीकृत्याभ्रकन्तथा ।
हेमभिश्च समं कृत्वा मर्द्दयेद्यामकद्वयम् ॥
त्र्यूषणानि लवङ्गैला टङ्गणं हेमतुल्यकम् ।
कण्टकार्य्या रसैर्भाव्यमेकविंशतिवारकम् ॥
शिग्रुवीजार्द्रकरसैः सप्तधा भावयेत् पृथक् ।
रसः सर्वेश्वरोनाम कासश्वासक्षयापहः ॥
अनुपानं प्रयोक्तव्यं विभीतकफलत्वचम् ।

सर्वेश्वरोरसः ॥

शुद्धं कृष्णाभ्रचूर्णं द्विपलपरिमितं शाणमात्रं यदन्यत्

लक्ष्मीविलासरसे रसखर्परं खर्परमेव ॥ २०२ ॥
टङ्कारामे जलं वालकं इभकणा गजपिप्पली । क्षितितलविधि

कर्पूरं जातीकोषं सजलमिभकणातेजपत्रं लवङ्गम्।
मांसी तालीशचोचे गजकुसुमगदं धातकीचेति तुल्यम्॥
पथ्या धात्रीविभीतं त्रिकटुरथ पृथगर्द्धभागं द्विभागम्।
एलाजातीफलाख्यं चितितलविधिना

शुद्धगन्धाश्मकोलम्॥

कोलार्द्धं पारदस्य प्रतिपदविहितं सर्वमेकत्रमिश्रम्।
पानीयेनैवकार्य्याः परिणतचणकस्विन्नतुल्याश्च वटाः॥
प्रातःखाद्यास्ततस्तदनु च कियत् शृङ्गवेरं सपर्णम्।
पानीयं पीतमन्ते ध्रुवमपहरति क्षिप्रमेतान् विकारान्॥
कोष्ठे दुष्टाग्निजातान् ज्वरमुदररुजो राजयक्ष्मचयश्च।
कासं श्वासं सशोथं नयनपरिभवं मेहमेदोविकारान्॥
छर्दिं शूलाम्लपित्तं तृषामपि महतीं गुल्मजालं विशालम्।
पाण्डुत्वं रक्तपित्तं गरलभवगदान् पीनसं प्लीहरोगान्॥
हन्यादामाशयोत्थान् कफपवनकृतान् पित्तरोगानशेषान्।
वल्यो वृष्यश्च योगस्तरुणतरकरः सर्वरोगे प्रशस्तः।
पथ्यं मांसैश्च यूषैर्घृतपरिलुलितैर्गव्यदुग्धैश्च भूयः।
भोज्यं योज्यं यथेष्टं ललितललनयादीयमानं मुदायत्॥
शृङ्गाराभ्रेण कामी युवतिजनशताभोगयोगादतुष्टः।
वर्ज्यं शाकाम्लमादौ दिनकतिपयचित् स्वेच्छाया भोज्यमन्यत्॥
दीर्घायुः काममूर्त्तिर्गतवलिपलितोमानवोऽस्य प्रसादात्।

शृङ्गाराभ्रम्॥ २०२॥

जीर्णं सुवर्णं लौहं वा यद्यत्रैव प्रदीयते।

लौहेति पातालयन्त्रे च। लौहं तोलकम्॥ २०३॥

तदायं सर्वरोगाणां सार्वभौमः न संशयः॥

सार्वभौमः। २०४॥

कर्षद्वयं रसेन्द्रस्य शुद्धस्य गन्धकस्य च।
कज्जलीकृत्य यत्नेन शिलातलशुभे दृढ़े॥
विल्वाग्निमन्थः श्योनाकः काश्मरीपाटला वला।
मुस्तं पुनर्णवा धात्री वृहती वृषपत्रकम्॥
विदारी शतमूली च कर्षैरेषां पृथग्रसैः
मर्द्दयित्वा पुनर्वासास्वरसैर्द्दशतोलकैः॥
मर्द्दयेत्तत्र शुद्धाभ्रं रसस्य द्विगुणं क्षिपेत्।
रसस्यार्द्धञ्च कर्पूरं तत्रैव दापयेद्भिषक्॥
जातीकोषफले मांसी तालीशैलालवङ्गकम्।
चूर्णं कृत्वा प्रयत्नेन माषमात्रं क्षिपेत् पृथक्॥
विदारीस्वरसेनैव वटिकां कारयेद्भिषक्।
राजयक्ष्माण मत्युग्रं क्षयक्षीणमुरक्षतम्॥
कासं पञ्चविधं श्वासं स्वराघातमरोचकम्।
कामलां पाण्डुरोगञ्च प्लीहानं सहलीमकम्॥
जीर्णज्वरं तृषां गुल्मं ग्रहणीमामसम्भवाम्।
अतीसारञ्च शोथञ्च कुष्ठानि च भगन्दरम्॥
नाशयेदेषविख्यातस्तरुणानन्दसंज्ञितः।
रसायनवरोवृष्यश्चक्षुष्यः पुष्टिवर्द्धनः॥
सहस्रं यातिनारीणां भक्षणादस्य मानवः।

सार्वभौमरसमाह जीर्णमित्यादि अत्र श्लङ्गाराभ्रं यदि स्वर्णं
वौद्दं वा प्रदीयते तदायं सार्वभौमः॥ २०४॥

क्षीणता न च शुक्रस्य न च वुद्धिवलक्षयम् ॥
हिमाषसुपयोगेन निहन्ति कामलान् गदान्।
शुक्रसन्दीपनं कृत्वा ज्वरं हन्ति न संशयः ॥
नारिकेलजलेनैव भक्ष्योऽयञ्च रसायनः।
क्षीरानुपानाद्दृष्योऽयं न क्वचित् प्रतिहन्यते ॥

तरुणानन्दरसः ॥ १०५ ॥

सूतकं गन्धकं लौहं विषञ्चैव वराङ्गकम्।
ताम्रकं वङ्गभस्मापि व्योमकञ्च समांशकम् ॥
त्रिकटुभद्रमुस्तञ्च विड़ङ्गं नागकेशरम्।
रेणुकामलकञ्चैव पिप्पलीमूलमेव च ॥
एषाञ्च द्विगुणं भागं मर्द्दयित्वा प्रयत्नतः।
भावना तत्र दातव्या गजपिप्पलीकाम्बुभिः ॥
चणमात्रा वटीकार्य्या संग्रहग्रहणीहिता।
कासं हन्ति तथा श्वासमर्शांसि च भगन्दरम् ॥
हृच्छूलं पार्श्वशूलञ्च कर्णरोगं कपालिकाम्।
हरेत्संग्रहणीरोगानष्टौ च जठराणि च ॥
प्रमेहान् विंशतिञ्चैव चतुर्विधमजीर्णकम्।
न चान्नपाने परिहार्य्यमस्ति न शीतवातातपमैथुनेषु।
यथेष्टचेष्टाभिरतः प्रयोगी नरो भवेत् काञ्चनराशिगौरः।

महोदधिरसः ॥ २०६ ॥

तरुणानन्दरसे गन्धकस्य कर्षद्वयं विल्वादीनां स्वरसः प्रत्येकं कर्षांशः ॥ २०५ ॥

महोदधिरसे वराङ्गं गुड़त्वक्। छतादिक्षोषान्तानां प्रत्येकं

सूतकं गन्धकं लौहं विषं वत्सकमेव च ।
विड़ङ्गं केशरं मुस्तमेलाग्रन्थिकरेणुकम् ॥
त्रिकटुत्रिफलाचित्रं शुद्धं जैपालवीजकम् ।
एतानि समभागानि द्विगुणो गुड़ उच्यते ॥
तिन्तिड़ीवीजमानेन प्रातःकाले च भक्षयेत् ।
कासं श्वासं क्षयं गुल्मं प्रमेहं विषमज्वरम् ॥
अजीर्णं ग्रहणीरोगं शूलं पाण्ड्वामयन्तथा ।
अपाने हृदये शूले वातरोगे गलग्रहे ॥
अरुचावतिसारे च सूतिकातङ्कपीड़िते ।
जयाख्या निर्म्मिता ह्येषा भक्षणीया सुरैरपि ॥

जयागुड़िका ॥ २०७ ॥

सूतकं गन्धकं लौहं विषं चित्रकपत्रकम् ।
विड़ङ्गरेणुकामुस्तमेलाकेशरग्रन्थिकम् ॥
फलत्रिकं त्रिकटुकं शुल्वभस्म तथैव च ।
एतानि समभागानि द्विगुणो दीयते गुड़ः ॥
कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे ।
सूतायां ग्रहणीरोगे शूले पाण्ड्वामये तथा ॥
हस्तपदादिदाहे च गुड़िकेयं प्रशस्यते ।

विजयगुड़िका ॥

रसमेकं द्विधा गन्धं गन्धतुल्यञ्च सैन्धवम् ।

कमेकभागसमम् । त्रिकट्वादीनां प्रत्येकमेक भागपेक्षया द्विगुणम् ।
गजपिप्पलिकाभिः गजपिप्पलीकाद्यैः ॥ २०६ ॥

जयागुड़िकायां वत्सकं कुटजं केशरं नागकेशरं ग्रन्थिकं पिप्पलीमूलम् ॥ २०७ ॥

ज्वालामुखीरसैः पञ्चदिनानि परिमर्द्दयेत् ॥
मूषकायां निरुध्याथ पुटेद्रात्रौ च मध्यमम्।
सर्वं भस्मयदा याति वल्लमेनं प्रयच्छति ॥
ग्रहण्यां संग्रहण्याञ्च कासे श्वासे विशेषतः।
उग्रासु ज्वरतन्द्रासु निद्राख्यासु योजयेत् ॥
अन्यरोगेषु तं दद्याद्रसं स्वच्छन्दभैरवम्।
तुष्टिं पुष्टिमसौ कुर्य्यात् सौकुमार्य्यञ्च कारयेत् ॥

स्वच्छन्दभैरवः ॥ २०८ ॥

रसभागो भवेदेको गन्धको द्विगुणो भवेत्।
त्रिभागा पिप्पली पथ्या चतुर्भागा विभीतकः ॥
पञ्चभागास्त्वामला च षड्गुणा सप्तभाविका।
भार्गी सर्वमिदं चूर्णं भाव्यं वव्वोलजैर्द्रवैः ॥
एकविंशतिवारञ्च मधुना गुड़िका कृता।
विभीतकप्रमाणेन प्रातरेकान्तु भक्षयेत् ॥
कासं श्वासं हरेत् क्षुद्रा क्वाथस्तदनुकृष्णाया।

रसगुड़िका ॥ २०९ ॥

माक्षिकञ्च शिखिग्रीवमभ्रकं तालकन्तथा।
एतांस्तु मिलितान् सर्वान् भावयेदार्द्रकद्रवैः ॥
रक्तिद्वयप्रमाणान्तु कल्पयेत् गुड़िकां भिषक्।

स्वच्छन्दभैरवे ज्वालामुखी भल्लातकम् ॥ २०८ ॥

रसगुड़िकायां त्वामला षड्गुणामथवा इत्यत्र वासाषड्गुणिता मता इति केचित् पठन्ति। वव्वोलं बाबदर इति ख्यातः क्षुपविशेषः।
विभीतक प्रमाणेन कर्षमात्रेण ॥ २०९ ॥

जीर्णान्ने भक्षयेदेकां क्षीरमांसरसाशनः॥
पञ्चकासं क्षयं श्वासं रक्तपित्तं विनाशयेत्।
पाण्डुं क्रिमिं ज्वरहरी कृशानां पुष्टिवर्द्धिनी॥
शुक्रवृद्धिकरीचैषा अम्लपित्तविनाशिनी।
वह्निसन्दीपनी श्रेष्ठा त्वरोचकविनाशिनी॥

रसेन्द्रगुड़िका॥

सूतकाद्द्विगुणं गन्धमेकधा कज्जलीकृतम्।
त्रिकटुत्रिफलाचूर्णं प्रत्येकं सूतसम्मितम्॥
अजाक्षीरेण संभाव्य वटिकां कारयेत्ततः।
आर्द्रकस्य रसैः सेव्या शीततोयं पिवेदनु।
कासश्वासप्रशमनी विशेषादग्निवर्द्धिनी॥
इयं यदि सदा सेव्या तदा स्याद्योगवाहिका।
वृद्धोऽपि तरुणः शक्तः स्त्रीशतेषु वृषायते॥

पुरन्दरवटी॥

सूतं गन्धं विषञ्चैव शालपर्णीं च धान्यकम्।
यावन्त्येतानि चूर्णानि तावन्मात्रं मरिचकम्॥
गुञ्जाचतुष्टयं खादेन्मधुना कासशान्तये :

कासान्तकोरसः॥

हिङ्गुलं मरिचं गन्धं सव्योषं टङ्कणन्तथा।
द्विगुञ्जमार्द्रकद्रावैः सन्निपातं सुदारुणम्।
कासं नानाविधं हन्ति शिररोगं विनाशयेत्।

कामकुठारः॥

त्रिकटुत्रिफलाधान्यं चव्यं जीरकसैन्धवम्।
दीप्यौषधिहृतस्यापि तत्तुल्यमयसोरजः॥

नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक्।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वा मृतेश्वरीम्।
एकैकां वटिकां खादेद्रक्तोत्पलरसाप्लुताम्॥
नीलोत्पलरसेनैव कुलत्थस्वरसेन च॥
निहन्ति विविधं कासं दोषत्रयसमुद्भवम्।
वातिकं पैत्तिकञ्चैव गरदोषसमुद्भवम्।
सरक्तमथनीरक्तं ज्वरं श्वाससमन्वितम्॥
भ्रमदाहहृच्छूलघ्नं रुच्यं वह्निप्रदीपनम्।
बलवर्णकरं वृष्यं जीर्णज्वरविनाशनम्॥
इदं चन्द्रामृतं लौहं चन्द्रनाथेन निर्मितम्।

श्रीचन्द्रामृतलौहम्॥ २१०॥

रसगन्धकलौहानां प्रत्येकं कार्षिकं क्षिपेत्।
टङ्गणस्य पलं दत्वा मरिचस्य पलार्द्धकम्॥
त्रिकटु त्रिफला चव्यं धान्यजीरकसैन्धवम्।
प्रत्येकं तोलकं ग्राह्यं छागीदुग्धेन पेषयेत्॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक्।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वा सुरेश्वरीम्॥
एकैकां वटिकां खादेद्रक्तोत्पलरसेन च।
नीलोत्पलरसेनापि कुलत्थस्वरसेन च॥
छागीक्षीरेण मुण्डेन केशराजरसेन च।
निहन्ति विविधं कासं वातरक्तसमुद्भवम्॥

चन्द्रामृतलौहे दीव्यौषधि हतस्यापि तत्तुल्यमयसो रज इति मनः-शिलाया हतस्य लौहचूर्णस्य सर्वचूर्णसमत्वं ज्ञेयम्॥ २१०॥

वातश्लेष्मज्वरं कासं पित्तश्लेष्मज्वरन्तथा।
वातिकं पैत्तिकञ्चापि गरदोषसमन्वितम्॥
वासा गुडूचिका भार्गी मुस्तकं कण्टकारिका।
समभागकृतं क्वाथं प्रत्यहं भक्षयेदनु।

श्रीचन्द्रामृतीरसः।

हिङ्गुलञ्च विषञ्चैव कणा मरिचं टङ्गणम्।
जातीकोषं समं सर्वं जम्बीररसमर्द्दितम्॥
रक्तिमानां वटीं कुर्य्यादार्द्रकरससंयुताम्।
वटीद्वयं त्रयं खादेत् सन्निपातं सुदारुणम्॥
अग्निमान्द्यमजीर्णञ्च सामवातं सुदारुणम्।
उष्णतोयानुपानेन सर्वं व्याधिं नियच्छति॥
कासं पञ्चविधं श्वासं सर्वाङ्गग्रहमेव च।
जीर्णज्वरं क्षयं कासं हन्यादमृतमञ्जरी॥

अमृतमञ्जरी।

त्रिफलाव्योषचूर्णञ्च समभागं प्रकल्पयेत्।
मधुना सह पानात्तु दुष्टकासं नियच्छति॥

कासान्तकः।

पारदं गन्धकञ्चैव टङ्गणं नागकेशरम्।
कर्पूरं जातीकोषञ्च लवङ्गं तेजपत्रकम्॥
सुवर्णञ्चापि प्रत्येकं कर्षमात्रं प्रकल्पयेत्।
शुद्धकृष्णाभ्रचूर्णन्तु चतुःकर्षं प्रयोजयेत्॥
तालीशं घनकुष्ठञ्च मांसीत्वक् धात्रीपुष्पिका।
एलाबीजं त्रिकटुकं त्रिफला करिपिप्पली॥
कर्षद्वयञ्च चैतेषां पिप्पलीक्वाथमर्द्दितम्।

अनुपानं प्रयोक्तव्यं चोचं चौद्रसमायुतम् ॥
अग्निमान्द्यादिकान्रोगानरुचिं पाण्डुकामलाम्।
उदराणि तथा शोथमानाहं ज्वरमेव च।
ग्रहणीं श्वासकासञ्च हन्याद्यक्ष्माणमेव च।
नानारोगप्रशमनं बलवर्णाग्निकारकम् ॥
वृहच्छृङ्गाराभ्रनाम विष्णुना परिकीर्त्तितम्।
एतस्याभ्यासमात्रेण निर्व्याधिर्जायते नरः ॥

वृहत्शृङ्गाराभ्रम् ॥ २११ ॥

सुशुद्धं पारदं गन्धं प्रत्येकं शुक्तिसम्मितम्।
ततः कज्जलिकां कृत्वा मर्द्दयेच्च पृथक् पृथक् ॥
विल्वाग्निमन्थश्योनाकं काश्मरी पाटला बला।
मुस्तं पुनर्नवा धात्री वृहती वृषपत्रकम् ॥
विदारी बहुपुत्री च एषां काथैरसैर्भिषक्।
सुवर्णं रजतं ताम्रं प्रत्येकं शाणमात्रकम् ॥
पलमात्रन्तु कृष्णाभ्रं तदर्द्धन्तु सिताभ्रकम्।
जातीकोषफले मांसी तालीशैला लवङ्गकम् ॥
प्रत्येकं कोलमात्रन्तु वासानीरैर्विमर्द्दयेत्।
शोषयित्वातपे पश्चात् विदार्य्यापेषयेद्रसैः ॥
द्विगुञ्जां वटिकां कृत्वा पिप्पली मधुनाभजेत्।
नाम्ना नित्योदयश्चायं रसो विष्णुविनिर्म्मितः ॥
पञ्चकासान् निहन्त्याशु चिरकालोद्भवानपि।

वृहच्छृङ्गाराभ्रे सुवर्णं धूस्तूरवीजं स्वर्णमित्येके घनं मुस्तकं धात्री-पुष्पिका धातकी करिपिप्पली गजपिप्पली ॥ २११ ॥

राजयक्ष्माणमप्युग्रं जीर्णज्वरमरोचकम् ॥
धातुस्थं विषमाख्यञ्च तृतीयक चतुर्थकम् ।
अर्शांसि कामलां पाण्डुमग्निमान्द्यं प्रमेहकम् ॥
सेवनादस्य कन्दर्परूपी भवति मानवः ।
नित्योदयरसः ॥ २१२ ॥ *

इति कासाधिकारः ।

अथ हिक्काश्वासाधिकारः ।

सूतकं गन्धकं मर्द्यं यामैकं कन्यकाद्रवैः ।
द्वयोस्तुल्यं ताम्रपात्रं पूर्वकल्केन लेपयेत् ।
दिनैकं हण्डिकायन्त्रे पचेच्छीतं समुद्धरेत् ।
सूर्य्यावर्त्तरसोनाम द्विगुञ्जः श्वासकासनुत् ॥
इन्द्रवारुणिकामूलं देवदारु कटुत्रयम् ।
शर्करासहितं खादेद्दुर्द्धश्वासनिवृत्तये ।
सूर्य्यावर्त्तोरसः ॥ २१३ ॥

नित्योदयरसे शुक्तिसम्मतमिति कर्षपरिमितं विल्वादीनां स्वरसः प्रत्येकं कर्षमाणः । आदौ विल्वादिरसेनैव भावयेत् ततः सुवर्णादिकं दत्वा वासानीरैर्मर्द्दयेत् भावयेच्च ततः विदारीरसैर्मर्द्दयित्वा द्विगुञ्जामाणां वटीं कुर्य्यादित्यर्थः ॥ २१२ ॥

इति कासाधिकारः ।

तुल्यनिदानत्वात् कासानन्तरं हिक्काश्वासचिकित्सामाह । सूर्य्यावर्त्तरसे सूताद्धं गन्धकमिति केचित् । पूर्वकल्केनेति पूर्वोक्तरसगन्धककल्केन । इन्द्रवारुण्यादीनां मूलचूर्णं यथा वलं लेह्यम् ॥ २१३ ॥

---

* वसन्ततिलकप्रभृतयस्तन्त्रान्तरेऽनुसर्त्तव्याः ।

सूतकं गन्धकं लौहं विषमभ्रकमेव च।
विड़ङ्गं रेणुकं मुस्तमेला ग्रन्थिककेशरम्।
त्रिकटु त्रिफला ताम्रं शुल्वं जैपालचित्रकम्।
एतानि समभागानि द्विगुणो दीयते गुड़ः।
कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे।
सूतायां ग्रहणीदोषे शूले पाण्डामये तथा।
हस्तपादादिदाहेषु वटिकेयं प्रशस्यते।

विजयवटी॥

घृतेन पाचयेन्मूलं पत्रञ्च वासकस्य च।
भक्षयेत् प्रातरुत्थाय कासे श्वासे क्षये तथा।
पिप्पली देवदारुश्च शुण्ठीचूर्णं समं तथा।
ऊर्द्ध्वश्वासं सदा हन्ति पिबेदुष्णजलेन च।
भागो रसस्य गन्धस्य द्वावेको लौहभस्मतः।
एतद्‌घृष्टं द्रवीभूतं मृदग्नौ कदलीदले।
पातयेद्गोमयगते तथैवोपरियोजयेत्।
ततःपिष्ट्वा द्रवैरेभिः सप्तधा भावयेत् पृथक्।
भार्गी मुण्डी मुनिवरा जया निर्गुण्डिका तथा।
व्योषवासककन्यार्द्रं द्रवैस्ततः पुटे पचेत्।
आगन्धं खर्परे ताम्रे पर्पटाख्यो रसो भवेत्।
सर्वरोगहरस्तैस्तैरनुपानैर्हि माषकैः।
ताम्बुलीपत्रसहितः श्वासकासहरःपरः।
सकणः सुरसाक्काथोनुपानं वासकाज्जलम्।
अम्लिकातैलवार्त्ताकुकुष्माण्डं कदलीफलम्।
वर्ज्यं मांसरसं सर्वं पथ्यं दद्याद्विचक्षणः।

वर्जयेच्च विशेषेण कफकृत् स्त्रीसुखादिकम् ।

लौहपर्पटीरसः॥ २१४॥

लौहस्थाने ताम्रयोगात्ताम्रपर्पटिका भवेत् ।

ताम्रपर्पटी॥

पिप्पल्यामलकी द्राक्षा कोलास्थि मधुशर्करा ।
विडङ्गपुष्करैर्युक्तं लौहं हन्ति सुदारुणाम् ॥
छर्दिं हिक्कां तथा तृष्णां विरान्नेण न संशयः ।

पिप्पल्याद्यं लौहम्॥ २१५॥

टङ्कणं पारदं गन्धं विषं शिला कटुत्रिकम् ।
निष्पिष्य वटिका कार्य्या वाणगुञ्जाप्रमाणतः॥
उष्णोदकं पिवेच्चानु क्षुद्राक्वाथ मथापि वा ।
कासं पञ्चविधं हन्ति श्वासं श्लेष्मसमुद्भवम् ॥
शिरोरोगं निहन्त्याशु वृक्षमिन्द्राशनिर्यथा ।

श्वासकुठारः॥ २१६॥

पारदं माक्षिकं खर्णं समांशं परिकल्पयेत् ।
पारदार्द्धं मौक्तिकञ्च सूताद्द्विगुणगन्धकम् ॥
अभ्रञ्चैव तथा योज्यं वीर्य्याद्द्विगुणलौहकम् ।

लौहपर्प्पटीरसे रसस्य द्वौ भागौ गन्धकस्य च द्वौ भागौ लौहभस्मनस्त्वेकोभागः, एतत्सर्व्वमेकीकृत्य रसपर्पटीवत् पचेत् । ततः भार्ग्यादिद्रवैः प्रत्येकशः सप्तधा मर्द्दयेत् तदनन्तरं ताम्रभाजने कृत्वा च्यागर्भे प्रपुटेत् ॥ २१४ ॥

पिप्पल्यादिलौहे कोलास्थि वदरास्थिमज्जा, मधु यष्टिमधु पुष्करं पुष्करमूलम् ॥ २१५ ॥

श्वासकुठाररसे गरलं विषं क्षुद्राक्वाथं कण्टकारीक्वाथम् ॥२१६॥

कण्टकारीरसेनैव छागीदुग्धेन च पृथक् ॥
यष्टिमधुरसेनैव पर्णपत्ररसेन च ।
भावयेत् सप्तवारञ्च द्विगुञ्जां वटिकां भजेत् ॥
पिप्पलीमधुसंयुक्तां श्वासकासविमर्द्दिनीम् ।

श्वासकासचिन्तामणिः ॥

रसं गन्धं विषं टङ्कं शिलोषणकटुत्रयम् ।
सर्वं संमर्द्द्य दातव्यो रसः श्वासकुठारकः ॥
वातश्लेष्मसमुद्भूतं श्वासं कासं क्षयं जयेत् ।

श्वासकुठारः ॥ २१७ ॥

रसं गन्धं विषञ्चैव टङ्कणं समनःशिलम् ।
एतानि समभागानि मरिचं तच्चतुर्गुणम् ॥
त्रिभागं त्र्यूषणं ज्ञेयं खल्ले सर्वं विचूर्णयेत् ।
रसः श्वासकुठारोऽयं द्विगुञ्जः श्वासकासजित् ॥
गतासंज्ञा यदा पुंसां ओदानस्यं प्रदापयेत् ।
प्रापयेन्नासिकारन्ध्रे संज्ञाजननमुत्तमम् ॥
प्रतिश्यायं क्षतक्षीणं एकादशविधं क्षयम् ।
हृद्रोगं श्वासशूलञ्च स्वरभेदं सुदारुणम् ॥
सन्निपातं तथा घोरं तन्द्रामोहान्वितं जयेत् ।

श्वासकुठारः ॥ २१८ ॥

इति हिक्काश्वासाधिकारः ।

श्वासकुठारे शिला मनःशिला त्र्यूषणं मरिचम् ॥ २१७ ॥
श्वासकुठारे मरिचन्तत् चतुर्गुणमिति एकभागापेक्षया चतुर्गुणम् ॥२१८॥

इति हिक्काश्वासाधिकारः ।

अथ स्वरभेदचिकित्सा।

रसं गन्धं विषं टङ्कं मरिचं चव्यचित्रकम्॥
आर्द्रकस्य रसेनैव संमर्द्य वटिकान्ततः।
गुञ्जात्रयप्रमाणेन खादेत्तोयानुपानतः॥
स्वरभेदं निहन्त्याशु श्वासं कासं सुदुस्तरम्।
भैरवोरसः॥

चव्याम्लवेतसकटुत्रयतिन्तिड़ीक
तालीशजीरकतुगादहनैः समांशैः।
चूर्णं गुड़प्रमृदितं त्रिसुगन्धियुक्तं
वैस्वर्य्यपीनसकफारुचिसुप्रशस्तम्॥
अनेनैवानुपानेन भस्मसूतं प्रयोजयेत्।
योगवाहिरसञ्चापि योजयन्ति भिषग्वराः॥
सशर्करं शुण्ठीचूर्णं चौद्रेणसह योजितम्।
कोकिलस्वर एवस्याद् गुड़िकाभुक्तमात्रतः॥ २१८॥

इति स्वरभेदाधिकारः।

अथारोचकचिकित्सा।

रसगन्धौ समौ शुद्धौ दन्तीक्वाथेन भावयेत्॥
जम्बीरस्य रसेनैव आर्द्रकस्य रसेन च।

प्राणोदान दुष्टिसाधर्म्यात् हिक्काश्वासानन्तरं स्वरभेदचिकित्सा-माह रसमित्यादि सूतभस्मप्रयोगे तिन्तिड़िकं मह्दार्द्रकं तुगा वंश-लोचना। दहन चित्रकः गुड़मिति सर्वचूर्णसमम्॥ २१८॥

इति स्वरभेदाधिकारः।

मातुलुङ्गस्य तोयेन तस्य मज्जरसेन च ॥
पश्चाद्विशोष्यान् सर्वांस्तान् टङ्गणञ्चावचारयेत्।
देवपुष्पं बाणमितं रसपादं मृतामृतम् ॥
माषमात्रञ्च तत्सर्वं नागरेण गुडेन वा
सर्वारोचकशूलार्त्तिसामवातं सुदारुणम्।
विसूचीञ्चाग्निमान्द्यञ्च भक्तद्वेषञ्च दारुणम्॥
रसोयं वारयत्याशु केशरी करिणं यथा।

सुधानिधिरसः॥ २२०॥

पलं सुजीर्णं गगनन्तु वज्रकं तेजोवती
कोलसुशीरदाडिमम्।
धात्र्यम्लरोलीरुचकं पृथग्दशपलोन्मितं
मर्द्दितमेव सेवितम्।
अरोचकं वातकफत्रिदोषजं पित्तोद्भवं
गन्धसमुद्भवं नृणाम्।
कासं स्वराघातमुरुग्रहं रुजं श्वासं वलासं
यक्ष्मतं भगन्दरम्।
प्लीहाग्निमान्द्यं श्वयथुं समीरणं मेहं भृशं
कुष्ठमसृग्दरं क्रिमिम् ॥
शूलाम्लपित्तक्षयरोगमुद्धतं सरक्तपित्तं
वमिदाहमश्मरीम्।

अरोचकस्यापूर्व्वङ्गविकारत्वेन स्वरभेदानन्तरमरोचकमाह। सुधानिधिरसे सर्व्वचूर्णसमं टङ्गणचूर्णं, देवपुष्पं लवङ्गं मृतामृतमिति शोधितविषम्। भक्तद्वेष मरोचकम् ॥ २२०॥

निहन्तिचार्शांसि सुलोचनाभ्रकं बलप्रदं
हृष्यतमं रसायनम् ।
सुलोचनाभ्रम् ॥ २२१ ॥

ससूतमरुचिघ्नं स्यात्तिन्तिड़िकगुड़ोषणम् ।
मृद्विका जीरकं कृष्णा मातुलुङ्गाम्लवेतसम् ॥

इत्यरोचकाधिकारः ।

अथ छर्द्दिरोगचिकित्सा ।

अजाजीधान्यपथ्याभिः सचुद्राभिः कटुत्रिकैः ।
एभिः सार्द्धं भस्मसूतः सेव्यो वान्तिप्रशान्तये ॥
हिक्काधिकारोक्तपिप्पल्यादिलौहमत्रविधेयम् ।२२२।

इति छर्द्दिरोगचिकित्सा ।

अथ तृष्णारोगचिकित्सा ।

ताम्रं चक्रिकया वङ्गं सूतं तालं सतुल्यकम् ॥
वटाङ्कुररसैर्भाव्यं तृष्णाह्वदलमात्रतः ।
सचौद्रमाम्रजम्बूत्थं पिबेत् क्वाथं पलोन्मितम् ॥

सुलोचनाभ्रे सुजीर्णगगनं भस्माभ्रं, तेजोवती चवी कोलं वदरफ-
वमज्जा, रुचकं सौवर्च्चलं इति ख्यातः । ससूतमित्यादौ तिन्तिड़ी
पक्वतिन्तिड़ीफलम् ॥ २२१ ॥

इत्यरोचकाधिकारः ।

अरोचकवत्पञ्चविधत्वात् तथा छर्द्द्यामयेऽप्यरुचेः सम्भवादरोचकान-
न्तरं छर्द्दिं चिकित्सितमुच्यते । अजाजीत्यादि अजाजी जीरकं पथ्या
हरीतकी ॥ २२२ ॥

इति छर्द्दिचिकित्सा ।

सक्षणमधुना कुर्य्यात् गण्डूषं शीतले स्थितः।

महोदधिरसः॥

सूततामस्य भागौ द्वौ भागैकं वङ्गभस्मकम्।
यष्टिमधुरसैर्भाव्यं शुष्कं माषार्द्धकं शुभम्॥
सेव्यञ्चैवानुपानेन वक्ष्यमाणेन बुद्धिमान्।
चन्दनं शारिवा मुस्तं क्षुद्रैला नागकेशरम्॥
सर्वतुल्या तथा लाजा पचेत् षोड़शिकैर्जलैः।
अर्द्धशेषं हरेत् क्वाथं सिताक्षौद्रयुतन्तु तत्॥
छर्द्दिं तृष्णां निहन्त्याशु रसोयं कुमुदेश्वरः।

कुमुदेश्वरोरसः॥ २२३—२२४॥

इति तृष्णाधिकारः।

अथ मूर्च्छारोगचिकित्सा।

कणासधुयुतं सूतं मूर्च्छायामनुशीलयेत्॥
शीतसेकावगाहादिसर्वं वा शीतलं भजेत्।
सुधानिधिरसोनाम मदमूर्च्छाविनाशनः॥

सुधानिधिरसः॥ २२५॥

इति मूर्च्छाधिकारः।

छर्द्दिस्तृष्णोपद्रवत्वात् छर्द्यनन्तरं तृष्णाचिकित्सामाह। कुमुदेश्वरे यष्टिमधुररसैः यष्टिमधुक्वाथैः॥ २२३॥

चन्दनेत्यादौ शारिवा अनन्तमूलं क्षुद्रैला गुजरातीति ख्याता॥ २२४॥

इति तृष्णाधिकारः।

तृष्णायां मोहो भवतीत्यनन्तरं मोहचिकित्सामाह कणेत्यादि। सुधानिधिरसे सूतमिति सूतभस्म॥ २२५॥

इति मूर्च्छाधिकारः।

अथ मदात्ययचिकित्सा।

सचव्यं हिङ्गु रुचकं धन्याकं विश्वदीप्यकम् ॥
चूर्णं ससूतं मदेन पीतं पानात्ययं जयेत् ॥ २२६॥
सौवर्चलमजाज्यश्च वृक्षाम्लं साम्लवेतसम्।
त्वगेला मरिचार्द्धांशं शर्करामधुयोजितम् ॥
हितं लवणमष्टाङ्गमग्निसन्दीपनं परम्।
मदात्यये कफप्राये दद्यात् स्रोतोविशोधनम् ॥

अष्टाङ्गलवणम् ॥ १२७॥

इति मदात्ययाधिकारः।

अथ दाहचिकित्सा।

सूतात्पञ्चार्कांतसैकं कृत्वा पिण्डं सुशोभनम् ॥
जम्बीरस्वरसैर्मर्द्यं सुततुल्यञ्च गन्धकम्।
नागवल्लीदलैः पिष्ट्वा ताम्रपात्रीं प्रलेपयेत् ॥
प्रपूटेद्भूधरे यन्त्रे यावद्भस्मत्वमाप्नुयात्।
हिगुञ्जमार्द्रकद्रावैस्त्र्यषणेन च योजयेत् ॥
निहन्ति दाहसन्तापं मुर्च्छां पित्तसमुद्भवाम्।

दाहान्तकोरसः ॥ २२८॥

इति दाहाधिकारः।

मूर्च्छानन्तरमस्यापि मद्यजन्यत्वात् मूर्च्छानन्तरं मदात्ययचिकित्सामाह सचव्येत्यादि। दीप्यकं यमानी सूतं भस्मसूतम् ॥ २२६॥

सौवर्चलेत्यादौ अजाजी जीरकं वृक्षाम्लं महार्द्रकम् ॥ २२७॥

इति मदात्ययाधिकारः।

अथ उन्मादरोगचिकित्सा।

त्रिदिनं कनकद्रावैर्महाराष्ट्रोद्भवैः पुनः॥
विषमुष्टिजलैः सूतं समुत्थाप्याथ चक्रिकाम्।
कृत्वा तस्यां सगन्धां तां युक्त्या बन्धनमाचरेत्॥
ततस्तं कानकं बीजमभ्रकं गन्धकं विषम्।
मर्द्दयेत् त्रिदिनं सर्वं वल्लमात्रं प्रयोजयेत्॥
दोषोन्मादं द्रुतं हन्ति भूतोन्मादं विशेषतः।
उन्मादगजांकुशोरसः॥ २२९॥

सूतायस्ताम्रमभ्रञ्च मुक्ताचापि समं समम्।
सूतपादोत्तमं वज्रं शिला गन्धकतालकम्॥
तुल्यं रसाञ्जनं शुद्धमहिफेणं शिलाञ्जनम्।
पञ्चानां लवणानाञ्च प्रतिभागं रसोन्मितम्॥
भृङ्गराजचित्रवज्रीदुग्धेनापि विमर्द्दयेत्।
दिनान्ते पिण्डिकां कृत्वा रुद्ध्वा गजपुटे पचेत्॥
भूताङ्कुशोरसोनाम नित्यं गुञ्जाद्वयं लिहेत्।
आर्द्रकस्य रसेनापि भूतोन्मादनिवारणम्।
पिप्पल्याढ्यं पिबेच्चानु दशमूलकषायकम्॥

मदात्ययेपिदाहो भवत्यतः मदात्ययानन्तरं दाहचिकित्सामाह सूतादित्यादि। अर्कस्ताम्रम्॥ २२८॥

इति दाहाधिकारः।

मदात्ययस्य उन्मादसदृशत्वेन तथा पूर्वोक्तरीत्या च यद्यपि मदात्ययानन्तरमुन्माद‍दाहावेवक्तुमुचितौ तथापि सुचिकटाहन्यायेन दाहमभिधाय उन्मादचिकित्सामाह त्रिदिनमित्यादि। उन्मादगजांकुशे महाराष्ट्री वज्रयष्टि इत्यर्थः। विषमुष्टिः कुचिलेति ख्याता। अर्कचक्रिकां ताम्रचक्रिकाम्॥ २२९॥

खेदयेत् कटुतुम्ब्या च तीक्ष्णं रुक्षञ्च वर्जयेत्॥
माहिषञ्च घृतं क्षीरं गुर्वन्नमपि भक्षयेत्।
अभ्यङ्गः कटुतैलेन हितो भूताङ्कुशे रसे॥

भूताङ्कुशोरसः॥ २३०॥

शुद्धं मनःशिलाचूर्णं सैन्धवं कटुरोहिणी।
वचा शिरीषवीजञ्च हिङ्गु च श्वेतसर्षपम्॥
करञ्जवीजं त्रिकटु मलं परावतस्य च।
एतानि समभागानि गोमूत्रैर्वटिकां कुरु॥
गिरिमल्ली वीजसमां छायाशुष्काञ्च कारयेत्।
प्रातःसन्ध्यानिशाकाले चक्षुषी रञ्जनं हितम्॥
मधुरादिरसेचाञ्जं रात्रावपि जलेन च।
वटिकैका समाख्याता नाम्ना चोन्मादभञ्जिनी॥
चातुर्थकमपस्मारमुन्मादञ्च विनाशिनी।

उन्मादभञ्जिनी॥ २३१॥

त्रिकत्रयसमायुक्तं जीवनीययुतन्तथः।
हन्त्यपस्मारमुन्मादं वातव्याधिं सुदुस्तरम्॥

त्रिकत्रयादिलौहम्।

त्रिकटु त्रिफलाचैव गजपिप्पलिका तथा॥
विडङ्गञ्च देवदारु किरातं कटुकी तथा।
कण्टकारी च यष्टीन्द्रयवं चित्रकमेव च॥

भूताङ्कुशरसे समं समभितेत्रकभागसमं, वज्रं हीरकं तत्र एक-भागापेक्षया पादिकम्। ताम्रादिकं मतेत्रकं भागैकम्॥ २३०॥

उन्मादभञ्जिन्यां कटुरोहिणी कटुकी, गिरीमल्लीवीजं कुटज-वीजम्॥ २३१॥

बला च पिप्पलीमूलं मूलञ्च वीरणस्य च।
शोभाञ्जनस्य वीजानि त्रिवृताचेन्द्रवारुणी ॥
वङ्गं रूप्यमभ्रकञ्च प्रवालं समभागिकम्।
सर्वंचूर्णंसमं लौहं सलिलेन विमर्द्दयेत् ॥
उन्मादमपि भूतोत्थमुन्मादञ्चातजन्तथा।
अपस्मारन्तथा कार्श्यं रक्तपित्तं सुदारुणम् ॥
नाशयेदविकल्पेन रसश्चोन्मादभञ्जनः।

उन्मादभञ्जनोरसः ॥ २३२ ॥

मृतसूतस्य भागौ द्वौ भागैकं हेमभस्मकम्।
शिला कस्तूरिका तालं प्रत्येकं हेमतुल्यकम्।
सर्वं खल्लतले क्षिप्त्वा कन्यया मर्द्दयेद्दिनम् ॥
एरण्डपत्रैरावेष्ट्य धान्यगर्भे दिनत्रयम्।
संस्थाप्य च तदुद्धृत्य सर्वरोगेषु योजयेत् ॥
एतद्रसायनवरन्त्रिफलामधुमर्द्दितम्।
तद्यथाग्निवलं खादेद्वलीपलितनाशनम् ॥
अपस्मारे ज्वरे कासे शोषे मन्दानले चये।
हस्तकम्पे शिरःकम्पे गात्रकम्पे विशेषतः ॥
वातपित्तसमुत्थांश्च कफजान् नाशयेद्ध्रुवम्।
सर्वौषधिप्रयोगैर्यै व्याधयो न प्रसाधिताः ॥
कर्म्मभिः पञ्चभिश्चैव मन्त्रौषधिप्रयोगतः।
सर्वांस्तान् नाशयत्याशु वृत्रमिन्द्राशनिर्यथा ॥

उन्मादभञ्जनरसे किरातं भूनिम्बं, इन्द्रवारुणी गोरक्षकर्कटी ॥२३२ ॥

चतुर्भुजरसोनाम महेशेन प्रकाशितः।

चतुर्भुजरसः॥

कृष्णधूस्तूरजैर्बीजैः पञ्चभिः पर्पटीरसः।

संप्रयोज्यः प्रशान्त्यर्थमुन्मादं भूतसम्भवम्॥

उन्मादपर्पटीरसः॥ २३३।

इत्युन्मादाविकारः।

अथ अपस्माररोगचिकित्सा॥

मृतसूतार्कलौहानां शिला गन्धकतालकम्।

रसाञ्जनञ्च तुल्यांशं नरमूत्रेण मर्द्दयेत्॥

तद्गोलं द्विगुणं गन्धं लौहपात्रे चणं पचेत्।

पञ्चगुञ्जामितं खादेदपस्मारहरं परम्॥

हिङ्गुसौवर्च्चलं व्योषं नरमूत्रेण सर्पिषा।

कर्षमात्रं पिबेच्चानु रसोयं भूतभैरवः॥

भूतभैरवः॥ २३४॥

शङ्खपुष्पी वचा ब्रम्ही कुष्ठमेला रसैः सह।

सूतभस्मप्रयोगोयं रक्तिकाद्वयमानतः॥

सर्वापस्मारनाशाय महादेवेन भाषितः।

सूतभस्मप्रयोगः॥

उन्मादपर्पटीरसे पर्पटीरस इति चोक्तपर्पटीरसः॥ २३३॥

इत्युन्मादचिकित्सा।

तुल्यचिकित्सितत्वादुन्मादानन्तरमपस्मारचिकित्सामाह मृतेत्यादि।

भूतभैरवरसे हिङ्ग्वादिसर्वमनुपानं ज्ञेयम्॥ २३४॥

मृतसूताभ्रकं तीक्ष्णं तारं ताम्रं विषं समम्।
पद्मकेशरसंयुक्तं दिनैकं मर्द्दयेद्द्रवैः॥
मुण्ड्यग्निविजयैरण्डवचानिष्पावशूरनैः।
निर्गुण्ड्याश्च द्रवैर्मर्द्यं तद्गोलं पाचयेत् पुनः॥
कङ्कोलीसर्षपोत्थेन तैलेन गन्धसंयुतम्।
ततः पक्वा समुद्धृत्य चणमात्रा वटीकृता॥
इन्द्रब्रह्मवटीनाम भक्षयेदार्द्रकद्रवैः।
दशमूलकषायञ्च कणायुक्तं पिबेदनु॥
अपस्मारं जयत्याशु यथा सूर्य्योदये तमः।

इन्द्रब्रह्मवटी॥ २३५॥

मृगनाभि शिला नागकेशरं कलिङ्गजम्।
पारदं गन्धकं जातीफलमेला लवङ्गकम्॥
प्रत्येकं कार्षिकञ्चैव सूक्ष्मचूर्णञ्च कारयेत्।
जलेन मर्दयित्वा तु वटीं कुर्य्याद्विरक्तिकाम्॥
यथा व्याध्यनुपानेन योजयेच्च चिकित्सकः।
अपस्मारे महाघोरे मूर्च्छारोगे च शस्यते॥
वातजान् सर्वरोगांश्च हन्यादचिरसेवनात्।
नातःपरतरं श्रेष्ठमपस्मारेषु वर्त्तते॥
ब्रह्मना निर्म्मितः पूर्वं नाम्ना वातकुलान्तकः।

वातकुलान्तकः॥ २३६॥

इत्यपस्माराधिकारः।

इन्द्रब्रह्मवटिकायां तारं रौप्यम्। ताम्रं स्वर्णमाक्षिकम्॥२३५॥

अथ वातव्याधिचिकित्सा ।

गन्धकाद्दिगुणं सूतं शुद्धं मृदग्निना क्षणम् ॥
पक्वावतार्य्य संचूर्ण्य तुल्याभया समन्वितम् ।
सप्तगुञ्जामितं खादेद्वर्द्धयेच्च दिने दिने ॥
गुञ्जैकैकक्रमेणैव यावत् स्यादेकविंशतिः ।
क्षीराज्यशर्क्कराभिश्च शाल्यन्नं पथ्यमाचरेत् ॥
कम्पवातप्रशान्त्यर्थं निर्वाते निवसेत् सदा ।
द्विगुणाख्यरसोनाम त्रिपक्षात् कम्पवातजित् ॥

द्विगुणाख्योरसः ॥ २३७ ॥

मृतं सूतं मृतं लौहं ताप्यं गन्धकतालकम् ।
पथ्या शृङ्गी विषं व्योषमग्निमन्थश्च टङ्कणम् ॥
तुल्यं खल्वेदिनं मर्द्यं मुण्डीनिर्गुण्डिकाद्रवैः ॥
द्विगुञ्जां वटिकां खादेत् सर्व्ववातप्रशान्तये ।
कणाचूर्णयुतञ्चैव जिङ्गीक्वाथं पिबेदनु ॥
साध्यासाध्यं निहन्त्याशु रसो वात गजांकुशः ।
सप्ताहादृष्टध्रसींहन्ति दारुणं सान्निपातिकम् ॥
क्रोष्टुशीर्षकवातञ्चाप्यववाहुकसंज्ञकम् ।

वातकुलान्तके मृगनाभी कस्तूरिका । शिवा हरीतकी । कलिद्रुमं विभीतकफलम् ॥ २३६ ॥

इत्यपस्माराधिकारः ।

अपस्मारवत् वातविकाराणामाक्षेपकादीनां वेगकर्त्तृत्वात्तया प्रायस्तुल्यचिकित्सितत्वाच्चापस्मारानन्तरं वातव्याधिचिकित्सामाह तुल्याभयभवेदित्यादि, रसगन्धकयोस्तुल्या हरीतकीत्यर्थः ॥ २३७ ॥

मन्यास्तम्भमुरुस्तम्भं हनुस्तम्भं विनाशयेत्॥
पक्षाघातादिरोगेषु कथितः परमोत्तमः।

वातगजांकुशः॥ २३८॥

रसोऽयं रिपुशोषणीव युक्तोऽयो योगवाहिकः।
सूताभ्रतीक्ष्णकान्तानि ताम्रतालकगन्धकम्॥
स्वर्णं शुण्ठी वला धान्यं कट्फलञ्चाभया विषम्।
पथ्या शृङ्गी पिप्पली च मरिचं टङ्कणन्तथा॥
तुल्यं खल्ले दिनं मर्द्यं मुण्डीनिर्गुण्डीजैर्द्रवैः।
द्विगुञ्जां वटिकां खादेत् सर्ववातप्रशान्तये॥
साध्यासाध्यं निहन्त्याशु वृहद्वातगजांकुशः।

वृहद्वातगजांकुशः॥ २३९॥

मृताभ्रतीक्ष्णताम्रञ्च सूततालकगन्धकम्।
भार्गी शुण्ठी वला धान्यं कट्फलञ्चाभया विषम्।
संपिष्य चपलाद्रावैर्निष्कैकां भक्षयेद्वटीम्।
वातश्लेष्महरो ह्येष गुरुवातगजांकुशः।

महावातगजांकुशः।

सूतहाटकवज्राणि ताम्रं लौहञ्च माक्षिकम्॥
तालं नीलाञ्जनं तुल्यं सिन्धुफेणं समांशिकम्।

वातगजांकुशे तालकं हरितालं माक्षिकं स्वर्णमाक्षिकं शृङ्गी कर्कटशृङ्गी अग्निमन्थं नखिकारी। सकलमिदं टिप्पणीकारमनुमेयम्॥२३८

वृहद्वातगजांकुशे शुण्ठीसुखिडरी। महावातगजाङ्कुशे वज्राभ्रक-भस्मं, चपलाद्राकैरिति पिप्पलीक्वाथैः॥ २३९॥

पञ्चानां लवणानाञ्च भागैकं सुविमर्द्दयेत् ॥
वज्रीक्षीरैर्द्दिनैकन्तु रुद्ध्वा तं भूधरे पचेत् ।
माषैकमात्रं कद्रावैर्लिह्याद्वातविनाशनम् ॥
पिप्पलीमूलकक्वाथं सकृष्णमनुपाययेत् ।
सर्व्वान् वातविकारांश्च निहन्त्याक्षेपकादिकान् ॥

वातनाशनोरसः ॥ २४० ॥

रसभागो भवेदेको द्विगुणो गन्धकोमतः ।
त्रिगुणास्त्रिफला चाद्या चतुर्भागन्तु चित्रकम् ॥
गुग्गुलोः पञ्चभागमेरण्डतैलेन मर्द्दयेत् ।
क्षिप्त्वा पूर्वकं चूर्णं पुनस्तेनैव मर्द्दयेत् ॥
गुड़िकां कर्षमात्रान्तु भक्षयेत् प्रातरुत्थितः ।
नागरैरण्डमूलानां क्वाथं तदनुपाययेत् ॥
अङ्गमेरण्डतैलेन स्वेदयेत् पृष्ठदेशतः ।
विरक्ते तेन संजाते स्निग्धमुष्णञ्च भोजयेत् ॥
वातारिसंज्ञकोह्येष रसो निर्व्वातसेवितः ।

वातारिरसः ॥ २४१ ॥

रसेन गन्धं द्विगुणं विमर्द्द्य वातारिनिर्गुण्डीरसैर्द्दिनैकम्
निवेशयेत्ताम्रमये पुटे तत्सर्वं मृदावेष्ट्य च वालुकाख्ये ।

वातनाशनोरसे हाटकं स्वर्णं, वज्रं हीरकं, तदभावे वैक्रान्तम् । नीलाञ्जनं रसाञ्जनं, सिन्धुफेणं समुद्रफेणम् ॥ २४० ॥

वातारिरसे द्विगुणमिति एकभागापेक्षया द्विगुणं एवं सर्व्वत्र । आदौ गुग्गुलुमेरण्डतैलेन सम्मर्द्द्य रसादिसर्वं निःक्षिप्य पुनर्म्मर्द्दयेत् । अङ्गं स्वेदयेदिति मर्द्दयेत् ॥ २४१ ॥

वन्हौ पुटेद्गोमयचूर्णवह्नौ स्वभावशीते तु समुद्धरेत्तत्।
निर्गुण्डिकावातहराग्नितोयैः संचूर्ण्य यत्नेनविभावयेत्तत्।
रसोनिलारिः कथितोस्य वल्लमेरण्डतैलेन ससैन्धवेन॥
मरिचचूर्णेन ससर्पिषा वा निर्गुण्डीचित्रैश्च कटुत्रिकैर्वा॥

अनिलारिरसः॥ २४२॥

वज्रसृताभ्रहेमार्कतीक्ष्णमुण्डं क्रमोत्तरम्।
मरिचं मर्द्दयेदम्लवर्गेण दिवसत्रयम्॥
द्विचारं पञ्चलवणं मर्द्दितं स्यात् समं समम्।
ततो निर्गुण्डिकाद्रावैर्मर्द्दयेद्दिवसत्रयम्॥
शुष्कमेतद्विचूर्ण्याथ विषश्चास्याष्टमांशतः।
टङ्कणं विषतुल्यांशं दत्वा तं जम्बीरद्रवैः॥
भावयेद्दिनमेकन्तु रसोयं वातकण्टकः।
दातव्यो वातरोगेषु सन्निपाते विशेषतः॥
द्विगुञ्जमार्द्रकद्रावैर्घृतैर्वावातरोगिने।
निर्गुण्डीमूलचूर्णन्तु माहिषाज्यञ्च गुग्गुलुम्॥
समांशं मर्द्दयेदज्ये तद्दटी कर्षसम्मिता।
अनुयोज्य घृतैर्नित्यं स्निग्धमुष्णञ्च भोजयेत्॥
मण्डलं नाशयेत् सर्वं वातरोगंविशेषतः।
सन्निपाते पिबेच्चानु तालमूली कषायकम्॥

वातकण्टकोरसः॥ २४३॥

अनिलारिरसे वातारिरेरण्डस्य मूलरसैः। अग्नि चित्रकः।
तोयैरिति क्वाथैः। २४२॥

वातकण्टकोरसे तीक्ष्णं तीक्ष्णलौहं मुण्डं मुण्डलौहं क्रमोत्तर-

पारदं गन्धकं लौहमभ्रकं विषमेव च।
समांशं मरिचस्याष्टौ टङ्कणन्तु चतुर्गुणम्॥
भृङ्गराजरसेनैव दातव्या पञ्चभावना।
तथा दाड़िमतोयेन वटीं कुर्य्यात् समाहितः॥
निहन्ति वातजान् रोगान् भ्रमदाह पुरःसरान्।

लघ्वानन्दोरसः॥ २४४॥

कर्षैकं रससिन्दूरं तत्समं मृतमभ्रकम्।
तदर्द्धं मृतलौहञ्च स्वर्णं शाणं क्षिपेद्बुधः॥
कन्यारसेन संमर्द्द्य गुञ्जामानां वटीञ्चरेत्।
अनुपानादिकं दद्याद्बुद्धा दोषबलाबलम्॥
हन्ति श्लेष्मान्वितं वातं केवलं पित्तसंयुतम्।
हृल्लासमरुचिं दाहं वान्तिं भ्रान्तिं शिरोग्रहम्॥
प्रमेहं कर्णनादञ्च ज्वरगद्गदमूकताम्।
वाधिर्य्यं गर्भिणीरोगमथ सूतिकामयम्॥
प्रदरं सोमरोगञ्च यक्ष्माणं ज्वरमेव च॥
बलवर्णाग्निदः सम्यक् कान्तिपुष्टिप्रसाधकः।
चिन्तामणिरसश्चायञ्चिन्तामणिरिवापरः॥

अनुभव ठीक चिन्तामणिरसः॥ २४५॥

भिषि यथोत्तरं द्विवारं यवक्षारं स्वर्जिक्षारञ्च। अष्टमांश इति एक-भागापेक्षया, निर्गुण्ड्यादिचूर्ण कर्षपरिमितमनुयोज्यम्॥ २४३॥

लघ्वानन्दे मरिचस्याष्टावितेरकभागापेक्षया मरिचस्याष्टौभागाः॥ २४४॥

चिन्तामणिरसे मृतलौहमित्यत्र कान्तलौहमिति केचित् पठन्ति॥ २४५॥

रसगन्धकलोहाभ्रं समं सूताङ्घ्रिहेम च।
सर्वं खल्लतले क्षिप्त्वा कन्यास्वरसमर्द्दितम्॥
एरण्डपत्रैराविष्ट्य धान्यराशौ दिनत्रयम्।
संस्थाप्य च तदुद्धृत्य त्रिफलारससंयुतम्॥
एतद्रसायनवरं सर्वरोगेषु योजयेत्।
तद्यथाग्निबलं खादेद्वलीपलितनाशनम्॥
पौष्टिकं बल्यमायुष्यं पुत्रप्रसवकारकम्।
क्षयमेकादशविधं कासं पञ्चविधन्तथा॥
कुष्ठमेकादशविधं पाण्डुरोगान् प्रमेहकान्।
शूलं श्वासञ्च हिक्काञ्च मन्दाग्निञ्चाम्लपित्तकम्।
अपस्मारं महोन्मादं सर्वार्शांसि त्वगामयान्॥
क्रमेण शीलितं हन्ति वृक्षमिन्द्राशनिर्यथा।
जगताञ्च हितार्थाय चतुर्मुखमुखोदितः॥
रसश्चतुर्मुखोनाम चतुर्मुख इवापरः।

चतुर्मुखोरसः॥ २४६॥

पलं कृष्णाभ्रचूर्णस्य तदर्द्धौ रसगन्धकौ।
बला नागबलाभीरु विदारी कन्दमेव च॥
कृष्णधुस्तूरनिचुलं गोक्षुर वृद्धदारयोः।
बीजं शक्राशनस्यापि जातीकोषफले तथा॥
कर्पूरञ्चैव कर्षांशं श्लक्ष्णचूर्णं पृथक् पृथक्।

चतुर्मुखरसे रसगन्धकयोरप्राप्तौ कफप्रबले वा व्याधौ स्वर्णसिन्दूरं क्षिपन्ति वृद्धाः। सूताङ्घ्रिहेम च इति सूतात् पादिकं स्वर्णभस्म इत्यर्थः॥ २४६॥

गृहीत्वा चाष्टमांशेन स्वर्णं पर्णरसेन च ॥
वटिकां सिद्धचणकप्रमाणां कारयेद्भिषक् ।
रसोलक्ष्मीविलासोयं पूर्ववत् गुणकारकः ॥

लक्ष्मीविलासोरसः ॥ २४७ ॥

सूताह्वयो घनवरानलवेल्लभार्गी
तिक्ताकटुत्रयवरैः सवचैः समांशैः ।
रोगेभसिंह इति वातकफामयघ्नः
सान्द्रोयमल्पपटुतो विहितो द्विगुञ्जः ॥
एतैर्गुड़प्रमृदिते रसवर्जिते स्यात्
श्रीखण्डनाम गुड़िका विहिताद्विगुञ्जा ।
शैत्याद्यजीर्णकफवातभवान् विकारान् ।
हन्यार्द्रकेन नियुताप्यथ केवला वा ॥

रोगेभसिंहश्रीखण्डवट्यौ ॥ २४८ ॥

सूतात् पञ्चार्कतस्चैकं कृत्वा पिण्डं सुगन्धकम् ।
सूतांशं नागवल्ल्याद्यद्रवैः पिष्ट्वा प्रलेपयेत् ॥
ताम्रपत्रीं प्रलिप्तां तां रुद्ध्वा गजपुटे पचेत् ।

लक्ष्मीविलासरसे तदर्द्धौ रसगन्धकाविति मिलितौ रसगन्धकौ तदर्द्धौ । वलादीनां प्रत्येकं कर्षांशः । अष्टमांशेन स्वर्णमिति कर्षमात्रापेक्षया चाष्टमांशम् ॥ २४७ ॥

रोगेभसिंहे घनं मुस्तकम् । वरा त्रिफला, अनल चित्रकः । वेल्लं विड़ङ्गम् ॥ २४८ ॥

द्विगुञ्जन्तूषणेनार्द्रवपुर्वातं सकम्पकम् ॥
निहन्ति दाहसन्तापमूर्च्छापित्तसमान्वितम्।

पिण्डीरसः ॥ २४९ ॥

रसगन्धौ समौ शुद्धौ चाभया तालकन्तथा।
विषं कटुकि व्योषञ्चबोलजैपालकौसमौ॥
भृङ्गराजरसैर्मर्द्यं स्नुह्यर्कस्वरसैस्तथा।
गुञ्जाद्वयं भक्षयेच्च हृच्छूलं पार्श्वशूलकम्॥
आमवाताढ्यवातादीन् कटीशूलञ्च नाशयेत्।
अग्निञ्च कुरुते दीप्तिं स्थौल्यञ्चाप्यपकर्षति॥
रसः कुञ्जविनोदोयं गहनानन्दभाषितः।

कुञ्जविनोदरसः ॥ २५० ॥

हिमवन्ति हि गात्राणि रोगाणिस्फूरितानि च।
शिरोक्षिवेदनालस्य शीतवातस्य लक्षणम् ॥ २५१ ॥
रसेन गन्धं द्विगुणं प्रगृह्य पुनर्नवाग्निस्वरसैर्विभाव्य।
पक्वार्कपत्रस्य रसेन पश्चाद्विपाचयेदष्टगुणेन यत्नात्॥
रसार्द्धभागञ्च विषञ्च दत्वा विपाचयेदग्निजले क्षणं तत्।
शीतारिसंज्ञस्य रसायनस्य वलञ्च सार्द्धं मरिचार्द्रकेण।

पिण्डीरसे पारदमन्वकनामवल्लीरसैस्तास्रपत्रीं प्रलिप्य गजपुटे पचेत् ॥ २४९ ॥

कुञ्जविनोदरसे बोलं गन्धबोलम् ॥ २५० ॥

शीतवातलक्षणमाह हिमवन्तीति ॥ २५१ ॥

मरिचचूर्णेन घृताप्लुतेन सेवेत मांसञ्च घृतञ्च पथ्यम्।

शीतारिरसः॥ २५२॥

सूतमभ्रकसत्वञ्च कांस्यं शुद्धञ्च माक्षिकम्।
गन्धकन्तालकं सर्वं भागोत्तरविवर्द्धितम्।
कज्जलीकृत्य सर्वं वातारिस्नेहसंयुतम्।
सप्ताहं मर्द्दयित्वा तु गोलकीकृत्य यत्नतः।
निम्बद्रवेण संपेष्य तिलकल्केन लेपयेत्।
अर्द्धाङ्गुलदलेनैव परिशोष्य प्रयत्नतः।
प्रपचेद्वालुकायन्त्रे द्वादशप्रहरन्ततः।
जठरस्य रुजः सर्व्वास्तथा च मलविग्रहम्।
आध्मानकल्पयानाहं विसूचीं वह्निमान्द्यकम्।
आमदोषमशेषञ्च गुल्मं छर्द्दिञ्च दुर्जरम्।
ग्रहणीं श्वासकासौ च क्रिमिरोगं विशेषतः।
हन्यात् सर्व्वाङ्गशूलञ्च मन्यास्तम्भन्तथैव च।
ज्वरे चैवातिसारे च शूलरोगे त्रिदोषजे।
पथ्यं रोगानुसारेण देयमस्मिन् भिषग्वरैः।
श्रीमतानन्दीनाथेन वातविध्वंसिनोरसः।

वातविध्वंसिनोरसः॥ २५३॥

शीतारिरसे पक्वार्कपत्रं हरितवर्णं पक्वार्कपत्रं विपाचयेदष्टगुणेनेति रसगन्धकापेक्षया अष्टगुणेन पाचयेत् वालुकायन्त्रे मूषायाम्वा रसस्याधिपाकः॥ २५२॥

वातविध्वंसिरसः कोष्ठाश्रितवाते अत्र भागोत्तरविवर्द्धितमिति

पलाशबीजैःत्वरसेन सूतं
गन्धेन युक्तं त्रिदिनं विमर्द्य ।
स्लक्ष्णीकृतन्तद्विषतिन्दुबीजं
संयोजयेदस्य कलाप्रमाणम् ॥
मासद्वयं निष्कमितं प्रयत्ना
दर्शांसिहन्त्वाशुनियोजनीयम् ।
वातरक्तं तथा शोथमस्मर्शाख्यानिलामयम् ॥
वातवत् पित्तरोगेपि तत्र पित्तेन भावयेत् ।
पलाशादिवटीख्याता वातरोगकुलान्तिका ॥

पलाशादिवटी । २५४ ॥

यष्टि धात्री बला द्राक्षा एला चन्दनवालुकम् ।
मधुकपुष्पं खर्जूरं दाड़िमं पेषयेत् समम् ॥
सर्वतुल्या सिता योज्या पलार्द्धं भक्षयेत् सदा ।
दशसारवटीख्याता सर्ववातविकारनुत् ॥
अथ दाड़िममित्यत्र गणमिच्छन्ति चापरे ।

दशसारवटी ॥

सृतगगनरसार्क मुण्डतीक्ष्णं सताप्यम् ।
सबलिसममिदं स्याद्यष्टितोयप्रविष्टम् ॥
तदनुसलिलजातैर्वासकैर्गोस्तनीभिः ।

ययोत्तरमेकैकभागवर्द्धितमित्यर्थः ! वातारिस्नेहसंयुतमिति चैरण्डतैल-संयुतम् ॥ २५३ ॥

पलाशादिवटिकायां विषतिन्दुकबीजं कुचिला इति ख्याता । इयं पलाशादिवटी यदा पित्तरोगे प्रयोक्तव्या तदा पञ्चपित्तेषु भावयेत् २५४

मृदितमनुविदारी वारिणा वस्त्रमेकम् ॥
घृतमधुसहितेयं निष्कमाला वटीति।
क्षपयति गुरुवातं पित्तरोगं क्षयञ्च ॥
भ्रमम[illegible]कफशोषान् दाहतृष्णासमुत्थान्।
मलयजमिहपेयञ्चानुपेयं सचन्द्रम् ॥

गगनादिवटी ॥ २५५ ॥

शुद्धसूताभृताम्रायो हिङ्गुलं कार्षिकं समम्।
गन्धकश्चैकभागः स्यात् सर्वमेकत्र मर्द्दयेत् ॥
सप्तपर्णार्कस्नुक्क्षीरवासावातारिवारिणा।
विषमुष्टिसमं सर्वं पेषयेत्तद्गोलकीकृतम् ॥
विपचेत् वालुकायन्त्रे दिवामान्ते समुद्धरेत्।
पिप्पलीविषसंयुक्तो रसः सर्वाङ्गसुन्दरः।
सर्ववातविकारघ्नः सर्वशूलनिसूदनः।

सर्वाङ्गसुन्दरोरसः।

एकभागोरसस्य स्याच्छुद्धः तालैकभागिकः।
अष्टौसुरविजयायाश्च गुडिकां गुडतश्चरेत् ॥
एकैकां भक्षयेत् प्रातश्छायायामुपवेशयेत्।
तालकेश्वरनामायं रोगश्वासशतनाशनः ॥

तालकेश्वरः ॥ २५६ ॥

गगनादिवटिकायां सुवर्णं सुवर्णलौहं तीक्ष्णं तीक्ष्णलौहं तार्प्यं स्वर्णमाक्षिकम्। मलयजं श्वेतचन्दनं चन्द्रं कर्पूरम्॥ २५५ ॥

अथाश्वगंवातचिकित्सामाह एकभाग इत्यादि। रसस्येति भस्मसूतस्य गुडिकां गुडत इति सर्वचूर्णापेक्षया गुडस्य द्वैगुण्यम्। मात्रास्य तोलकैकपरिमिता ॥ २५६ ॥

हीरं सुवर्णं सुमृतञ्च तार
मेषां समं तीक्ष्णरजश्चतुर्णाम् ।
समं मृताभ्रं रससिन्दुरञ्च
निष्पिष्टतीक्ष्णस्य तथाश्मनोवा ॥
खल्वे द्रवेणैव कुमारिकाया
गुञ्जाप्रमाणां वटीकां प्रकुर्य्यात् ।
त्रैलोक्यचिन्तामणिरेष नाम्ना
संपूज्य सम्यग्गिरिजां दिनेशम् ॥
हन्त्यामयान् योगशतैर्विवर्ज्यान्
मयप्रणाशाय मुनिप्रणीतः ।
अस्य प्रसादेन गदानशेषान्
जरां विनिर्जित्य सुखं विभाति ॥

स्निग्धे श्लेष्मन्यार्द्रकस्य रसेन पाययेत् सुधीः ।
शुष्के च माक्षिकेनैव पित्ते घृतसितायुतम् ॥
श्लेष्मणि मारुते सम्यग्दुष्टे च समतां गते ।
कणाचूर्णं क्षौद्रयुतं प्रमेहे दुग्धसंयुतम् ॥
बलवर्णाग्निजननः कासघ्नः कफवातजित् ।
आयुःपुष्टिकरो वृष्यः सर्वरोगनिसूदनः ॥

तारशब्देनात्र शुद्धमौक्तिकमेवोच्यते न तु रजतम् ।
हीरं स्वर्णं सुशुद्धञ्च मौक्तिकमिति पाठान्तरदर्शनात् ॥

त्रैलोक्यचिन्तामणिरसः ॥ २५७ ॥

इति वातव्याध्यधिकारः ।

——

अथ कफरोगचिकित्सा।

रसस्य द्विगुणं गन्धं गन्धकाद्द्विगुणं विषम् ॥
विषात्तु द्विगुणं देयं चूर्णं त्रिकटुसम्भवम् ।
रसतुल्या प्रदातव्या चाभया सविभीतकी ॥
धात्रीपुष्करमूलञ्च चाजमोदाजगन्धिका ।
विड़ङ्गं कटफलं चव्यं पञ्चैव लवणानि च ॥
लवङ्गं त्रिवृता दन्ती सर्वमेकत्र चूर्णयेत् ।
भावयेत् सप्तधा रौद्रे स्वरसैः सुरसोद्भवैः ॥
हन्ति सर्वं कफोद्भूतं व्याधिं कालानलोरसः ।

श्लैष्मकालानलोरसः ॥ २५८॥

पारदं गन्धकं लौहं चूर्णं जीरकद्वयम् ।
शृङ्गी शठी यमानी च पौष्करञ्चार्द्रकन्तथा ॥
गैरिकं यावशूकञ्च कटफलं गजपिप्पली ।
जातीकोषाजमोदा च वरा यास लवङ्गकम् ॥

त्रैलोक्यचिन्तामणिरसे हीरं हीरकं तारं मौक्तिकम् । समभिति सम-भागं चतुर्णां समं स्वताभ्रमिति एषां चतुर्णां समं भस्माभ्रं योज्यम्। रससिन्दूरञ्चाभ्रतुल्यं एतत्सर्वमेकीकृत्य लौहखल्ले पाषाणखल्ले वा कुमारिकारसे निष्पीड्य गुञ्जामात्रा वटिका कार्या ॥ २५७ ॥

इति वातव्याधिचिकित्सा ।

दोषत्व सामान्यात् वातपित्तकफानामिति वातरोगचिकित्सामभि-धाय इदानीं कफरोगचिकित्सामाह रसस्येति द्विगुणं देयं चूर्णं त्रिकटुसम्भवमिति त्रिकटुचूर्णं मिलित्वा विषात् द्विगुणं देयं, अज-गन्धिका वर्वरीति ख्याता ॥ २५८ ॥

कणकारुणबीजानि कट्फलं चव्यकं तथा।
प्रत्येकन्तोलकञ्चैषां श्लक्ष्णचूर्णानि कारयेत्॥
पाषाणे विमले खल्ले घृष्टं पाषाणमुद्गरैः।
बिल्वमूलरसं दत्वा चार्द्रं चित्रफलत्त्रिका॥
वासा निर्गुण्डी गणिका चेन्द्राशनं प्रचोदनी।
धूस्तूरं कृष्णजीरञ्च पारिभद्रक पिप्पली॥
एतेषाञ्च रसैर्मर्द्दयमार्द्रकैश्च विभावयेत्।
उष्णतोयानुपानेन सर्वव्याधिं विनाशयेत्॥
विंशतिं श्लैष्मिकान् रोगान् सन्निपातभवान् गदान्।
उदराष्टकदुर्नामममामवातञ्च दारुणम्॥
पञ्चपाण्ड्वामयान् दोषान् क्रिमिं स्थौल्यमथोन्नृणाम्।
यथा शुष्केन्धने वह्निस्तथैवाग्निविवर्द्धनः॥

श्लेष्मशैलेन्द्रोरसः॥ २५८॥

हिङ्गुलसम्भवं सूतं शिलागन्धकटङ्कणम्।
ताम्रं वङ्गं तथाभ्रञ्च स्वर्णमाक्षिकतालकम्॥
धूस्तूरं सैन्धवं कुष्ठं हिङ्गु पिप्पली कट्फलम्।
दन्तीबीजं सोमराजी वनराजफलत्त्रिवृत्।
वज्रीक्षीरेण संमर्द्य वटिकां कारयेद्भिषक्।
कलायपरिमाणान्तु खादेदेकां यथाबलम्॥
सन्निपातं निहन्त्याशु वृत्रमिन्द्राशनिर्यथा।
मदसिंहो यथारण्ये मृगाणां कुलनाशनः॥

श्लेष्मशैलेन्द्ररसे त्रूषणं त्रिकटु, यावन्मूकं यवक्षारं वरा त्रिफला वासो दुरालभा, कणकबीजं धूस्तूरबीजम्। इन्द्राशनस्त्रैलोक्यविजयायाः॥ २५८॥

तथायं सर्वरोगानां सद्यो नाशकरोमहान्।

महाग्निमकालानलोरसः।

पलं वज्राभ्रचूर्णस्य तदर्द्धं गन्धकं भवेत्। *
तदर्द्धं वङ्गभस्मापि तदर्द्धं पारदन्तथा॥
तत्समं हरितालञ्च तदर्द्धं ताम्रभस्मकम्।
रससाम्यञ्च कर्पूरं जातीकोषफले तथा॥
वृद्धदारकवीजञ्च वीजं स्वर्णफलस्य च।
प्रत्येकं कार्षिकं भागं मृतस्वर्णञ्च शाणकम्॥
निष्पिष्य वटिका कार्य्या द्विगुञ्जाफलमानतः।
निहन्ति सन्निपातोत्थान् गदान् घोरान् सुदारुणान्॥
गलोत्थानन्त्रवृद्धिञ्च तथातिसारमेव च॥
कुष्ठमेकादशविधं प्रमेहान् विंशतिन्तथा।
श्लीपदं कफवातोत्थं चिरजं कुलजन्तथा॥
नाड़ीव्रणं व्रणं घोरं गुदामयभगन्दरम्।
कासपीनसयक्ष्मार्शः स्थौल्यदौर्गन्ध्यरक्तनुत्॥
आमवातं सर्वरूपं जिह्वास्तम्भं गलग्रहम्।
उदरं कर्णनासाक्षिमुखवैजाड्यमेव च॥
सर्वशूलं शिरःशूलं स्त्रीरोगञ्च विनाशयेत्।
वटिकां प्रातरेकैकां खादेन्नित्यं यथावलम्॥
अनुपानमिहप्रोक्तं मांसं पिष्टं पयोदधि।
वारिभक्तं सुराशीधुसेवनात् कामरूपधृक्॥
वृद्धोपि तरुणस्पर्द्धी नच शुक्रक्षयो भवेत्।

---

* तदर्द्धौ गन्धपारदौ इत्यपि पाठः साधीयान्। तदर्द्धं पारदं तथा इत्यत्र तदर्द्धं तारकन्तथेति पाठः व्यवहारस्तु अर्द्धं गन्धकपारदेनैव।

नच लिङ्गस्य शैथिल्यं न केशा यान्ति पक्वताम् ॥
नित्यं गच्छेच्छतं स्त्रीणां मत्तवारणविक्रमः।
द्विलक्षयोजनी दृष्टिर्जायते पौष्टिकस्तथा ॥
प्रोक्तः प्रयोगराजोयं नारदेन महात्मना।
रसोलक्ष्मीविलासोयं वासुदेवो जगत्पतिः ॥
प्रसादादस्य भगवान् लक्षनारीषु वल्लभः।

महालक्ष्मीविलासः ॥ २६० ॥

टङ्कणं मागधी शङ्खं वत्सनाभं समं समम्।
आर्द्रकस्य रसेनापि भावयेद्दिवसत्रयम् ॥
गुञ्जामात्रं प्रदातव्य मार्द्रकस्य रसेन वै।
पीनसं श्वासकासञ्च गलरोगं गलग्रहम् ॥
दन्तरोगं कर्णरोगं नेत्ररोगं सुदारुणम्।
सन्निपातं निहन्त्याशु कफकेतुरसोत्तमः ॥

कफकेतुरसः ॥ २६१ ॥

हिङ्गुलेन्द्रयवं टङ्कं त्रैलोक्यवीजमेव च।
मरिचञ्च समं सर्वं त्रिभागं रससिन्दूरम् ॥
आर्द्रकस्य रसेनैव मर्द्दयेद्यामसात्रकम्।
चणकाभावटीकार्य्या सर्ववातप्रशान्तये ॥
कफरोगं निहन्त्याशु भास्करस्तिमिरं यथा।

कफचिन्तामणिरसः ॥ २६२ ॥

इति कफरोगाधिकारः।

महालक्ष्मीविलासे स्वर्णफलस्य धुस्तूरफलस्य ॥ २६० ॥
कफकेतुरसे मागधी पिप्पली ॥ २६१ ॥

अथ पित्तरोगाधिकारः ।

गुडूचीसारसंयुक्तं त्रिकत्रययुतन्त्वयः ॥
वातरक्तं निहन्त्याशु सर्ववातहरं परम् ।

गुडूच्यादिलौहम् ॥ २६३ ।

धात्रीचूर्णस्याष्टौ पलानि चत्वारि लौहचूर्णस्य ।
यष्टीमधुकरजश्च द्विपलं दद्यात् पुटे दृष्टम् ॥
धात्र्याश्च क्वाथेन तच्चूर्णं भाव्यञ्च सप्ताहम् ।
चण्डातपेन संशुष्कं भुयः पिष्टं घटे स्थितम् ॥
घृतेन मधुना युक्तं भोजनाद्यन्तमध्यतः ।
त्रीन् वारान् भक्षयेन्नित्यं पथ्यं दोषानुबन्धतः ॥
भक्तस्यादौ नाशयेच्च दोषान् पित्तकृतानपि ।
मध्ये चानाहविष्टब्धन्तथान्ते चाग्निमान्द्यताम् ॥
रक्तपित्तसमुद्भूतान्रोगान् हन्ति न संशयः ।

धात्रीलौहम् ॥

जातीकोषफलेमांसी कुष्ठं तालीशपत्रकम् ।
माक्षिकं मृतलौहञ्च अभ्रं दिव्यं समांशिकम् ॥
सर्वतुल्यं मृतं तारं सर्वं निष्पिष्य वारिणा ।
द्विगुञ्जाभावटीकार्य्या पित्तरोगविनाशिनी ॥

कफचिन्तामणिरसो त्रैलोक्यविजयावीजं शक्राशनवीजम् ॥ २६१ ।

इति कफरोगचिकित्सा ।

प्रागुक्तरीत्या कफरोगानन्तरं पित्तरोगचिकित्सामाह गुडूचीत्यादि

गुडूचीसारं गुडूचीसत्त्वं अत्र सर्वसमं लौहं प्रदेयम् ॥ २६२ ॥

कोष्ठाश्रितञ्च यत् पित्तं शाखाश्रितमथापि वा।
शूलञ्चैवाम्लपित्तञ्च पाण्डुरोगं हलीमकम्।
दुर्नामं भ्रान्तिवान्तिञ्च क्षिप्रमेव विनाशयेत्॥
रसःपित्तान्तकोह्येष काशीराजेन भाषितः।

पित्तान्तकोरसः॥ २६४॥

यदात्रमाक्षिकं त्यक्त्वा सुवर्णमपि दीयते।
महापित्तान्तकोनाम सर्वपित्तविनाशनः॥

महापित्तान्तकोरसः।

इति पित्तरोगचिकित्सा।

अथ वातरक्तचिकित्सा।

विशुद्धलाङ्गलीमूलत्रिकटुत्रिफलैस्तथा॥
द्राक्षा गुग्गुलुभिस्तुल्यं लौहचूर्णं नियोजयेत्।
मातुलुङ्गरसेनैव त्रिफलाया रसेन च॥
विमृद्य यत्नतः पश्चात् गुडिकां कोलसम्मिताम्।
भक्षयेन्मधुना सार्द्धं शृणुकुर्वन्ति यान् गुणान्॥
आजानुस्फुटितं घोरं सर्वाङ्गस्फुटितन्तथा।
तत्सर्वं नाशयत्याशु साध्यासध्यञ्च शोणितम्॥

लाङ्गलाद्यं लौहम्॥ २६५॥

पित्तान्तकरसे फलं जातीफलं तारं रौप्यम्॥ २६४॥

इति पित्तरोगचिकित्सा।

पित्तजनितरक्तदुष्टिसाधर्म्यात् पित्तरोगानन्तरं वातरक्तचिकित्सा-माह। लाङ्गलादिलौहे सर्वचूर्णसमं लौहम्॥ २६५॥

गन्धकं पारदं लौहं शिला तालं घनन्तथा।
शिलाजतु पुरं शुद्धं समभागञ्चूर्णयेत् ॥
श्वेतापराजिता दार्वी वागुजी चित्रकं तथा।
पुनर्नवा देवकाष्ठत्रिफलाव्योषवेल्लकम् ॥
चूर्णमेषां पृथक् तुल्यं सर्वमेकत्र कारयेत्।
त्रिफला भृङ्गराजस्य रसेनैव त्रिधा त्रिधा ॥
भावयेच्चर्वयेत् पश्चात् चणमात्रं दिने दिने।
ततोनुपानं निम्बस्य पत्रं पुष्पं त्वचं समम् ॥
शाणमात्रं घृतैः कुर्य्यात् सर्ववातविकारनुत्।
वातरक्तं महाघोरं गम्भीरं सर्वजञ्च यत् ॥
सर्वोपद्रवसंयुक्तं साध्यासाध्यं निहन्त्यलम्।

वातरक्तान्तकोरसः ॥ २६६ ॥

हरितालं पलं शुद्धं तथा कर्षं विषस्य च।
श्वेताङ्कोठरसेनैव द्वयमेवाच खल्लयेत् ॥
पलाशभस्मद्विपलं निधाय स्थालिकोपरि।
तद्भस्मोपरितालस्यगोलकं स्थापयेत् सुधीः ॥
तस्योपरि अपामार्गभस्म दद्यात् पलत्रयम्।
स्थालीमुखे शरावञ्च दद्याद्यत्नेन लेपयेत् ॥
लेपयित्वा ततश्चुल्ल्यामहोरात्रं पचेद्भिषक्।
ततस्तु जायते भस्म शुद्धकर्पूरसन्निभम् ॥
गुञ्जात्रयं ततोभक्ष्यमनुपानविशेषतः।

वातरक्तान्तकरसे घनमभ्रम्। पुरं गुग्गुलुः। वागुजी सोमराजी।
चूर्णमेषां पृथक् तुल्यमिति प्रत्येकं पारदसममित्यर्थः ॥ २६६ ॥

वातरक्तञ्च कुष्ठञ्च दद्रुविस्फोटकापचीम् ॥
विचर्च्चिकां चर्म्मदलं वातरक्तञ्च शोणितम्।
रक्तपित्तं तथा शोथं गलत्कुष्टं विनाशयेत् ॥
इलीमकं तथा शूलमग्निमान्द्यमरोचकम्।

तालभस्म ॥

तथा सिद्धेन तालेन गन्धतुल्येन मेलयेत्।
द्वयोस्तुल्यं जीर्णताम्रं वालुकायन्त्रगं पचेत् ॥
अयं तालेश्वरोनामरसः परमदुर्लभः।
हन्यात् कुष्ठानि सर्वाणि वातरक्तमथापि च ॥
शूलमष्टविधं श्वित्रं रसस्तालेश्वरोमहान्।

महातालेश्वरोरसः ॥

रसाद्दश विषात् पञ्च गन्धकाद्दश शोधितात्।
तुत्थाद्दश पलाशस्य वीजेभ्यः पञ्च कारयेत् ॥
रुद्राश्वमारधुस्तूरं करहाटक नीलीतः।
दशकं दशकं कुर्य्याच्छोषयित्वा जटात्वचः ॥
दशकं दशकं दत्वा कुचिलाद्दश नूतनात्।
भल्लातकाच दशकं चूर्णयित्वा भिषक् ततः ॥
सुदिने च वलिं दत्वा वैद्यः पूजापरायणः।
रक्तिकाद्वितयं दद्यात् सहते यदि वा त्रयम् ॥
वातरक्तं ज्वरं कुष्ठं खरस्पर्शमसौख्यदम्।
आजानुस्फूटितं हन्ति विषजं वाग्निनिःसृतम् ॥
कुष्ठमष्टादशविधमग्निमान्द्यमरोचकम्।
विश्वेश्वरो रसोनाम विश्वनाथेन भाषितः।

विश्वेश्वरोरसः ॥ २६७ ।

वच्यते कुष्ठरोगे यदौषधं भिषजां वरैः।
वातरक्ते प्रयुञ्जीत कुर्य्याच्च रक्तमोक्षणम्॥
इति रसेन्द्रसारसंग्रहे वातरक्ताधिकारः।

अथ ऊरुस्तम्भाधिकारः।

निष्कत्रयं शुद्धसूतं निष्कद्वादशगन्धकम्।
गुञ्जाबीजञ्च षड्निष्कं जयन्ती निम्बबीजकम्।
प्रत्येकं निष्कमात्रन्तु निष्कं जैपालबीजकम्।
जया जम्बीरधूस्तूरकाकमाचीद्रवैर्द्दिनम्।
भावयित्वा वटीं कुर्य्यात् चतुर्गुञ्जाप्रमाणतः।
गुञ्जाभद्ररसोनाम हिङ्गुसैन्धवसंयुतः।
शमयत्युल्वनं दुःखमूरुस्तम्भं सुदारुणम्।

गुञ्जाभद्ररसः॥ २६८॥

शिलाजतु गुग्गुलं वा पिप्पलीमथनागरम्।
ऊरुस्तम्भे पिवेन्मूत्रैर्दशमूलीरसेन वा॥
शोथाधिकारे कथितं रसेन्द्रं वारिशोषणम्।
ऊरुस्तम्भे प्रयुञ्जीत चान्यद्वा योगवाहिकम्।
इति रसेन्द्रसारसंग्रहे ऊरुस्तम्भाधिकारः।

विश्वेश्वररसे चुक्रा कण्टकारी अश्वमारः करवीरः करहाटः इति नुरौवि ख्याता बता॥ २६७॥

इति वातरक्ताधिकारः।

आढ्यवातसाधर्म्यादिहातरक्तानन्तरमूरुस्तम्भचिकित्सामाह।
गुञ्जाभद्ररसे गुञ्जाबीजं श्वेतगुञ्जाबीजम्॥ २६८॥

ऊरुस्तम्भाधिकारः।

अथ आमवाताधिकारः।

रसगन्धकलौहाभ्रं तुल्यं टङ्कणसैन्धवम्।
समभागं विचूर्ण्याथ चूर्णाद्द्विगुणगुग्गुलुः।
गुग्गुलोः पादिकं देयं त्रिवृतामूलवल्कलम्।
तत्समं चित्रकं देयं घृतेन परिमर्द्दयेत्॥
खादेन्माषद्वयञ्चास्य त्रिफलाचूर्णयोगतः।
आमवातारिवटिका पाचिका भेदिकामता॥
आमवातं निहन्त्याशु गुल्मशूलोदराणि च।
यकृत् प्लीहोदराष्ठीला कामला पाण्डुरोचकान्॥
ग्रन्थिशूलं शिरःशूलं वातरोगञ्च गृध्रसीम्।
गलगण्डं गण्डमालां क्रिमि कुष्ठभगन्दरान्॥
विद्रधिमन्त्रवृद्धिञ्च अर्शांसि गुदजानि च।
आमवातारिवटिका पुरेशानेन चोदिता॥

आमवातारिवटिका॥ २६८॥

रसगन्धौ वराबह्नि गुग्गुलुः क्रमवर्द्धितः।
एतदेरण्डतैलेन मर्द्दयेद्वर्तिचक्कणम्॥
कर्षोऽस्यैरण्डतैलेन हन्तुष्णजलपायिनः।
आमवातमतीवोग्रं दुग्धं मौद्गादिवर्जयेत्॥

अपरामवातारिवटिका॥

शुद्धगन्धं पलार्द्धञ्च मृतताम्रञ्च तत्समम्।

आमवातजन्यत्वसामान्याद्दूरुस्तम्भानन्तरमामवातचिकित्सामाह।
आमवातारिवटिकायां चूर्णाद्द्विगुणगुग्गुलु इति गुग्गुलोः सर्व-
चूर्णाद्द्विगुणत्वम्। २६८॥

ताम्रार्द्धं पारदं शुद्धं रसतुल्यं मृतायसम्॥
सर्वं पञ्चाङ्गुलेनैव भावयेच्च पुनः पुनः।
संचूर्ण्य पञ्चकोलोत्थैः क्वाथैः सर्वं विभावयेत्।
रौद्रे विंशतिवारांश्च गुडूचीनां रसैर्दृश।
मृष्टटङ्कणचूर्णेन तुल्येन सह मेलयेत्॥
टङ्कणार्द्धं विड़ं देयं मरिचं विड़तुल्यकम।
तिन्तिड़ीचारतुल्यञ्च सूततुल्यञ्च दन्तिकम्।
त्रिकटुत्रिफलञ्चैव लवङ्गञ्चार्द्धभागिकम्।
आमवातेश्वरोनाम विष्णुना परिकीर्त्तितः।
महाग्निकारकोह्येष आमवातान्तकोमतः।
स्थूलानां कर्षणः श्रेष्ठः कृशानां स्थौल्यकारकः॥
अनुपानविशेषेण सर्वरोगविनाशनः।
अनेन सदृशो नास्ति वह्निदीप्तिकरो महान्।
गुल्मार्शो ग्रहणीदोष शोथपाण्डुरुजापहः।

आमवातेश्वरोरसः॥ २७०॥

वृद्धदारान्तिहृद्दन्तो गजपिप्पलीमानकैः।
त्रिकत्रयसमायुक्तै रामवाताभ्रकान्तयः॥
सर्वानेव गदान् हन्ति केशरी करिणो यथा।

वृद्धदाराद्यं लौहम्॥ २७१॥

आमवातेश्वररसे गन्धादिसर्वं पञ्चाङ्गुलरस इतेरण्डमूलरसे पुनः पुनरिति सप्तवारं भावयेत् ततः संचूर्ण्य पञ्चकोलक्वाथैर्विंशतिवारान् भावयेत्। ततः टङ्कणादिसर्वं योज्यम्॥ २७०॥

शिवाविभीतामलकीफलानां प्रत्येकशो मुष्टिचतुष्टयञ्च।
तोयाढ़के तत् क्वथितं विधाय पादावशेषेत्ववतारणीयम्॥
एरण्डतैलं द्विपलं निधाय पिचुत्रयं गन्धकनामकस्य।
पचेत् पुरस्यात्र पलद्वयञ्च पाकावशेषे च विचूर्ण्य दद्यात्॥
रास्ना विड़ङ्गं मरिचं कणा च दन्तीजटानागरदेवदारु।
प्रत्येकशः कोलमितं तथैषां विचूर्ण्य निःक्षिप्य नियोजयेच्च॥

आमवाते कटीशूले गृध्रसीक्रोष्टुशीर्षके।
न चान्यदस्ति भैषज्यं यथायं गुग्गुलुः स्मृतः॥

शिवागुग्गुलुः। २७२।

शुण्ठीचूर्णस्य प्रत्येकं यमान्याश्च पलाष्टकम्।
जीरकस्य पले द्वे च धन्याकञ्च पलद्वयम्॥
पलैकं शतपुष्पाया लवङ्गस्य पलन्तथा।
टङ्कणस्य पलं भृष्टं मरिचस्य पलानि च॥
त्रिवृता त्रिफला क्षार पिप्पलीनां पलन्तथा।
शठ्येला तेजपत्रञ्च चविकानां पलन्तथा॥
अभ्रं लौहं तथा वङ्गं प्रत्येकञ्च पलं पलम्।
एतेषां सर्वचूर्णानां खण्डं दद्यात् गुणत्रयम्॥
घृतेन मधुनामिश्रं कर्षमात्रन्तु मोदकम्।

हङ्कारादिलौहे त्रिहदि ... त्रिहच्चूलम्। मानकन्दं पुरायं प्राह्यं अत्र सर्वसमं लौहं प्रदेयम्॥ २७१॥

शिवागुग्गुलौ शिवा हरीतकी, मुष्टिच ... त्रि-
त्रयमिति तोलकषटकम्। पुरस्य गुग्गुलोः। प्र... कोलमिति प्रत्येकं तोलकमितम्॥ २७२॥

एकैकं भक्षयेत् प्रातर्घृतञ्चानुपिबेत् पयः॥
शूलघ्नो रक्तपित्तघ्नश्चाम्लपित्तविनाशनः।
आमवातकुलध्वंसी केशरी विधिनिर्मितः॥

आमवातगजसिंहमोदकः॥ २७३॥

रामबाणोरसो देयो योगवाहिरसेन्द्रकः।
आमवाते विधीयन्ते सानुपानैः प्रयत्नतः॥
इति रसेन्द्रसारसंग्रहे आमवाताधिकारः।

——

अथ शूलरोगचिकित्सा।

मधुकं त्रिफलाचूर्णं मयोरजः समं लिहन्।
मधुसर्पिर्युतं सम्यक् गव्यक्षीरं पिबेदनु॥
छर्दिं सतिमिरं शूलमम्लपित्तं ज्वरारुचिम्।
मूत्रकृच्छ्रं तथा मेहं हन्यादेतन्न संशयः॥

सप्तामृतलौहम्। २७४॥

तीक्ष्णायश्चूर्णसंयुक्तं त्रिफलाचूर्णमुत्तमम्।

आमवातगजसिंहमोदके आदौ खण्डं किञ्चिज्जलञ्च संमिश्र मृदग्निसन्तापे उष्णीकृतं ततश्चूर्णादिसर्वं प्रक्षिप्य मोदकवत् पचेत्। घृतमधुनी तु प्रक्षेप्ये॥ २७३॥

...मवाताधिकारः।

आमवाते ... भवतीत्यनन्तरं शूलचिकित्सामाह मधुकमित्यादि तुल्यान्... मयोरज इति सर्वद्रव्यसमं लौहमित्यर्थः। २७४॥

क्षीरेण पाययेद्धीमान् सद्यः शूलनिवारणम् ॥

त्रिफलालौहम् ॥ २७५ ॥

अभ्रं ताम्रं रसं लौहं गन्धकं संस्कृतं पलम् ।
सर्वमेतत् समाहृत्य यत्नतः कुशलो भिषक् ॥
आज्ये पले द्वादशके दुग्धे वत्सरसंख्यके ।
पक्त्वा तत्र क्षिपेत् चूर्णं सुपूतं घनवाससा ॥
विडङ्गत्रिफलावह्नि त्रिकटूनां तथैव च ।
पिष्ट्वा पलोन्मितानेतानथ संमिश्रतान् नयेत् ॥
ततः पिष्ट्वा शुभे भाण्डे स्थापयेच्च विचक्षणः ।
आत्मनः शोभनेऽचाह्नि पूजयित्वा रविं गुरुम् ॥
घृतेन मधुनालोड्य भक्षयेन्माषकादिकम् ।
अष्टौ माषान् क्रमेणैव वर्द्धयेच्च समाहितः ॥
अनुपानं प्रयोक्तव्यं नारीकेलजलं पयः ।
जीर्णे लोहितशाल्यन्नं मुद्गमांसरसस्तथा ॥
भक्षयेत् घृतसंयुक्तं सद्यः शूलाद्विमुच्यते ।
हृच्छूलं पार्श्वशूलञ्च आमवातं कटीग्रहम् ।
गुल्मशूलं शिरःशूलं योगेनानेन नाशयेत् ।

चतुःसमलौहम् ॥ २७६ ॥

मृतसूताभ्रकं चाम्लवेतसं ताम्रगन्धकम् ।

त्रिफलालौहे त्रिफलाचूर्णं समं लौहम् ॥ २७५ ॥

चतुःसमलौहे अभ्रादिलौहान्तं द्रव्यचतुष्कं प्रत्येकं पलम् । दुग्धे वत्सरसङ्ख्यके इति द्वादशपले दुग्धे । विडङ्गादीनामष्टद्रव्याणां चूर्णं मिलित्वा पलं पाके निष्पत्तौ प्रक्षिपेत् ॥ २७६ ॥

विषं फलत्रयाच्चूर्णं तुल्यं मर्द्यं दिनावधि।
जयन्ती मुण्डिरी वासा वृहती च गुडूचिका।
महाराष्ट्री जम्बुरसैस्तथा नीलोत्पलस्य च॥
प्रतिद्रावैर्दिनं भाव्यं ततः संशोष्य यत्नतः।
अर्द्धांशं पञ्चलवणं दत्वार्द्रकरसेन च।
दिनं पेष्यं ततः कुर्य्यात् वटीकां चणसन्निभाम्।
प्रातर्मध्याह्ने रात्रौ च भक्षयेद्वटिकात्रयम्।
माषेक्षुपिष्टगुर्वन्नं गोपयश्च हितं तथा।
सेवेत वातशूलार्त्तश्चायं पञ्चाम्लकः स्मृतः॥

पञ्चाम्लकोरसः॥ २७७।

कुडवं शुद्धमण्डूरं यवञ्च कुडवन्तथा।
पाकार्थञ्च जलं प्रस्थं चतुर्भागावशेषितम्।
शतावरीरसस्याष्टावामलक्या रसस्य च।
तथा दधिपयो भूमिकुष्माण्डस्य चतुःपलम्॥
चतुःपलमिक्षुरसं दद्यात् तत्र विचक्षणः।
प्रक्षिपेत् जीरकं धान्यं त्रिजातं करिपिप्पली॥
मुस्तं हरीतकीचैव अभ्रं लौहं कटुत्रयम।
रेणुका त्रिफलाचैव तालीशं स्वर्णकेशरम्।
कटुकं मधुकं रास्ना चाश्वगन्धा च चन्दनम।
एतेषां कार्षिकं भागं चूर्णयित्वा विनिःक्षिपेत॥
भोजनाद्यवसाने च मधेश्चैव समाहितः।

पञ्चाम्लकरसे महाराष्ट्री ब्रह्मयष्टि, अर्द्धांशं पञ्चलवणमिति सर्वंत्र ग्रन्थापेक्षया लिखितं मद्वित्तवणमर्द्धांशम्॥ २७७॥

ी गगवेणवन्तु०

तोलैकं भक्षयेन्नित्यं अनुपानं पयस्तथा ॥
शूलमष्टविधं हन्ति साध्यासाध्य मथापिवा।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ॥
परिणामसमुत्थञ्च अन्नद्रवभवन्तथा।
सर्वशूलहरं श्रेष्ठं धात्रीलौहमिदं शुभम् ॥

धात्रीलौहम् ॥ २७८ ॥

कर्षैकं कान्तलौहस्य शुद्धमभ्रं पलन्तथा।
सितायाश्च पलञ्चैकं मधुसर्पिस्तथैव च ॥
सममेकीकृतं पात्रे लौहदण्डेन मर्द्दयेत्।
त्रिकटु त्रिफला मुस्तं विडङ्गं चव्यचित्रकम् ॥
प्रत्येकं तोलकं मानं चूर्णितं तत्र दापयेत्।
भक्षयेत् प्रातरुत्थाय शिशिराम्ब्वनुपानतः ॥
सर्वदोषभवं शूलं कुक्षिशूलञ्च यत् भवेत्।
हृच्छूलं पार्श्वशूलञ्च अम्लपित्तञ्च नाशयेत् ॥
अर्शांसि ग्रहणीदोषं प्रमेहांश्च विसूचिकाम्।
शूलराजमिदं लौहं हरेण परिनिर्मितम् ॥

शूलराजलौहम्।

विड‌ङ्गमुस्तत्रिफलागुडूचीदन्तीत्रिवृच्चित्रकटुत्रयञ्च ॥
प्रत्येकमेषां पिचुभागचूर्णं पलानि चत्वार्य्ययसोमलस्य।
गोमूत्रशुद्धस्य पुरातनस्य यद्वायसस्तानि शिवाटिकायाः ॥

धात्रीलौहे कुड़वपरिमित यवस्य क्वाथे मण्डूरं शतावरीरसादींश्च प्रक्षिप्य पचेत्। पाकशेषे जीरकादिचूर्णं प्रक्षेप्यम्। त्रिजातं त्रिग्रन्धि। स्वर्णकेशरं नागकेशरम् ॥ २७८ ॥

कृष्णाभ्रचूर्णस्य पलं विशुद्धं निश्चन्द्रकं शुद्धमतीवसूतात्।
पादोनकर्षं स्वरसेन खल्ले शिलातले थानकुनीदलस्य॥
संमर्द्य पश्चादतिशुद्धगन्धपाषाणचूर्णेन पिचुम्मितेन।
युक्त्या ततः पूर्वरजांसि दत्वा सर्पिर्मधुभ्यामवमर्द्य यत्नात्॥
निधापयेत् स्निग्धविशुद्धभाण्डे ततः प्रयोज्यास्य रसायनस्य।
प्राश्माषकोवाप्यथवा द्वितीयो गव्यं पयोवा शिशिरं जलम्बा॥
पिवेदयं योगवरःप्रभुतकालप्रणष्टानलदीपकश्च।
रोगं निहन्यात् परिणामशूलं शूलं तथान्नद्रवसंज्ञकञ्च॥
यक्ष्माम्लपित्तं ग्रहणीं प्रवृद्धां जीर्णज्वरं लोहितपित्तकञ्च।
नश्यन्ति ते यान् न निहन्ति रोगान् योगोत्तमः
सम्यगुपास्यमानः॥

विद्याधराभ्रम्॥ २७९।

शुद्धसूतं तथा गन्धं फलत्रय कटुत्रयम्।
विडङ्गमुस्तकञ्चैव त्रिवृतादन्तीचित्रकम्॥

विद्याधराभ्रे विड़ङ्गादिकटुत्रयान्तानां द्वादशद्रव्याणां प्रत्येकं पिचुः कर्षः उपलक्षणत्वात् पलम्वा यद्वायस्त्वानि शिवाटिकाया इति यद्वा लौहस्य चत्वारि पलानि अथवा लौहपत्रिकायाः चत्वारि पलानि। सूतात्पादो न कर्षमिति पादहीनकर्षं चतुर्दशमाषकमित्यर्थः। थानकुनीरसेन पारदं संशोध्य संमर्द्य पश्चात् गन्धकचूर्णं कर्षमितं दत्वा संमर्द्य च विड़ङ्गादिचूर्णं प्रक्षिप्य घृतभाण्डे स्थापनीयं ततो लौहपात्रे लौहदण्डेन घृत मधुभ्यां माषैकं पुरुषापेक्षया माषद्वयं वा संमर्द्य लिह्यात्। चतुःषष्टिगुणं गव्यदुग्धं शिशिरतोयं वा अनुपेयम्॥ २७९॥

आखुपर्णी ग्रन्थिकञ्च प्रत्येकं कर्षसम्मितम्।
पलं कृष्णाभ्रचूर्णस्य मृतायस्य चतुर्गुणम्॥
घृतेन मधुना पिष्ट्वा वटिकां कोलसम्मिताम्।
एकैकां वटिकां खादेत् प्रातरुत्थाय नित्यशः॥
अनुपानं गवां क्षीरं नीरं वा नारिकेलजम्।
सर्वशूलं निहन्त्याशु वातपित्तभवन्तथा॥
एकजं द्वन्द्वजञ्चैव तथैव सान्निपातिकम्।
परिणामोद्भवं शूलमामवातोद्भवन्तथा॥
कार्श्यं वैवर्ण्यमालस्यं तन्द्रारुचि विनाशनम्।
साध्यासाध्यं निहन्त्याशु भास्करस्तिमिरं यथा॥

बृहद्विद्याधराभ्रम्॥ २८०॥

शुद्धसूतं तथा ताम्रं शिलामाक्षिकतालकम्।
रजतं स्वर्णवङ्गञ्च लौहमभ्रं सनागरम्॥
चूर्णयेत् पञ्चलवणं देयं सर्वत्र तत्समम्।
गन्धकं मिश्रयेत् सर्वं रसैरेषां विभावयेत्॥
शुण्ठी जयन्ती विजया महाराष्ट्रिकधूस्तजैः।
सर्वाङ्गसुन्दरोनाम्ना रसोयं विष्णुनिर्म्मितः॥
खादेदेरण्डशुण्ठीभ्यां माषमात्रं दिने दिने।
कफवातामयं हन्ति चानुपानं वदाम्यहम्॥
व्योषं सौवर्च्चलं हिङ्गु करञ्जबीजसंयुतम्।

बृहद्विद्याधराभ्रे ग्रन्थिकं पिप्पलीमूलं अनुपानं गवां क्षीरमिति चतुःषष्टिगुणम्॥ २८०॥

पिबेदुष्णाम्बुनाचानु सर्वशूलनिकृन्तनम्।

सर्वाङ्गसुन्दरोरसः।

रसगन्धकलौहानां पलार्द्धेन समन्वितम्।
त्रिफला रामठं शुल्वं त्रिकटु शठी टङ्कणम्॥
पत्रं त्वगेला तालीश जातीफललवङ्गकम्।
यमानी जीरकं धान्यं प्रतैकं तोलकं शुभम्॥
माषैका वटिकाकार्य्या छागीदुग्धेन वा पुनः।
एकैका भक्षिता चेयं वटिकाशूलवज्रिणी॥
शूलमष्टविधं हन्ति प्लीहगुल्मोदरन्तथा।
अम्लपित्तामवातञ्च पाण्डुत्वं कामलान्तथा॥
शोथं गलग्रहं वृद्धिं श्लीपदं सभगन्दरम्।
वृद्धबालकरीचैव मन्दाग्नेरपि दीपनी॥

शूलवज्रिणीवटिका।

भागोरसस्याश्महेम्नः भागो ग्राह्यस्तियत्नतः
तयोर्द्वादशभागानि ताम्रपत्राणि लेपयेत्।
पचेत् शूलहरः सूतो भवेत् त्रिपुरभैरवः।
माषोमध्वाज्यसंयुक्तो देयोऽस्य परिणामजे॥
अनेनत्वेरण्डतैलेन हिङ्गुलय युतो रसः।

त्रिपुरभैरवः॥ २८१॥

रसबलिगगनार्कं वेतसाम्लं विषं स्यात्
समरमिह पृथक्स्याद्भावयेद्दघस्रमेतैः।
कनकभुजगवल्ली कण्टकारी जयाद्रिः

त्रिपुरभैरवे अश्महेम्नः गन्धकस्य॥ २८१॥

कमलसलिलवासामुष्टिवज्राम्बुपूरैः ॥
अरुणसदृशपाकैर्मातुलुङ्गैश्च योज्यः
पुटगण इह तुल्यो भावयेदार्द्रकाद्भिः ।
दहनवदननाम्ना वल्लमात्रो निहन्ति ॥
प्रबलसकलशूलं तद्विकारानशेषान् ।

अग्निमुखः ॥ २८२ ॥

शुद्धसूतं द्विधागन्धं यामैकं मर्द्दयेद्दृढम् ।
द्वयोस्तुल्यं शुद्धताम्रं संपुटे सन्निवेशयेत् ॥
ऊर्द्धाधो लवणं दत्वा मृत्भाण्डे स्थापयेद्भिषक् ।
ततो गजपुटं दद्यात् स्वाङ्गशीतं समुद्धरेत् ॥
संपुटं चूर्णयेत् श्लक्ष्णं पर्णखण्डे द्विगुञ्जकम् ।
भक्षयेत् सर्वशूलार्त्तो हिङ्गु शुण्ठी च जीरकम् ॥
वचा मरिचजं चूर्णं कर्षमुष्णजलैः पिवेत् ।
असाध्यं नाशयेच्छूलं श्रीशूलगजकेशरी ।

शूलगजकेशरी ॥ २८३ ॥

टङ्कणं हारिणं शृङ्गं स्वर्णं गन्धं मृतं रसम् ।

अग्निमुखे वलिर्गन्धकः सवरमिति त्रिफलाया मर्द्दितं भुजगवल्ली पर्णं सलिलं वालकम् ॥ २८२ ॥

शूलकेशरीरसे तस्य ताम्रस्य संपुटे संपुटं निर्म्माय तस्मिन् सूतकगन्धककज्जलं दत्वा रोधयेत् । लेपं विनैव । स्वल्पमृत्भाण्डे पलद्वय लवणप्रवेशयोग्ये पलैकं लवणं निःक्षिप्य लवणमध्ये संपुटकं स्थापयित्वा अपरलवणपलेनाच्छाद्य भाण्डमुखं कपर्द्या आच्छाद्य लिप्त्वा च गजपुटे पचेत् । तस्मादाकृष्य संपुटं चूर्णयेत् । अनुपानस्तु हिङ्गुशुण्ठ्यादिचूर्णं माषैकं कर्षमितत्र्यपलच्चयम् ॥ २८३ ॥

दिनैकमार्द्रकद्रावैर्मर्द्यं रुद्धा पुटे पचेत् ॥
त्रिगुणाख्यो रसोह्यस्य माषेकं मधुसर्पिषा ।
सैन्धवं जीरकं हिङ्गुमध्वाज्याभ्यां लिहेदनु ॥
पक्तिशूलहरख्यातो याममात्रान्नसंशयः ।

त्रिगुणाख्योरसः ।

हरीतकी त्रिकटुकं कुचिला हिङ्गुसैन्धवम् ।
गन्धकञ्च समं सर्वं वटीं कुर्य्यात् सुखावहाम् ॥
लघुकोलप्रमाणान्तु ग्रस्यते प्रातरेवहि ।
एकैका वटिका ग्राह्या गुल्मशूलविनाशिनी ॥
ग्रहण्यामतिसारे च साजीर्णे मन्दपावके ।
योजयेदुष्णपयसा सुखमाप्नोति निश्चितः ॥
सुवर्णञ्च भवेद्देहं सदोत्साहयुतं नृणाम् ।

शूलहरणयोगः ।

त्रिफलायास्तथा धात्र्याश्चूर्णं वा काललोहजम् ।
शर्कराचूर्णसंयुक्तं सर्वशूलेषु योजयेत् ॥

शर्करालौहम् । २८४ ।

शङ्खचूर्णस्य चपलं पञ्चैव लवणानि च ।
क्षारं टङ्कणकं जाती शतपुष्पा यमानिका ॥
हिङ्गु त्रिकटुकञ्चैव सर्वमेकत्र चूर्णयेत् ।

शर्करालौहे लौहचूर्णं सर्वतुल्यं शङ्खादिचूर्णे शङ्खसमं दग्धशङ्ख क्षारं टङ्कणकमिति टङ्कणक्षारम् ॥ २८४ ॥

इति शूलाधिकारः ।

आमवातं यकृत्शूलं परिणामसमुद्भवम् ॥
अन्नद्रवकृतं शूलं शूलञ्चैव त्रिदोषजम् ।

शङ्खादिचूर्णम् ॥

इति रसेन्द्रसारसंग्रहे शूलरोगाधिकारः ।

———

अथ उदावर्त्तानाहाधिकारः ।

पथ्या त्रिकटु सूतञ्च द्विगुणं कानकन्तथा ॥
थानकुनीरसैरम्ललोलिकायारसैः कृता ।
गुड़िकोदरगुल्मादिपाण्डुामयविनाशिनी ॥
क्रिमिकुष्ठगात्रकण्डुपीड़कांश्च निहन्ति च ।
गुड़ी सिद्धफला चेयं वैद्यनाथेन भाषिता ॥

वैद्यनाथवटी ॥ २८५ ॥

शुद्धं पारदटङ्कणं समरिचं गन्धाश्मतुल्यं त्रिवृत् ।
विश्वा च द्विगुणा ततो नवगुणं जैपालचूर्णं क्षिपेत् ।
खल्ले दण्डयुगं विमर्द्य विधाना चार्कस्यपत्रे ततः ।
स्वेदं गोमयवह्निना च मृदुना स्वेच्छावशाद्भेदकः ॥
गुञ्जैकप्रमितो रसो हिमजलैः संसेवितो रेचयेत् ।
यावन्नोष्णजलं पिवेदपि वरं पथ्यञ्च दध्योदनम् ॥
आमं सर्वभवं सुजीर्णमुदरं गुल्मं विशालं हरेत् ।

उदावर्त्तेऽपि शूलं भवतीति शूलानन्तरमुदावर्त्तचिकित्सामाह ।
वैद्यनाथवटिकायां पथ्या हरीतकी कानकं जैपालम् ॥ २८५ ॥

वह्नेर्दीप्तिकरो बलाग्रहरणः सर्वामयध्वंसनः ॥

बृहदिच्छाभेदीरसः ॥ २८६ ॥

योगवाहिरसान् सर्वान् रेचके कथितानपि ।
प्लीहाधिकारे कथितं रसेन्द्रं वारिशोषणम् ॥
उदावर्त्ते तथानाहे प्रयुञ्जीतानुपानतः ।
पुटितं भावितं लौहं त्रिवृत् क्वाथैरनेकशः ॥
उदावर्त्तहरं युञ्ज्यात् ससितं वा यथाबलम् ।
उदावर्त्ते प्रयोक्तव्या उदरोक्तारसाः खलु ॥

इति रसेन्द्रसारसंग्रहे उदावर्त्तानाहाधिकारः ।

अथ गुल्मरोगचिकित्सा ।

ताम्रं सूतं समं गन्धं जैपालञ्च फलत्रिकम ।
कटुकं पेषयेत् चारैर्निष्कं गुल्महरं पिबेत् ॥
उष्णोदकं पिबेच्चानु नाराचोयं महारसः ।

महानाराचरसः ॥ २८७ ॥

पारदं शिखितुल्यञ्च गन्धं जैपालपिप्पली ।
आरग्वधफलान्मज्जा वज्रीक्षीरेण पेषयेत् ॥

इच्छाभेदीरसे गन्धाश्मो गन्धकः । नवगुणं जैपालचूर्णमितोऽ भागादेकया नवगुणं जैपालचूर्णमित्यर्थः ॥ २८६ ॥

इत्युदावर्त्ताधिकारः ।

गुल्मेऽप्यानाहो भवतीत्यानाहानन्तरं गुल्मचिकित्साह । महानाराचरसे—कटुकं त्रिकटुकं चारैः क्षारत्रयैः ॥ २८७ ॥

धात्रीरसयुतं खादेद्रक्तगुल्मप्रशान्तये।
चिञ्चाफलरसञ्चानुपथ्यं दध्योदनं हितम्॥

पञ्चाननरसः॥ २८८॥

रसगन्धकताम्रञ्च कांस्यं टङ्गणतालकम्।
प्रत्येकं पलिकं ग्राह्यं मर्द्दयेदतियत्नतः॥
तद्दयथाग्निबलं खादेद्रक्तगुल्मप्रशान्तये।
निर्म्मिता नित्यनाथेन वटिकागुल्मवज्रिणी॥
गुल्मप्लीहोदराष्ठीला यकृदानाहनाशिनी।
कामलापाण्डुरोगघ्नी ज्वरशूलविनाशिनी॥

गुल्मवज्रिणीवटिका॥

सूतकं लौहकं ताम्रं तालकं गन्धकं समम्।
तोलद्वयमितं भागं यवचारञ्च तत्समम्॥
मुस्तकं मरिचं शुण्ठी पिप्पली गजपिप्पली।
हरीतकी वचा कुष्ठं तोलैकं चूर्णयेद्बुधः॥
सर्व्वमेकीकृतं पात्रे क्रियन्ते भावनास्ततः।
पर्प्पटं मुस्तकं शुण्ठ्यपामार्गं पापचेलिकम्॥
तत्पुनश्चूर्णयेत् पश्चात सर्व्वगुल्मनिवारणम्।
गुञ्जा चतुष्टयं खादेद्धरीतक्यनुपानतः॥
वातिकं पैत्तिकं गुल्मं तथाचैव त्रिदोषजम्।
द्वन्द्वजं श्लैष्मिकं हन्ति वातगुल्मं विशेषतः॥

पञ्चाननरसे वज्रीचीरैः स्नुहीदुग्धैः चिञ्चाफलरसञ्चान्विति तिन्तिड़ीफलरसश्चानुपानम्॥ २८८॥

गुल्मकालानलोनाम सर्वगुल्मकुलान्तकृत्।

गुल्मकालानलोरसः॥ २८९॥

पारदं गन्धकं ताप्यं यवक्षाराकमभ्रकम्।
अम्ब्यम्बुना हि पलेण संमर्द्याथ द्विगुञ्जकम्॥
भक्षयेत् पर्णखण्डेन हिङ्गु सिन्धु सुवर्चलैः।
दाड़िमञ्च तथा बिल्वं कार्षिकं भृङ्गजेर्द्रवैः॥
पिष्ट्वा तु सुरयायुक्तं देयं स्यादनुपानकम्।
सर्वगुल्मं निहन्त्याशु शूलञ्च परिणामजम्॥

वड़वानलोरसः॥ २९०॥

सूतटङ्कणतुल्यांशं मरिचं सूततुल्यकम्।
गन्धकं पिप्पली शुण्ठी द्वौ द्वौ भागौ विमिश्रयेत्॥
सर्वतुल्यं क्षिपेत् दन्तीवोजं निस्तुषमेव च।
द्विगुञ्जं रेचनं सिद्धं नाराचाख्यो महारसः॥

महानाराचरसः॥ २९१॥

पारदं गन्धकं तालं ताप्यं स्वर्णं मनःशिलाम्।
कृष्णाक्वाथैः स्नुहीक्षीरैर्दिनैकं मर्द्दयेत् सुधीः॥
निष्कार्द्धं श्लैष्मिकं गुल्मं हन्ति मूत्रानुपानतः।

गुल्मकालानले यवक्षारश्च तत्समभिति सर्वद्रव्यसमम्। हरीतक्या
नुपानत इति क्वाथं चूर्णंवा अनुपानम्॥ २८९॥
वड़वानलरसे ताप्यं स्वर्णमाक्षिकं अर्कं स्ताम्रं अम्लरम्बुना चित्रकक्वाथेन
सम्मर्द्य पर्णखण्डेन भक्षयेत्। हिङ्ग्वादिचूर्णन्त्वनुयोज्यम्॥ २९०॥
महानाराचरसे सूतादिद्रव्यत्रयं प्रत्येकमेकभागसमम्॥ २९१॥

रसोविद्याधरोनाम गोदुग्धञ्च पिवेदनु ॥

विद्याधरोरसः।

गन्धकं तालकं ताम्रं तथैव तीक्ष्णलौहकम्।
समांशं मर्द्दयेत् गाढ़ं कन्यानीरेण यत्नतः॥
संपुटं कारयेत् पश्चात् सन्धिलेपञ्च कारयेत्।
ततो गजपुटं दत्वा स्वाङ्गशीतं समुद्धरेत्॥
द्विगुञ्जां भक्षयेद्गुल्मी शृङ्गवेरानुपानतः। *
सर्वगुल्मं निहन्त्याशु भास्करस्तिमिरं यथा॥

महागुल्मकालानलोरसः॥

अभया मरिचं कृष्णा टङ्गणञ्च समांशिकम्।
सर्वचूर्णसमञ्चैव दद्यात् कानकजं फलम्॥
स्नुहीक्षीरैर्वटीकार्य्या यथा सिन्नकालायवत्।
वटीद्वयं शिवामेकां पिष्ट्वा चोष्णाम्बुना पिवेत्॥
उष्णाद्विरेचयेदेषा शीते स्वास्थ्यमुपैति च।
जीर्णज्वरं पाण्डुरोगं प्लीहाष्ठीलोदराणि च।
रक्तपित्ताम्लपित्तादिसर्वाजीर्णं विनाशयेत्।

अभयावटी॥ २९२॥

जैपालाष्टौ द्विकोगन्धं शुण्ठी मरिच चित्रकम्।
एकःसूतः ससौभाग्यो गोपीजल इति स्मृतः॥

अभया वटिकायां कानकजं फलं जैपालफलं शिवामिति हरीतकीम्। तप्ताम्बुना उष्णजलेन॥ २९२॥

---

* कल शृङ्गवेरं आर्द्रकं विश्वभेषजम्वा गुल्महन्तृत्वाद्विश्वभेषजेनैव व्यवहरन्ति वृद्धाः।

शूलव्याध्याश्रयान् गुल्मान् कोष्ठादौ दश्रपैत्तिकान्।
भगन्दरादिहृद्रोगान्नाशयेदेव भक्षणात्॥

गोपीजलः॥ २८३॥

शठीं पुष्करमूलञ्च दन्तीं चित्रकमाढकीम्।
शृङ्गवेरं वचाञ्चैव पलिकानि समाहरेत्॥
त्रिवृतायाः पलञ्चैकं कुर्य्यात् त्रीणि च हिङ्गुनः॥
यवक्षारात् पले द्वे च द्वे पले चाम्लवेतसात्।
यमान्यजाजीमरिचं धान्यकञ्च त्रिकार्षिकम्॥
उपकुञ्चाजमोदाभ्यां पृथगर्द्धपलं भवेत्।
मातुलुङ्गरसेनैव गुड़िकां कारयेद्भिषक्॥
तासामेकां पिबेद्धेवातिस्रोवाथ सुखाम्बुना।
अम्लैर्म्मद्यैश्च यूषैश्च घृतेन पयसाथवा॥
एषाकाङ्कायनेनोक्ता गुड़िका गुल्मनाशिनी।
अर्शोहृद्रोगशमनी क्रिमीनाञ्च विनाशिनी॥
गोमूत्रयुक्ता शमयेत् कफगुल्मं चिरोत्थितम्।
क्षीरेण पित्तरोगञ्च मद्यैरम्लैश्च वातिकम्॥
त्रिफलारसमूत्रैश्च नियच्छेत् सान्निपातिकम्।
रक्तगुल्मेषु नारीणामुष्ट्रीक्षीरेण पाययेत॥

काङ्कायनगुड़िका॥ २८४॥

गोपीजले जैपालाष्टाविति जैपालबीजस्य चाष्टौ भागा एवमन्यत्र॥ २८३॥

काङ्कायनगुड़िकायां आढ़की तुवरी, उपकुञ्चा कृष्णजीरकम्। अजमोदा यमानी॥ २८४॥

रसं गन्धं शुद्धलौहं गुग्गुलोः पिप्पलं पलं
त्रिवृता पिप्पली शुण्ठी शठी धान्यकजीरकम्।
प्रत्येकं पलिकं ग्राह्यं पलार्द्धं कानकं फलं
संचूर्ण्य वटिकाकार्य्या घृतेन वल्लमानतः॥
वटीद्वयं भक्षयेचार्द्रकोष्णाम्बु पिबेदनु।
हन्ति प्लीहयकृत्गुल्मकामलोदरशोथकम्॥
वातिकं पैत्तिकं गुल्मं श्लैष्मिकं रौधिरन्तथा।
गहनानन्दनाथोक्तरसोयं गुल्मशार्द्दूलः॥

गुल्मशार्द्दूलोरसः॥ २९५॥

लौहं ताम्रं वराटञ्च तुल्यं हिङ्गु फलत्रिकम्।
स्नुहीमूलं यवक्षारं जैपालं टङ्कणं त्रिवृत्।
प्रत्येकं पलिकं ग्राह्यं छागीदुग्धेन पेषयेत्॥
चतुर्गुञ्जां वटीं खादेद्वारिणा मधुनापि वा।
प्राणवल्लभनामायं गहनानन्दभाषितः॥
निहन्ति कामलां पाण्डुं मेहं हिक्कां विशेषतः।
असाध्यं सन्निपातञ्च गुल्मं रुधिरसम्भवम्॥
वातरक्तञ्च कुष्ठञ्च कण्डूविस्फोटकापचीम्।

प्राणवल्लभोरसः॥ २९६॥

ताम्रं दशगुणं स्वर्णात् स्वर्णपादं कटुत्रिकम्।
त्रिकटुत्रिफला तुल्या त्रिफलार्द्धमयोरजः॥

गुल्मशार्द्दूलरसे कानकफलं जैपालफलम्॥ २९५॥

प्राणवल्लभरसे स्नुहीमूलमिति स्नुहीमूलक्षारम्। त्रिवृत् त्रिवृ-
च्चूर्णम्। २९६॥

अयसोऽहं विषञ्चैव सर्वं संमर्द्य यत्नतः ।
सर्वेश्वररसोनाम रौधिरगुल्मनाशनः ॥

सर्वेश्वरोरसः ॥

इति रसेन्द्रसारसंग्रहे गुल्मरोगचिकित्सा ।

अथ हृद्रोगाधिकारः ।

शुद्धसूतं समं गन्धं मृतताम्रं तयोः समम् ।
मर्द्दयेत् त्रिफलाक्वाथैः काकमाचीद्रवैर्दिनम् ॥
चणमात्रां वटीं खादेद्रसोयं हृदयार्णवः ।
काकमाचीफलं कर्षं त्रिफलाफलसंयुतम् ॥
द्वात्रिंशत्तोलकं तोयं क्वाथमष्टावशेषितम् ।
अनुपानं पिवेच्चात्र हृद्रोगे च कफोत्थिते ॥

हृदयार्णवोरसः ॥

सहस्रपुटनैः शुद्धं वज्राभ्रमर्ज्जुनत्वचः ।
सत्वैर्विमर्द्दितं सप्तदिनं खल्ले विशोषितम् ॥
छायाशुष्कावटीकार्य्या नाम्नेदमर्ज्जुनाह्वयम् ।
हृद्रोगं सर्वशूलार्शो हृल्लासच्छर्द्दीरोचकान् ॥
अतीसारमग्निमान्द्यं रक्तपित्तं चतक्षयम् ।
शोथोदराम्लपित्तञ्च विषमज्वरमेव च ॥
हन्त्यन्यान्यपि रोगाणि वल्यं वृष्यं रसायनम् ।
नागार्ज्जुनाभ्रम् ॥ २८७ ॥

गुल्मस्य हृदयं स्थानमुक्तं अतः स्थानसाम्यात् हृद्रोग उच्यते । शुद्धसूतमित्यादि । नागार्ज्जुनाभ्रे अर्ज्जुनत्वचः सत्वैरिति अर्ज्जुनत्वक्क्वाथैरित्यर्थः ॥२८७ ॥

इति हृद्रोगचिकित्सा ।

सूतगन्धौद्रवैर्धात्र्या मर्द्दयेत् गोस्तनोद्रवैः।
यष्टिखर्ज्जुरसलिलैर्द्दिनञ्च परिमर्द्दयेत् ॥
धात्रीचूर्णं सिताञ्चानु पिवेत् हृद्रोगशान्तये।

पञ्चाननरसः।

इति रसेन्द्रसारसंग्रहे हृद्रोगाधिकारः।

अथ मूत्रकृच्छ्राधिकारः।

वङ्गं सूतं गन्धकं भावयित्वा
लौहपात्रे मर्द्दयेदेकघस्रम्।
दूर्वायष्टिगोक्षुरैः शाल्मलीभिः
मूषामध्ये भूधरे पाचयित्वा ॥
तत्तद्द्रावैर्भावयित्वास्य वल्लं
दद्यात् शीतं पायसं वक्ष्यमाणम्।
दूर्वायष्टिशाल्मलीतोयदुग्धै
स्तुल्यैः कुर्य्यात् पायसं तद्वदीत ॥
प्रातःकाले शीतपानीयपानात्
मूत्रे जाते स्यात् सुखी च क्रमेण।

त्रिनेत्राख्योरसः।

द्विपलं वरुणं धात्र्यास्तदर्द्धं धात्रीपुष्पकम्।
हरीतक्याः पलार्द्धञ्च पृश्निपर्णं तदर्द्धकम्।
कर्षमानञ्च लौहाभ्रं चूर्णमेकत्रकारयेत्।
भक्षयेत् प्रातरुत्थाय शाणमानं विधानवित् ॥
मूत्राघातं तथा घोरं मूत्रकृच्छ्रञ्च दारुणम्।
अश्मरीं विनिहन्त्याशु प्रमेहं विषमज्वरम् ॥

बलपुष्टिकरञ्चैव वृष्यमायुष्यमेव च ।
वरुणाद्यमिदं लौहं चरकेन विनिर्मितम् ॥

वरुणाद्यं लौहम् ॥ २९८ ॥

अयो रजः श्लक्ष्णपिष्टं मधुना सह योजयेत् ।
मूत्राघातं निहन्त्याशु मूत्रकृच्छ्रं सुदारुणम् ॥
रसगन्धयवक्षारं सितातक्रयुतं पिबेत् ।
मूत्रकृच्छ्राण्यशेषाणि निहन्ति नियतं नृणाम् ॥
भैषज्यैरश्मरीप्रोक्तैर्मूत्रकृच्छ्रमुपाचरेत् ।
योगवाहिरसैर्वापि चानुपानविशेषतः ॥
शतावरीरसैः पिष्ट्वा मृतसूतञ्च तालकम् ।
शिखितुत्थञ्च तुल्यांशं दिनैकं मर्द्दयेद्दृढम् ॥
तद्गोलं सार्षपे तैले पाच्यं यामञ्च चूर्णयेत् ।
मूत्रकृच्छ्रान्तकश्चास्य क्षौद्रैर्गुञ्जाचतुष्टयम् ॥
भक्षणान्नात्र सन्देहो मूत्रकृच्छ्रं निहन्त्यलम् ।
तुलसी तिलपिण्याक बिल्वमूलं तुषाम्बुना ॥
कर्षैकं वानुपानेन सुरया वा सुवर्च्चलैः ।

मूत्रकृच्छ्रान्तकोरसः ॥ २९९ ॥

इति रसेन्द्रसारसंग्रहे मूत्रकृच्छ्राधिकारः ।

सप्तोत्तरे मर्म्मशते त्रीणि मर्म्माणि शिरोहृदयवस्तयश्च प्रधानानि। तत्र हृदयगतविकारचिकित्सामभिधाय वस्तिगतरोगचिकित्सामाह वरुणमित्यादि ।

वरुणादिलौहे कर्षमानञ्च लौहाभ्रमिति प्रत्येकं कर्षमानम् ॥ २९८ ॥

मूत्रकृच्छ्रान्तके ।—शिखितुत्थकं तुत्थकमेव ॥ २९९ ॥

अथ मूत्राघाताधिकारः

मृतसूताभ्रगन्धञ्च मर्द्दयेन्मधुना दिनम्।
तारकेश्वरनामायं गहनानन्दभाषितः॥
माषमात्रं भजेत् क्षौद्रैर्बहुमूत्रप्रशान्तये।
उडुम्बरफलं पक्वं चूर्णितं कर्षमात्रकम्॥
संलिह्यान्मधुना सार्द्धमनुपानं सुखावहम्।

तारकेश्वरोरसः॥ ३००॥

शुद्धसूतस्य भागैकं चत्वारः शुद्धगन्धकात्।
पिष्ट्वा वराटिका पूर्य्या रसपादेन टङ्कणम्॥
क्षीरैः पिष्ट्वा मुखं लिप्त्वा भाण्डे रुद्ध्वा पुटे पचेत्।
स्वाङ्गशीतं विचूर्ण्याथ लघुलोकेश्वरोमतः॥
चतुर्गुञ्जाप्रमाणन्तु मरिचेन तथैव च।
जातीमूलफलैर्युक्तमजाक्षीरेण पाययेत्॥
शर्करा भावितञ्चानुपीत्वा कृच्छ्रहरः परः।

लघुलोकेश्वरोरसः॥ ३०१॥

येनौषधेन मतिमान् मूत्रकृच्छ्रमुपाचरेत्।
तेनौषधेन श्रेष्ठेन मूत्राघातानुपाचरेत्॥
लवणाम्लवरायुक्तं घृतञ्चापि पिबेन्नरः।

मूत्रगतविकारसाधर्म्यादतनन्तरं मूत्राघातचिकित्सा।
तारकेश्वररसे उडुम्बरफलं पक्वमिति पक्वयज्ञडुम्बरफलम् ३००॥
लघुलोकेश्वरे मृतसूतस्य रससिन्दूरस्य सद्भूतं गन्धकं पिष्ट्वा तेन वराटिकापूरणीया ततो रसपादेन टङ्कणं दुग्धैः पिष्ट्वा वराटिकामुखं लिप्त्वा पुटपाके योजयेदिति भावः॥ ३०१॥

तस्य नश्यन्ति वेगेन मूत्राघातस्त्रयोदश॥
पक्कनिर्वारुवीजानामचमात्रं ससैन्धवम्।
धान्याम्लयुक्तं पित्वैव मूत्रघातादिमुच्यते॥
त्रिकण्टकैरण्डशतावरीभिः
सिद्धं पयो वा तृणपञ्चमूलैः।
गुड़प्रगाढ़ं सघृतं पयो वा
रोगेषु कृच्छ्रादिषु शस्तमेतत्॥ १०२॥
इति रसेन्द्रसारसंग्रहे मूत्राघाताधिकारः।

अथाश्मर्य्यधिकारः।

शुद्धसूतं द्विधागन्धं रसैः श्वेतपुनर्नवैः॥
मर्द्दयित्वा दिनं खल्ले रुद्धा तत भूधरे पचेत्।
दिनान्ते तत्समुद्धृत्य मर्द्दयेद्गुड़संयुतम्॥
अश्मरीं वस्तिशूलञ्च हन्ति पाषाणवज्रकः।
गोरचकर्कटीमूलक्वाथं कौलत्थकन्तथा॥
अनुपानं प्रयोक्तव्यं वुद्धा दोषवलावलम्।

पाषाणवज्रोरसः॥

मृततास्रमजाचीरैः पाच्यं तुल्यं गते द्रवे।
तत्तास्रं शुद्धसूतञ्च गन्धकञ्च समं समम्॥
निर्गुण्डीस्वरसैर्मर्द्द दिनं तद्गोलकीकृतम्।
यामैकं वालुकायन्त्रे पक्का योज्यं द्विगुञ्जकम्॥

मूत्रकृच्छ्रचिकित्सा मूत्राघातेष्वतिदिशति येनौषधेनेति॥ १०२॥

बीजपूरस्य मूलञ्च सजलञ्चानुपाययेत्।
रसस्त्रिविक्रमोनाम शर्करामश्मरीं जयेत्॥
त्रिविक्रमोरसः॥ ३०३॥

अर्थारजं श्लक्ष्णपिष्टं मधुना सह योजितम्।
अश्मरीं विनिहन्त्याशु मूत्रकृच्छ्रञ्च दारुणम्॥
लौहप्रयोगः।

इन्द्रवारुणिकामूलं मरिचं चीरपाचितम्॥
पर्पटीरससंयुक्तं सप्ताहादश्मरीं जयेत्।
गन्धकं जीरकं चुद्राफलं टङ्कद्वयं सदा॥
अश्मरीं शर्करां मूत्रकृच्छ्रं चपयति ध्रुवम्॥ ३०४॥
इति रसेन्द्रसारसंग्रहे अश्मर्य्यधिकारः।

अथ प्रमेहाधिकारः।

मृतसूताभ्रकं तुल्यं धात्रीफलनिजद्रवैः॥
सप्ताहं भावयेत् खल्ले योगोयं हरिशङ्करः।
माषमात्रां वटीं खादेत् सर्वमेहप्रशान्तये॥
हरिशङ्करोरसः॥ ३०५॥

मूत्रविरोधित्वसामान्यात्तदनन्तरमश्मरीचिकित्सितमुच्यते।
त्रिविक्रमरसे ताम्रतुल्यं छागीदुग्धं दत्वा पाच्यं, दुग्धे निःशेषिते ताम्रतुल्यं रसगन्धकं निःचिप्य निर्गुण्डीरसैर्दिनैकं संमर्द्य वालुका-यन्त्रे दिनैकं पचेत्। मात्राचास्य गुञ्जाद्वयपरिमिता॥ ३०३॥
गन्धकमित्यादौ चुद्राफलं वृहतीफलम्॥ ३०४॥
वस्तिविकृतिसाम्यादश्मर्य्यनन्तरं प्रमेहचिकित्सितमुच्यते।
हरिशङ्कररसे आमलजलैरिति आमलकीरसैस्तदभावे क्वाथैः ३०५॥

मृतं सूतं मृतं वङ्गमर्ज्जुनस्य त्वचान्वितम्।
तुल्यांशं मर्द्दयेत् खल्ले शाल्मल्यामूलजैर्द्रवैः॥
दिनान्ते वटिकाकार्य्या माषमात्रा प्रमेहहा।
एषा इन्द्रवटीनाम्ना मधुमेहप्रशान्तकृत्॥

इन्द्रवटी।

वङ्गभस्माद्विवल्लञ्च लेहयेन्मधुना सह॥
ततो गुड़समं गन्धं भक्षयेत् कर्षमात्रकम्।
गुडूचीसत्वमथवा शर्करासहितं तथा॥
सर्वमेहहरोज्ञेयो वङ्गावलेह उत्तमः।

वङ्गावलेहः।

सुताभ्रञ्च वटक्षीरैर्मर्द्दयेत् प्रहरद्वयम्॥
विशोष्य पक्वमूषायां सर्वरोगे प्रयोजयेत्।
विशेषान्मेहरोगेषु त्रिफलामधुसंयुतम्॥
युञ्जीतवल्लमेकन्तु रसेन्द्रस्यास्य वैद्यराट्।

प्रमेहसेतुः। ३०६।

विड़ङ्गत्रिफलामुस्तैः कणया नागरेण च।
जीवकाभ्यां युतं हन्ति प्रमेहानतिदारुणान्॥
लौहं मूत्रविकारांश्च सर्वानेव विनाशयेत्।

विड़ङ्गाद्यं लौहम्॥ ३०७।

रसगन्धकलौहञ्च स्वर्णं वङ्गञ्च माक्षिकम्।
समभागन्तु संपिष्य वटिकां कारयेद्भिषक्॥

प्रमेहसेतुरसे मृतमिति भस्मकृतम्॥ ३०६॥
विड़ङ्गादिलौहे लौहं सर्वतुल्यम्॥ ३०७॥

सप्ताहमामलाद्भावैर्भावितोयं रसेश्वरः ।
हरिशङ्करनामायं गहनानन्दभाषितः ॥
प्रमेहान् विंशतिं हन्ति सत्यं सत्यं न संशयः ।

वृहद्धरिशङ्करोरसः ॥

वङ्गभस्मसृतं स्वर्णं रसं चौद्रैर्विमर्द्दयेत् ।
द्विगुञ्जं भक्षयेन्नित्यं हन्ति मेहं चिरोद्भवम ॥
गुञ्जामूलं तथा चौद्रैरनुपानं प्रशस्यते ।

आनन्दभैरवोरसः ॥ ३०८ ॥

मृतसूताभ्रनागञ्च स्वर्णं तुल्यं प्रकल्पयेत् ।
महानिम्बस्य चूर्णन्तु चतुर्भिः सममाहरेत् ॥
मधुनालेहयेन्माषं लालामेहप्रशान्तये ।
सक्षौद्रं रजनीचूर्णं लेह्यं निष्कद्वयन्तथा ॥
असाध्यं नाशयेन्मेहं विद्यावागीशकोरसः ।

विद्यावागीशरसः ॥ ३०९ ॥

रसाञ्जनं विड़ं दारु विल्व गोक्षुर दाड़िमम् ।
भूनिम्बं पिप्पलीमूलं त्रिकटु त्रिफलात्रिवृत् ॥
प्रत्येकं तोलकं देयं लौहचूर्णन्तु तत्समम् ।
पलैकं गुग्गुलुं दत्वा घृतेन वटिकां कुरु ॥
माषैका निर्मिताचेयं मेहमुद्गरसंज्ञिनी ।
श्रीमद्गहननाथेन लोकनिस्तारकारिणा ॥

आनन्दभैरवरसे रसमिति पारदभस्म ॥ ३०८ ॥

विद्यावागीशरसे सक्षौद्रं हरिद्राचूर्णमनुलेह्यम् ॥ ३०९ ॥

अनुपानं प्रकर्त्तव्यं छागीदुग्धं जलञ्च वा।
विंशन्मेहं निहन्त्याशु मूत्रकृच्छ्रं हलीमकम्॥
अश्मरीं कामलां पाण्डुं मूत्राघातमरोचकम्।
अर्शांसिव्रणकुष्ठञ्च वातरक्तं भगन्दरम्॥

मेहमुद्गरोरसः॥ ३१०॥

भस्मसूतं समं कान्तमभ्रकन्तु शिलाजतु।
शुद्धताप्यं शिलाव्योषत्रिफलाङ्कोठजीरकम्॥
कार्पासवीजं रजनीचूर्णं भाव्यञ्च वह्निना।
विंशद्वारं विशोष्याथ लिह्याच्च मधुना सह॥
माषमात्रं हरेन्मेहं मेघनादरसो महान्।

मेघनादोरसः॥ ३११॥

मृतसूताभ्रकं लौहं नागं वङ्गं समं समम्।
एलावीजं लवङ्गञ्च जातीकोषफलन्तथा॥
मधूकं मधुयष्टिं च धात्री च समशर्करा।
कर्पूरं खादिरं सारं शताह्वा कण्टकारिका॥
अम्लवेतसकं तुल्यं दिनैकं लाङ्गलीद्रवैः।
भावयेन्मेषदुग्धेन नागवल्यारसैर्दिनम्॥
वटिका वदराख्याभा कार्य्या चन्द्रप्रभापरा।
भक्षयेद्वटिकामेकां सर्वमेहकुलान्तिकाम्॥

मेहमुद्गररसे विड़ं विड़लवणं दारु दारुहरिद्रा। लौहचूर्णं तत्समभिति सर्वचूर्णसममित्यर्थः॥ ३१०॥

मेघनादरसे कान्तं कान्तलौहं ताप्यं स्वर्णमाक्षिकम्। भाव्यञ्च वह्निनेति चित्रकरसेन भाव्यम्॥ ३११॥

धात्रीपटोलपत्रं वा कषायं वामृतायुतम्।
सक्षौद्रं भक्षयेच्चानु सर्वमेहप्रशान्तये॥

चन्द्रप्रभावटिका॥ ३१२॥

रसभस्मसमायुक्तं वङ्गभस्म प्रकल्पयेत्।
अस्य माषद्वयं हन्ति मेहान् क्षौद्रसमन्वितम्॥

इक्षुमेहे वङ्गेश्वरो रसः॥ ३१३॥

वङ्गभस्म रसं गन्धं रौप्यं कर्पूरमभ्रकम्।
कर्षं कर्षं मानमेषां सूताङ्घ्रिहेममौक्तिकम्॥
केशराजरसैर्भाव्यं द्विगुञ्जाफलमानतः।
प्रमेहान् विंशतिञ्चैव साध्यासाध्यमथापि वा॥
मूत्रकृच्छ्रं तथा पाण्डुं धातुस्थञ्च ज्वरं जयेत्।
हलीमकं रक्तपित्तं वातपित्तकफोद्भवम्।
ग्रहणीमामदोषञ्च मन्दाग्नित्वमरोचकम्।
एतान् सर्वान् निहन्त्याशु वृत्रमिन्द्राशनिर्यथा॥
वृहद्वङ्गेश्वरोनाम सोमरोगं निहन्त्यलम्।
बहुमूत्रं बहुविधं मूत्रमेहं सुदारुणम्॥
मूत्रातिसारं कृच्छ्रञ्च क्षीणानां पुष्टिवर्द्धनः।
ओजस्तेजस्करी नित्यं स्त्रीषु सम्यक् वृषायते॥
बलवर्णकरोरुच्यः शुक्रसञ्जननः परः।
छागं वा यदि गव्यं पयो वा दधिनिर्म्मलम्॥

चन्द्रप्रभावटिकायां जातीकोषफलन्तथेति जातीकोषं जातीफलञ्च॥ ३१२॥

वङ्गेश्वरे रससिन्दूरं वङ्गभस्म च समभागं ग्राह्यम्॥ ३१३॥

अनुपानं प्रयोक्तव्यं वुद्धा दोषगतिं भिषक् ।
दद्याच्च वाले पौढ़े च सेवनार्थं रसायनम् ॥

बृहद्वङ्गेश्वरो रसः ॥ २१४ ॥

वङ्गाभ्रमथनागाभ्रं नागं वङ्गञ्च केवलम् ।
मेहरोगे प्रयोक्तव्यं शिलाजतु समन्वितम् ॥ २१५ ॥
कस्तूरी वनिता क्षुद्रा त्रिफला जीरकद्वयम् ।
कदलीनां फलं पक्वं खर्जुरं कृष्णतिलकम् ॥
कोकिलाख्यस्य वीजञ्च माषमात्रं समं समम् ।
यावन्त्येतानि चूर्णानि द्विगुणा सितशर्करा ॥
धात्रसेन पयसा कुष्माण्डस्वरसेन च ।
विपचेत् पाकविद्वैद्यो मन्दमन्देन वह्निना ॥
अवतार्य्य सुशीते च यथा लाभं विनिःक्षिपेत् ।
अक्षमात्रं प्रयुञ्जीत सर्वमेहप्रशान्तये ॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ।
सोमरोगं बहुविधं भूत्वातीसारमुल्वणम् ॥
मूत्रकृच्छ्रं निहन्त्याशु मूत्राघातं तथाश्मरीम् ।
ग्रहणीं पाण्डुरोगञ्च कामलां कुम्भकामलाम् ॥

बृहद्वङ्गेश्वरे सूताङ्घ्रिहेममौक्तिकमिति स्वर्णं मुक्ता च प्रत्येकं मात्रदाच्चतुर्थभागम् ॥ २१४ ॥

वङ्गाभ्रेत्यादि वङ्गभस्मसममभ्रं धात्रीरसेन रक्तिकादिक्रमेण बोध्यं अथवा नागं सीसकं तच्चाभ्रसमम् । अथवा केवलं वङ्गं सीसकं वा धात्रीरसेन । अथवा केवलं शिलाजतु मधुना लेह्यम् ॥ २१५ ॥

वृष्यो बलकरो हृद्यः शुक्रवृद्धिकरः परः।
कस्तूरीमोदकश्चायं चरकेन च भाषितः॥

कस्तूरीमोदकः॥ ३१६॥

भस्मसूतं मृतं कान्तलोहभस्म शिलाजतु।
शुद्धताप्यं शिलाव्योषं त्रिफलाविल्वजीरकम्॥
कपित्थं रजनीचूर्णं भृङ्गराजेन भावयेत्।
त्रिंशद्वारं विशोष्याथ लिह्याच्च मधुना सह॥
निष्कमात्रं हरेन्मेहान् मूत्रकृच्छ्रं सुदारुणम्।
महानिम्बस्य बीजञ्च षड्निष्कं पेषितञ्च यत्॥
पलं तण्डुलतोयेन घृतनिष्कद्वयेन च।
एकीकृत्य पिबेच्चानु हन्ति मेहं चिरोत्थितम्॥

मेहवज्रः॥ ३१७॥

कुमारीके वला देया चोषलवणसंयुता।
प्रमेहं हन्ति सकलं सप्ताहात् परतो नृणाम्॥
मृतवङ्गं सुवर्णञ्च कान्तलौहञ्च पारदम्।
मुक्ता गुड़त्वचञ्चैव सूक्ष्मैलापत्रकेशरम्॥
समभागं विचूर्ण्याथ कन्यानीरेण भावयेत्।
द्विमाषां वटिकां खादेत् दुग्धान्नं प्रपिबेत्ततः॥
प्रमेहं नाशयेत्याशु केशरी करिणं यथा।

कस्तूरीमोदके वर्णिता प्रियङ्गुः क्षुद्रा कण्टकारी जीरकद्वयं जीरकं कृष्णजीरकञ्च। उत्पलं कुष्ठम्। सर्वचूर्णात् चतुर्गुणेन शाल्मल्यादिरसेन पाचयेत्॥ ३१६॥

मेहवज्रे ताप्यं स्वर्णमाक्षिकं शिला मनःशिला॥ ३१७॥

शुक्रप्रवाहं समयेत् चिरात्नातसंशयः॥
चिरजातं प्रवाहञ्च मधुमेहञ्च नाशयेत्।

मेहकेशरी॥

सूतकं गन्धकं लौहं नागञ्चापि वराटिकाम्।
ताम्रकं वङ्गभस्मापि व्योमकञ्च समांशिकम्॥
सूक्ष्मैलापत्रमुस्तञ्च विडङ्गं नागकेशरम्।
रेणुकामलकञ्चैव पिप्पलीमूलमेव च॥
एषाञ्च द्विगुणं भागं मर्द्दयित्वा प्रयत्नतः।
भावना तत्र दातव्या धात्रीफलरसेन च॥
मात्रा चणकतुल्या च गुड़िकेयं प्रकीर्त्तिता।
प्रमेहं बहुमूत्रञ्च अश्मरीं मूत्रकृच्छ्रकम्॥
व्रणं हन्ति महाकुष्ठं अर्शांसि च भगन्दरम्।
योगेश्वरोरसोनाम महादेवेन भाषितः॥

योगेश्वरोरसः॥ २१८॥

इति रसेन्द्रसारसंग्रहे प्रमेहाधिकारः।

अथ सोमरोगचिकित्सा।

तालं सूतं समं गन्धं मृतलौहाभ्रवङ्गकम्॥
मर्द्दयेन्मधुनाचैव रसोयं तालकेश्वरः।
माषमात्रं भजेत् क्षौद्रैर्बहुमूत्रप्रशान्तये॥

योगेश्वररसे समांशिकमित्येकभागसमं बोध्यम्॥ २१८॥

उडुम्बरफलं पक्कं चूर्णितं कर्षमानतः।
संलेह्यं मधुना सार्द्धमनुपानं सुखावहम्॥

तालकेश्वरोरसः।

गगनं त्रिफला लौहं कुटजं कुटकत्रयम्॥
पारदं गन्धकञ्चैव विषटङ्कणसञ्ज्ञिकाः।
त्वगेला तेजपत्रञ्च वङ्गं जीरकयुग्मकम्॥
एतानि समभागानि श्लक्ष्णचूर्णानि कारयेत्।
तदर्द्धं चित्रकं चूर्णं कर्षैकं मधुना लिहेत्॥
अवश्यं विनिहन्त्याशु मूत्रातिसारसोमकम्।

गगनादिलौहम्॥ ३१९॥

कर्षं जारितलौहञ्च तदर्द्धं रसगन्धकम्।
एलापत्रं निशायुग्मं जम्बुवीरणगोक्षुरम्॥
विड़ङ्गं जीरकं पाठा धात्री दाड़िम टङ्कणम्।
चन्दनं गुग्गुलु लोध्रशालार्ज्जुनरसाञ्जनम्॥
छागीदुग्धेन वटीकां कारयेत् द्व्यरक्तिकाम्।
निर्म्मिता नित्यनाथेन सोमनाथरसस्त्वयम्॥
सोमरोगं बहुविधं प्रदरं हन्ति दुर्जयम्।
योनिशूलं मेढ्रशूलं सर्वजं चिरकालजम्॥
बहुमूत्रं विशेषेण दुर्जयं हन्त्यसंशयः।

सोमनाथरसः॥ ३२०॥

मूत्रगतविकारसाधर्म्मात् तथा प्रमेहान्तरस्य प्रायस्तुल्यत्वात् प्रमेहाधिकारएव प्रमेहविशेषस्य सोमरोगस्य चिकित्सामाह तालमित्यादि।

गगणादिलौहे गगणमभ्रं सोमकं सोमरोगम्॥ ३१९॥

सोमनाथरसे रसगन्धादीनां प्रत्येकं लौ चार्द्धमानम्॥ ३२०॥

हिङ्गुलसम्भवं सूतं पालिधारसमर्द्दितम्।
रक्ताशोधितगन्धञ्च तेनैव कज्जलीकृतम्॥
तद्द्वयोर्द्विगुणं लोहं कन्यारसविमर्द्दितम्।
अभ्रकं वङ्गकं रौप्यं खर्परं माक्षिकन्तथा॥
सुवर्णञ्च समं सर्वं प्रत्येकञ्च रसार्द्धकम्।
तत्सर्वं कन्याकाद्रावैर्मर्द्दयेद्भावयेत् ततः॥
भेकपर्णीरसेनैव गुञ्जाद्वयवटीं ततः।
मधुना भक्षयेच्चापि सोमरोगनिवृत्तये॥
प्रमेहान् विंशतिं हन्ति बहुमूत्रञ्च सोमकम्।
मूत्रातिसारं कृच्छ्रञ्च मूत्राघातं सुदारुणम्।
बहुदोषं बहुविधं प्रमेहं मधुसंज्ञकम्॥
हस्तिमेहमिक्षुमेहं लालामेहं विनाशयेत्।
वातिकं पैत्तिकञ्चैव श्लैष्मकं सोमसंज्ञकम्॥
नाशयेद्बहुमूत्रञ्च प्रमेहमविकल्पतः।

बृहत्सोमनाथरसः॥ ३२१॥

शालार्ज्जुनं लोध्रकञ्च कदम्बागुरुचन्दनम्।
अग्निमन्थं निशायुग्मं धात्रीदाड़िमगोक्षुरम्॥
जम्बुवीरणमूलञ्च भागमेषां पलार्द्धकम्।
रसगन्धकधान्याब्द मेलापत्रं तथाभ्रकम्॥
लोहं रसाञ्जनं पाठा विड़ङ्गं टङ्गजीरकम्।
प्रत्येकं पलिकं भागं पलार्द्धं गुग्गुलोरपि॥
घृतेन वटिकां कृत्वा खादेत् षोड़शरत्तिकाम्।

बृहत्सोमनाथरसे रक्ता मूषिकपर्णी॥३२१॥

गहनानन्दनाथेन रसो यत्नेन निर्म्मितः ॥
सोमेश्वरो महातेजा सोमरोगं निहन्त्यलम्।
एकजं द्वन्द्वजञ्चैव सन्निपातसमुद्भवम् ॥
मूत्राघातं मूत्रकृच्छ्रं कामलाञ्च हलीमकम्।
भगन्दरोपदंशौच विविधान् पीड़काव्रणान् ॥
विस्फोटार्व्वुदकण्डूश्च सर्व्वमेहं विनाशयेत्।
सोमेश्वरोरसः ॥ ३२२ ॥

इति रसेन्द्रसारसंग्रहे सोमरोगाधिकारः।

अथ स्थौल्याधिकारः।

त्र्यूषणं विजया चव्यं चित्रकं विड़मौद्भिदम् ॥
वागुजी सैन्धवञ्चैव सौवर्च्चलसमन्वितम्।
अयश्चूर्णेन संयुक्तं भक्षयेन्मधुसर्पिषा।
स्थौल्यापकर्षणं श्रेष्ठं बलवर्णाग्निवर्द्धनम्।
मेहघ्नं कुष्ठशमनं सर्व्वव्याधिहरं परम् ॥
नाहारे यन्त्रणा कार्य्या न विहारे तथैव च।
त्र्यूषणाद्यमिदं लौहं रसायनवरोत्तमम् ॥
त्र्यूषणाद्यं लौहम् ॥ ३२३ ॥

सोमेश्वरलौहे शालं शालसारं, अर्ज्जुनमिति अर्ज्जुनवल्कलम्। निशायुग्ममिति हरिद्राद्वयम् ॥ ३२२ ॥

प्रमेहवत् स्थौल्यस्यापि व्यायामसाध्यत्वात् तथा दुष्टमेदोजन्यत्वाच्च प्रमेहानन्तरं स्थौल्यचिकित्सामाह।

त्र्यूषणादिलौहे त्र्यूषणं त्रिकटु विजया शक्राशनम्। वागुजी सोमराजी लौहमत्र सर्व्वचूर्णसमम् ॥ ३२३ ॥

सूतभस्म सतालञ्च लौहं ताम्रं समं समम्।
मर्द्दयेत् सूर्य्यपत्रेण चास्य वल्लं प्रयोजयेत्॥
मधुना स्थूलरोगी च शोथे शूले तथैव च।
मध्वाज्यमनुपानञ्च देयञ्चापि कफोल्वने॥

वड़वाग्निलौहम्॥ ३२४॥

शुद्धसूतं समं गन्धं ताम्रं तालं समं समम्।
अर्कक्षीरैर्द्दिनं मर्द्यं क्षौद्रैर्लेह्यं त्रिगुञ्जकम्॥
वड़वाग्निरसोनाम्ना स्थौल्यमाशु नियच्छति।

वड़वाग्निरसः॥

इति रसेन्द्रसारसंग्रहे स्थौल्याधिकारः।

अथ उदररोगाधिकारः।

शुद्धसूतं द्विधा गन्धं ताम्राभ्रं सैन्धवं विषम्॥
कृष्णजीरं विड़ङ्गञ्च गुडूचीसत्वचित्रकम्।
उग्रगन्धा यवक्षारं प्रत्येकं कर्षमात्रकम्॥
निर्गुण्डिकाद्रवैरग्निवीजपूरद्रवैर्द्दिनम्।
मर्द्दयेत् शोषयेत् सोयं रसस्त्रैलोक्यसुन्दरः॥
गुञ्जाद्वयं घृतैर्लेह्यं वातोदरकुलान्तकम्।
वह्निचूर्णं यवक्षारं प्रत्येकञ्च पलद्वयम॥
घृतप्रस्थं विपक्तव्यं गोमूत्रैश्च चतुर्गुणैः।

घृतावशेषं कर्त्तव्यं कर्षमात्रं पिबेदनु ॥

त्रैलोक्यसुन्दरीरसः।

शुद्धसूतं द्विधागन्धं मृताकांयः शिलाजतु ॥
रससमानं प्रदातव्यं रसस्य द्विगुणं विषम्।
त्रिकटु चित्रकं वीरा निर्गुण्डी मूषलीरजः॥
अजमोदा विषांशेन प्रत्येकञ्च नियोजयेत्।
निम्बपञ्चाङ्गलक्वाथैर्भावना चैकविंशतिः॥
भृङ्गराजरसैः सप्त दत्वा चौद्रैर्विलोड़येत्।
भक्षयेद्बदरास्थ्याभां वटिकां तां दिवानिशि ॥
श्लेष्मोदरं निहन्त्याशु नाम्ना वैश्वानरीवटी।
देवदारु वह्निमूलकल्कं चीरेण पाययेत्।
भोजनं मेषदुग्धेन कुलत्थानां रसेन तु ॥

वैश्वानरीवटी॥ २२५॥

पिप्पली मरिचं ताम्रं रजनीचूर्णसंयुतम्।
स्नुहीचीरैर्दिनं मर्द्यं तुल्यं जैपालवीजकम्॥
निष्कं खादेद्विरेकं स्यात् सद्यो हन्ति जलोदरम्।
रेचनानाञ्च सर्वेषां दध्यन्नं स्तम्भनेहितम्॥
दिनान्ते च प्रदातव्यमन्नं वा मुद्गयूषकम्।

जलोदरारिरसः॥ २२६॥

उदरोत्सेधसाधर्म्यात् स्थौल्यानन्तरमुदरचिकित्सितमुच्यते। शुद्ध-सूतमित्यादि।

वैश्वानरीवटिकायां अर्कं ताम्रं अयो लौहं मूषलीरजः तालमूलीचूर्णं विषांशेनेति विषार्द्धभागेन पञ्चाङ्गुलक्वाथैरेरण्डमूलक्वाथैः॥२२५॥

सूतस्य गन्धकस्याष्टौ रजनी त्रिफला शिवाः।
प्रत्येकञ्च द्विभागं स्यात् त्रिवृज्जैपालचित्रकम्॥
प्रत्येकञ्च त्रिभागञ्च व्योषं दन्तिकजीरकम्।
प्रत्येकं सप्तभागं स्यादेकीकृत्य विचूर्णयेत्॥
जयन्ती स्नुक्पयोभृङ्गवह्निवातारितैलकैः।
प्रत्येकेन क्रमाद्भाव्यं सप्तवारं पृथक् पृथक्॥
महावह्निरसोनाम्ना निष्कमुष्णजलैः पिबेत्।
विरेचनं भवेत्तेन तक्रभुक्तं ससैन्धवम्॥
दिनान्ते दापयेत् पथ्यं वर्जयेच्छीतलं जलम्।
सर्वोदरहरः प्रोक्तः श्लेष्मवातहरःपरः॥

वह्निरसः॥ ३२७॥

द्वौ भागौ शिववीजस्य गन्धकस्य चतुष्टयम्।
अभ्रवह्निविडङ्गानां गुडूचीसत्वनागयोः॥
कृष्णजीरकटूनाञ्च लवणक्षारयोरपि॥
प्रत्येकं भागमादाय मर्द्दयेत् सुरसाद्रवैः।
वीजपूररसैर्भूयो मर्द्दयित्वा विशोषयेत्॥
त्रैलोक्यडुम्बरोनाम वातोदरकुलान्तकः।
गुञ्जाद्वयं ततश्चास्य दद्यात घृतसंयुतम्॥

जलोदरारिरसे तुल्यं जैपालवीजकमिति सर्व्वचूर्णसमं जैपालचूर्णम्॥ ३२६॥

वह्निरसे रजनी हरिद्रा, शिवा मनःशिला। त्रिवृत् त्रिवृच्चूर्णम्। वातारितैलकैरित्येरण्डतैलैः॥ ३२७॥

भोजयेत् स्निग्धमुष्णञ्च पायसञ्च विवर्जयेत्।

त्रैलोक्यडुम्बरोरसः ॥ ३२८ ॥

चतुःसूतस्य गन्धाष्टौ रजनी त्रिफला शिलाः।
प्रत्येकन्तु त्रिभागं स्याद्दन्ती त्रयूषणजीरकम् ॥
प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णयेत्।
जयन्तीस्नुकपयोभृङ्गवह्निवातारितैलकैः ॥
प्रत्येकेन क्रमाद्भाव्यं सप्तवारं पृथक् पृथक्।
महावह्निरसोनाम निष्कमुष्णजलैः पिवेत् ॥
विरेचनं भवेत्तेन तक्रमुष्णं ससैन्धवम्।
दिनान्ते दापयेत् पथ्यं वर्जयेच्छीतलं जलम् ॥
सर्वोदरहरःप्रोक्तो मूढ़वातहरःपरः।

महावह्निरसः ॥ ३२९ ॥

शुण्ठीमरिचसंयुक्तं रसगन्धकटङ्कणम्।
जैपालो द्विगुणः प्रोक्तः सर्वमेकत्र चूर्णयेत् ॥
इच्छाभेदी द्विगुञ्जः स्यात् सितयासह दापयेत्।
पिबेत्त चुल्लकान् यावत्तावद्दारान् विरेचयेत् ॥

इच्छाभेदीरसः ॥

त्रैलोक्यडुम्बररसे शिववीजं पारदः नागं सीसकम्। अभ्रादि-रान्तानाञ्चैकादशद्रव्यानां प्रत्येकमेकोभागः ॥ ३२८ ॥

महावह्निरसे चतुःसूतेति चतुर्भागः सूतस्य हरिद्रादिहरीतक्या-न्तानां प्रतेत्रकं द्विभागः तेन प्रत्येकं सूतार्द्धम्। त्रिवृतादिचित्रका-न्तानां प्रतेत्रकं त्रिभागः। दन्त्यादिजीरकान्तानां प्रत्येकञ्चाष्टौभागाः तेन गन्धकसमत्वम् ॥ ३२९ ॥

पिप्पलीमूलचित्ताभ्र त्रिकत्रयेन्दुसैन्धवम्।
सर्वं चूर्णं समं लोहं हन्ति सर्वोदरामयम्॥

पिप्पल्याद्यं लौहम्॥

पारदं शुक्ति तुत्थञ्च जैपालं पिप्पलीसमम्।
आरग्वधफलान्मज्जा वज्रीक्षीरेण मर्द्दयेत्॥
माषमात्रां वटीं खादेत् क्षीणां जलोदरं जयेत्
चिञ्चाफलरसञ्चानुपथ्यं दध्योदनं हितम्॥
दकोदरहरश्चैव तीव्रेण रेचनेन च।

उदरारिरसः॥ ३३०॥

सूतं भस्म वङ्गभस्मभागैकं संप्रकल्पयेत्।
गन्धकं मृतताम्रञ्च प्रत्येकञ्च चतुःपलम॥
अर्कक्षीरैर्दिनं मर्द्यं सर्वन्तद्गोलकीकृतम्।
रुद्ध्वा तद्भूधरे पक्त्वा पुटकेन समुद्धरेत्॥
एष वङ्गेश्वरोनाम पीतो गुल्मोदरं जयेत्।
घृतैर्गुञ्जाद्वयं लेह्यं निष्कां श्वेतपुनर्नवाम्॥
गवां मूत्रैः पिवेच्चानु रजनीम्वा गवां जलैः।

वङ्गेश्वरोरसः॥ ३३१॥

इत्युदराधिकारः।

उदरारिरसे वज्रीक्षीरेण स्नुहीक्षीरेण॥ ३३०॥
वङ्गेश्वरे भागैकं संप्रकल्पयेदिति प्रत्येकं पलमित्यर्थः॥ ३३१॥

अथ प्लीहरोगचिकित्सा।

रोहितकसमायुक्तं त्रिकत्रययुतन्त्वयः।
प्लीहानमग्रमांसञ्च यकृतञ्च विनाशयेत्॥

रोहितकलौहम्॥ ३३२॥

पारदं गन्धकञ्चैव समभागं विमर्द्दयेत्।
मृताभ्रं रसतुल्यञ्च यत्नतः परिमर्द्दयेत्॥
रसाद्द्विगुणलौहञ्च लौहतुल्यञ्च ताम्रकम्।
भस्म वराटिकायाश्च ताम्रतस्त्रिगुणं कुरु॥
नागवल्लीदलेनैव मर्द्दयेद्यत्नतो भिषक्।
पुटेद्गजपुटे विद्वान् स्वाङ्गं शीतं समुद्धरेत्॥
यकृत् प्लीहोदरं गुल्मं श्वयथुञ्च विनाशयेत्।
पिप्पलीमधुसंयुक्तां सगुड़ां वा हरीतकीम्॥
गोमूत्रञ्च पिबेच्चानु गुड़ं वा जीरकान्वितम्।

लोकनाथोरसः॥

शुद्धसूतं द्विधागन्धं खल्ले कृत्वा तु कज्जलम्।
सूततुल्यं जारिताभ्रं मर्द्दयेत् कन्यकाम्बुना॥
ततो द्विगुणितं दद्यात् ताम्रं लौहं प्रयत्नतः।
काकमाचीरसेनैव सर्वं तत् परिमर्द्दयेत्॥
सूताच्च द्विगुणं गन्धं वराटीसम्भवं रजः।

प्लीहवृद्ध्या उदरसम्भवादनन्तरं प्लीहचिकित्सामाह।

रोहितकलौहे रोहितको रोहनेति ख्यातो वृक्षः, तस्य वल्कलं ग्राह्यम्। अत्र सर्वचूर्णसमं लौहं मधुना लौहपात्रे विमर्द्द्य रक्तिकादिक्रमेण विदध्यात्॥ ३३२॥

पिष्ट्वा जम्बीरनीरेण मूषायुग्मं प्रकल्पयेत् ॥
तन्मध्ये गोलकं चिप्त्वा यत्नेन छादयेद्भिषक् ।
शरावसम्पुटं कृत्वा स्नुह्यम्ललवणाम्बुभिः ॥
शरावसन्धिमालिप्य चातपे शोषयेत् त्र्यहम् ।
ततो गजपुटं दत्त्वा स्वाङ्गशीतं समुद्धरेत् ॥
पिष्ट्वा तु सर्वमेकत्र स्थापयेद्भाजने शुभे ।
खादेद्वल्लद्वयञ्चास्य मूत्रञ्चानु पिबेन्नरः ।
मधुना पिप्पलीचूर्णं सगुड़ां वा हरीतकीम् ।
अजाजीं वा गुडेनैव भचयेत्तुल्ययोगतः ॥
यकृत् प्लीहोदरोग्रञ्च श्वयथुञ्च विनाशयेत् ।
वाताष्ठीलाञ्च कमठीं प्रत्यष्ठीलां तथैव च ॥
कांस्यक्रोड़ाग्रमांसञ्च शूलञ्चैव भगन्दरम् ।
वह्निमान्द्यञ्च कासञ्च लोकनाथरसोत्तमः ॥

बृहल्लोकनाथोरसः ॥

हिङ्गु त्रिकटुकञ्चैव अपामार्गस्य पत्रकम् ।
अर्कपत्रन्तथा स्नुहीपत्रञ्च समभागिकम् ॥
सैन्धवन्तत्समं ग्राह्यं लौहं ताम्रञ्च तत्समम् ।
प्लीहानं यकृतं गुल्ममामवातं सुदारुणम् ॥
अर्शांसि चारमुदरं मूर्च्छां पाण्डुं हलीमकम् ।
ग्रहणीमतीसारञ्च यक्ष्माणं शोथमेव च ॥

ताम्रेश्वरवटी ॥ ३२२ ॥

ताम्रेश्वरे अपामार्गपत्रस्य तथा अर्कपत्रस्य तथा स्नुहीपत्रस्य च चारमित्यत्रपदिशन्ति वृद्धाः ॥ ३२२ ॥

तुल्यरामठ टङ्गानि सैन्धवं धान्यजीरकम्।
यमानी मरिचं शुण्ठी लवङ्गैला विड़ङ्गकम्॥
प्रत्येकं तोलकं चूर्णं लौहचूर्णन्तु तत्समम्।
रसस्य गन्धकस्यापि पलैकं कज्जलीकृतम्॥
घृतेन मधुना खाद्यं लौहमग्निकुमारकम्।
यकृत् प्लीहोदरहरं गुल्मञ्चापि हलीमकम्॥
वलवर्णाग्निजननं कान्तिपुष्टिविवर्द्धनम्
श्रीमद्गहननाथेन निर्मितं विश्वसम्पदे॥

अग्निकुमारलौहम्॥ ३३४॥

लौहं ताम्रं वराटञ्च तुल्यं हिङ्गु फलत्रिकम्।
स्नुहीमूलं यवक्षारं जैपालं टङ्गणं त्रिवृत्॥
प्रतेरकञ्च पलं ग्राह्यं छागीदुग्धेन पेषितम्।
चतुर्गुञ्जां वटीं खादेद्वारिणा मधुनापि वा॥
प्राणवल्लभनामायं गहनानन्दभाषितः।
दोषं रोगञ्च संवीक्ष्य युक्त्या वा त्रुटीवर्द्धनम्॥
निहन्ति कामलां पाण्डुमानाहं श्लीपदार्व्वुदम्।
गलगण्डं गण्डमालां व्रणानि च हलीमकम्॥
अपचीं वातरक्तञ्च कण्डुं विस्फोटकुष्ठकम्।
नातःपरतरः श्रेष्ठः कामलार्त्तिभयेष्वपि॥

प्राणवल्लभोरसः॥ ३३५॥

अग्निकुमारलौहे रामठं हिङ्गु॥ ३३४॥

प्राणवल्लभरसे फलत्रिकं त्रिफला॥ ३३५॥

द्विकर्षं लौहचूर्णस्य चाभ्रकस्य पलार्द्धकम्।
कर्षं शुद्धं मृतं ताम्रं लिम्बाकाङ्क्षित्वचं पलम्।
मृगाजिनभस्मपलं सर्वमेकत्र कारयेत्॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक्।
यावत् प्लीहोदरञ्चैव कामलाञ्च हलीमकम्॥
कासं श्वासं ज्वरं हन्याद्बलवर्णाग्निकारकम्।
यकृदरिरिदं लौहं वातगुल्मविनाशनम्॥

यकृदरिलौहम्॥ ३३६॥

शुद्धसूतं समं गन्धं जारिताभ्रं समं समम्।
गन्धकाद्विगुणं लौहं मृतताम्रचतुर्गुणम्॥
द्विक्षारं टङ्कणं विड़ं वराटमथशङ्खकम्।
चित्रकं कुनटीतालं कटुकी रामठन्तथा॥
रोहितकन्त्रिवृच्चिञ्चा विशालाधवमङ्कोठम्।
अपामार्गं तालखण्डं मल्लिका च निशायुगम्॥
कानकन्तुत्थकञ्चैव यकृन्मर्द्दं रसाञ्जनम्।
एतानि समभागानि चूर्णयित्वा विभावयेत्॥
आर्द्रकस्वरसेनैव गुडूच्याः स्वरसेन च।
मधुनः कुड़वैर्भाव्यं वटिका माषमात्रतः॥
अनुपानं प्रदातव्यं बुद्ध्वा दोषानुसारतः।
भक्षयेत् प्रातरुत्थाय सर्वरोगकुलान्तकम्॥
प्लीहानं ज्वरमुग्रञ्च कासञ्च विषमज्वरम्।
चिरजं कुलजञ्चैव श्लीपदं हन्तिदारुणम्॥

यकृदरिलौहे निम्बाकाङ्क्षित्वचं निम्बाकमूलवल्कलम्॥ ३३६॥

रोगानेकविनाशाय धन्वन्तरिकृतं पुरा।
मृत्युञ्जयमिदं लौहं सिद्धिदं शुभदं नृणाम्॥

मृत्युञ्जयलौहम्॥ २२७॥

हिङ्गुलं गन्धकं टङ्कमभ्रकं विषमेव च।
प्रत्येकं पलिकं भागं चूर्णयेद्दतिचिक्कणम्।
पिप्पली मरिचञ्चैव प्रत्येकञ्च पलार्द्धकम्।
मर्द्दयित्वा वटीं कुर्य्यात् वल्लमात्रां प्रयत्नतः।
सेव्या शेफालिदलजैर्व्वटी माक्षिकसंयुता।
प्लीहानं षट्प्रकारञ्च हन्ति शीघ्रं न संशयः।
ज्वरं मन्दानलञ्चैव कासं श्वासं वमिं भ्रमिम्।
प्लीहार्णव इति ख्यातो गहनानन्दभाषितः।

प्लीहार्णवोरसः॥ २२८॥

सूतकं गन्धकं व्योषं समभागं पृथक् पृथक्।
एभिः समं ताम्रभस्म योजयेद्वैद्यबुद्धिमान्।
मनःशिला वराटञ्च तुत्थं रामठलौहकम्।
जयन्ती रोहितञ्चैव चारटङ्कणसैन्धवम्।
विड़ं चित्रं कानकञ्च रसतुल्यं पृथक् पृथक्।
भावयेन्त्रिदिनं यावत् त्रिवृच्चित्रकयार्द्रकैः।

मृत्युञ्जयलौहे जारिताभ्रमिति मृताभ्रम्। मृतताम्रं चतुर्गुणमिति भस्मताम्रं गन्धकाच्चतुर्गुणमित्यर्थः। कुनटी मनःशिला चिञ्चा तिन्तिड़ीत्वगभस्म। धवः खदिरः॥ २२७॥

प्लीहार्णवे जम्बीररसेन शोधितं हिङ्गुलं ग्राह्यम्। विषञ्चात्मनो-मूत्रशोधितम्। शेफालिदलजैरित्यत्र रसैरितिशेषः॥ २२८॥

गुञ्जामात्रां वटीं खादेत् सद्यः प्लीहविनाशनम्।
मधुपिप्पलीसंयुक्तां द्विगुञ्जां वा प्रयोजयेत्।
प्लीहानमग्रमांसञ्च यकृद्गुल्मं सुदुस्तरम्।
आमाशयेषु सर्वेषु चोदरे शोथविद्रधौ।
अग्निमान्द्ये ज्वरेचैव प्लोह्नि सर्वज्वरेषु च।
श्रीमद्गहननाथेन भाषितः प्लीहशार्द्दूलः।

प्लीहशार्द्दूलोरसः॥ ३३९॥

द्विकर्षं लौहभस्मापि कर्षं ताम्रं प्रदापयेत्।
शुद्धसूतं तथा गन्धं कर्षमानं भिषग्वरः।
मृगाजिनं पलं भस्म लिम्पाकाङ्घ्रित्वचः पलम्।
एवं भागक्रमेणैव कुर्य्यात् प्लीहारिकां वटीम्।
नवगुञ्जमितां खादेत्ताय नित्यं हि पूतवान्।
प्लीहानं यकृतं गुल्मं हन्त्यावश्यं न संशयः।

प्लीहारिरसः॥ ३४०॥

कर्षैकं तालचूर्णस्य तत्पादांशं सुवर्णकम्।
पलार्द्धं मृतताम्रञ्च तत्समं शुद्धमभ्रकम्।
मृगाजिनस्य भस्मापि कर्षमत्रप्रदापयेत।
लिम्पाकाङ्घ्रित्वचस्तद्वत् सर्वमेकत्रकारयेत्॥
रसगुञ्जाप्रमाणेन वटिकां कारयेत्ततः।
मधुना वह्निचूर्णेन खादेन्नित्यं यथाबलम्॥

प्लीहशार्द्दूलरसे क्षारं यवक्षारं कानकं जैपालम्॥ ३३९॥
प्लीहारिरसे शुद्धसूतं तथा गन्धं कर्षमानमित्यत्र प्रत्येकमिति शेषः॥ ३४०॥

असाध्यमपिप्लीहानं हन्त्यवश्यं न संशयः।
यकृतं पाण्डुरोगञ्च गुल्मादिकभगन्दरान्॥

प्लीहारिरसः॥ ३४१॥

रसगन्धकलौहाभ्रं कुनटी मृततास्रकम्।
विषमुष्टि वराटञ्च तुल्यं शङ्ख रसाञ्जनम्॥
जातीफलञ्च कटुकी द्विक्षारं कानकन्तथा।
व्योषं हिङ्गु सैन्धवञ्च प्रत्येक सूततुल्यकम्॥
श्लक्ष्णचूर्णीकृतं सर्वमेकत्र भावयेत्ततः।
सूर्य्यावर्त्तरसेनैव विल्वपत्ररसेन च॥
सूर्य्यावर्त्तेन मतिमान् वटिकां कारयेत्ततः।
प्लीहानां यकृतं गुल्ममष्ठिलाञ्च विनाशयेत्॥
अग्रमांसं तथाशोथं तथा सर्व्वोदराणि च।
वातरक्तञ्च कमठं चान्तर्विद्रधिमेव च॥

लौहमृत्युञ्जयोरसः॥ ३४२॥

रसगन्धक लौहाभ्रं कुनटितुल्यतास्रकम्।
सैन्धवञ्च वराटञ्च वागुजीविड़शङ्खकम्॥
चित्रकं हिङ्गुकटुकी द्विक्षारं कट्फलन्तथा।
रसाञ्जनं जयन्तीच टङ्कणं समभागिकम्॥
एतत्सर्व्वं विचूर्ण्याथ दिनःमेकं विभावयेत्।
आर्द्रकस्वरसेनैव गुडूच्याः स्वरसेन च॥

प्लीहारिरसे रसगुञ्जा षड्गुञ्जेत्यर्थः॥ ३४१॥
लौहमृत्युञ्जयरसे कानकं जैपालफलम्॥ ३४२॥

गुञ्जामात्रां वटीं कृत्वा भक्षयेन्मधुना सह।
नानारोग प्रशमनो यकृद्गुल्मोदराणि च॥
अग्रमांसं तथाप्लीहमग्निमान्द्यमरोचकम्।
एतान् सर्वान् निहन्त्याशु भास्करस्तिमिरं यथा॥
महामृत्युञ्जयोनाम महेशेन प्रकाशितः।

महामृत्युञ्जयोरसः॥ २४३॥

विड़ङ्गं त्र्यूषणं हिङ्गु कुष्ठं लवणपञ्चकम्।
त्रिक्षारं फेणकं चव्यं श्रेयसी कृष्णजीरकम्॥
तालपुष्पोद्भवं क्षारं नाड्याः कुष्माण्डकस्य च।
अपामार्गोद्भवं क्षारं चिञ्चायाः चित्रकस्तथा॥
एतानि समभागानि पुराणो द्विगुणो गुड़ः।
गुड़तुल्यं प्रदातव्यं चूर्णञ्चैवकणोद्भवम्॥
मर्द्दयित्वा दृढ़े पात्रे मोदकानुपकल्पयेत्।
भक्षयेद्वर्द्धयेन्नित्यं प्लीहानं हन्ति दुस्तरम्॥
प्रमेहं पाण्डुरोगञ्च कामलं वह्निमान्द्यकम्।
यकृतं पञ्चगुल्मञ्च तूदरं सर्वरूपकम्॥
जीर्णज्वरं तथाशोथं कासं पञ्चविधन्तथा।
अश्विभ्यां निर्म्मिताह्येषा बृहद्गुड़पिप्पली॥

बृहद्गुड़पिप्पली॥ २४४॥

महामृत्युञ्जये वागुजी हाकुचीति ख्याता केचित्तु सोमराजी-त्याहुः॥ २४३॥

गुड़पिप्पलीकायां त्र्यूषणं त्रिकटुकं फेणकं समुद्रफेणं तालपुष्पो-द्भवक्षारमिति तालखण्डक्षारमित्यर्थः॥ २४४॥

अभ्रपारदगन्धञ्च कर्षद्वयमितं पृथक्।
सर्वैः समं भवेत्ताम्रं जम्बीराम्लेन मर्द्दयेत्॥
सूर्य्यावर्त्तरसैः पश्चात् कणा मोचरसेन च।
योजयेत्तीव्रघर्म्मे तु यावत् सर्वन्तु जीर्य्यति॥
जम्बीरस्य रसैर्भूयो रसं दण्डेन चालयेत्।
दृढ़े शिलामये पात्रे चूर्णयेदतिशोभनम्॥
रक्तिद्वयक्रमेणैव योज्यं माषद्वयावधि।
ह्रासयेच्च क्रमेणैव तथाचैव विवर्द्धयेत्॥
जीर्णे भुञ्जीतशाल्यन्नं क्षीरं घृतसमन्वितम्।
हन्त्यम्लपित्तं विविधं ग्रहणीं विषमज्वरम्॥
चिरज्वरं प्लीहगदं यकृद्रोगं सुदुस्तरम्।
अग्रमांसं तथा शोथं कांस्यक्रोड़ं सुदुर्जयम्॥
कमठञ्च तथा शोथमुदरञ्च सुदारुणम्।
धातुवृद्धिकरं वृष्यं वलवर्णकरं शुभम्॥
सद्योवह्निकरञ्चैव सर्वरोगहरं परम्।
मुखशुद्धिविधातव्यं पर्णैश्चूर्णसमन्वितैः॥
ताम्रकल्पमिदं नाम्ना सर्वरोगप्रशान्तये।

ताम्रकल्पम्॥

दारुसैन्धवगन्धञ्च भस्मीकृत्य प्रयत्नतः।
प्लीहानमग्रमांसञ्च यकृतञ्च विनाशयेत॥ ३४५॥

सामुद्रं सैन्धवं काचं यवक्षारं सुवर्च्चलम्।
टङ्कणं स्वर्जिकाक्षारस्तुल्यं सर्वं विचूर्णयेत्॥
अर्कक्षीरैः स्नुहीक्षीरैरातपे भावयेत्त्र्यहम्।
तेन लिप्तार्कपत्रञ्च रुद्धा चान्तःपुटे पचेत्॥
तत्क्षारं चूर्णयेत् पश्चात् त्र्यूषणन्त्रिफलारजः।
जीरकं रजनीवह्निनवभागं समं समम्॥
क्षारार्द्धमेव सर्वञ्च एकीकृत्य प्रयोजयेत्।
वज्रक्षारमिदं सिद्धं स्वयं प्रोक्तं पिनाकिना॥
सर्वोदरेषु गुल्मेषु शूलदोषेषु योजयेत्।
अग्निमान्द्येप्यजीर्णेऽपि भक्ष्यं निष्कद्वयं द्वयम्॥
वाताधिके जलं कोष्णं घृतं वा पैत्तिके हितम्।
कफे गोमूत्रसंयुक्तं मारनालं त्रिदोषजे॥

वज्रक्षारम्॥ ३४६॥

रसगन्धकभस्मताम्रकं कटुकक्षारयुगं सटङ्कणम्।
कणमूलकचव्यचित्रकं लवणानि यमानी रामठम्॥
समभागमिदं विभावयेत् खरातपेत्वथ जम्बुवारिणा।
उदरामयकुम्भिकेशरीरस एष प्रथितोऽस्य माषकः॥
सुरवार्य्यनुदापयेद्भिषक् प्रसभं हन्ति व्रणजं गदम्।
यकृतं क्रिमिमग्रमांसकं कमठं प्लीहजलोदरादृयम्।

वज्रक्षारे सामुद्रादिसर्वं स्नुहीक्षीरैरातपे भावयेत् ततस्तेन कल्केना-
र्कपत्रं ताम्रपत्रं लिप्त्वा अन्तर्दग्धव्यं यथा भस्मो भवति। ततस्तत्क्षार-
सहितं ताम्रं विचूर्ण्य त्र्यूषणादिचूर्णैः सह यथोक्तं व्यवहृत्य भक्ष्येदिति
॥ ३४६॥

जठरानलसादगुल्मकं परमसाममथाम्लपित्तकम् ।
उदरामयकुम्भिकेशरी ॥ २४७ ॥

चतुर्विंशतिभागाः स्युर्गन्धादङ्कं तदर्द्धकम् ।
वङ्गभागाश्चवेदर्द्धः पारदः कृष्णमभ्रकम् ॥
चतुर्द्दशविभागं स्यान्मृतं तद्दीयते पुनः ।
मृतलौहमष्टभागं मृतताम्रं नवात्र तत् ।
मृतहेमद्वयं तेषां मृतरूप्यञ्च सप्तकम् ।
अतिशुद्धमितिस्थूलं मृतं हीरं त्रयोदश ।
भागा ग्राह्या माचिकस्य विशुद्धस्यात्रषोड़श ।
अष्टादशमितं ग्राह्यं नवकाशीशकं पुनः ॥
तुत्थकञ्च षडेवात्र नवीनं ग्राह्यमेव च ।
तालकञ्च चतुर्भागं शिला योज्यास्त्रयोबुधैः ॥
शैलेयं पञ्च दातव्यं सर्वमेकत्र नूतनम् ।
मृतमौक्तिकभागैकं सौभाग्यं द्वयमेव च ॥
कुट्टयित्वा विचूर्ण्याथ जम्बीरस्य रसेन वै ।
भावयेत् सप्तधागाढ़ं गुड़िकान्तस्य कारयेत् ॥
पानकद्वितये कृत्वा मुद्रयेत् पानकद्वयम् ।
घटमध्ये निवेश्याथ दत्वा पूर्वञ्च वालुकाम् ॥
ऊर्द्धञ्च तां पुनर्दत्वा वालुकां मुद्रयेन्मुखम् ।
अहोरात्रं दहेदग्नौ स्वाङ्गशीतं समुद्धरेत् ॥

उदरामयकुम्भिकेशरीरसे शुल्वं ताम्रं कटुका त्रिकटुकं लवणानि पञ्चलवणानि अत्र चव्यं चित्रकचूर्णञ्च न प्रयच्छन्ति वृद्धाः कणामूलं पिप्पलीमूलं चान्द्रसत्वात् हस्वः एवं सुर इत्यत्रापि ॥ २४७ ॥

इति प्लीहाधिकारः ।

वकुलस्य च वीजेन कण्टकारीद्वयेन च।
गुडूची त्रिफला धारा भावयेत् सप्तसप्ततः॥
वृद्धदाररसेनापि तथा देयास्तु भावनाः।
गिरिकर्ण्यारसेनापि रोहितमत्स्यपित्ततः॥
एवं सिद्धो भवेत् सम्यक् रसोऽसौ वारिशोषणः।
देवान् गुरून् समभ्यर्च्य यतिनो गुरवस्तथा॥
रक्तिकाद्वितयं देयं सन्निपाते समुच्छ्रये।
मरिचेन समं देयं तेन जागर्त्ति मानवः॥
श्लैष्मिके च गदे देयं ग्रहण्यामग्निमान्द्यके।
शोफे पाण्डौ प्रयोक्तव्य त्रिकटुत्रिफलाम्भसा॥
शूलरोगे प्रयोक्तव्यमुदावर्त्ते विशेषतः।
कुष्ठे सुदुष्टे देयोऽयं काकोडुम्बरिकाम्भसा॥
अतिवह्निकरः शीघ्रो बलवर्णाग्निवर्द्धनः।
धन्वन्तरिकृतः सद्यो रसः परमदुर्लभः॥
सर्वरोगे प्रयोक्तव्यो निःसन्देहं भिषग्वरैः।

वारिशोषणोरसः॥

सूतं गन्धं तपनं गगनं कान्तलोहस्य चूर्णम्।
कृत्वैकस्मिन् दृषदि पेषितं शृङ्गवेरस्य धारा।
युञ्ज्याद्रोगे यकृति गुदजे शोफे सर्वज्वरेषु॥
शोथे पाण्डौ क्रिमिकृतगदे सर्वतः कामलायाम्।
कासे श्वासे च मेहे जठरजलगदे सर्वदोषप्रभूते॥
ख्यातो योगः सुरमणिकृतः सर्वरोगैकहन्ता सर्वतोभद्रः॥

इति शोथाधिकारः।

अथ शोथरोगचिकित्सा।

त्रिकटु त्रिफला दन्ती मार्गंत्रिमदशुण्ठकैः॥
पुनर्नवासमायुक्तं शोथं हन्ति सुदुस्तरम्।
लौहं शोथोदरस्थौल्यं जलोदरनिवारणम्॥

त्रिकट्वाद्यं लौहम्॥ २४८॥

कटुकी त्र्यूषणं दन्ती विड़ङ्गं त्रिफला तथा।
चित्रकी देवकाष्ठञ्च त्रिवृद्वारणपिप्पली॥
तुल्यान्येतानि चूर्णानि द्विगुणं स्यादयोरजः।
क्षीरेण पीतमेतत्तु श्रेष्ठं श्वयथुनाशनम्॥

कटुकाद्यं लौहम्॥ २४९॥

अयोरजस्त्र्यूषणयावशूकं चूर्णञ्च पीतं त्रिफलारसेन।
शोथं निहन्यात् सहसा नरस्य यथाऽशनिर्वृक्षमुदीर्णवेगः॥

त्र्यूषणाद्यं लौहम्॥ २५०॥

सुवर्चला व्याघ्रनखं चित्रकं कटुरोहिणी।
चव्यञ्च देवकाष्ठञ्च दीप्यकं लौहमेव च॥
शोथं पाण्डुं तथा कासमुदराणि निहन्ति च।

सुवर्चलाद्यं लौहम्॥

उत्सेधसाधर्म्यादनन्तरं शोथचिकित्सामाह।

त्रिकट्वादिलौहे शुण्ठकैरिति मूलकशुण्ठकैः। लौहमत्र सर्वचूर्णसमम्॥ २४८॥

कटुकादिलौहे त्र्यूषणं त्रिकटु। वारणपिप्पली गजपिप्पली॥ २४९॥

त्र्यूषणादिलौहे सर्वचूर्णं समं लौहम्॥ २५०॥

चारद्वयं स्याल्लवणानि पञ्च
अयश्चतुष्कं त्रिफला च व्योषम्।
सपिप्पलीमूलविड़ङ्गसारं
मुस्तायमोदामरदारु विल्वम्॥
कलिङ्गकश्चित्रकमूल पाठा
यष्ट्याह्वयं सातिविषं पलाशम्।
सहिङ्गु कर्षन्त्वतिसूक्ष्मचूर्णं
द्रोणं तथा मूलशुण्ठकाणाम्॥
स्याद्भस्मनतस्तत् सलिलेन साध्य
मालोड्य यावद् घनमप्यदग्धम्।
स्त्यानं ततः कोलसमाञ्च मात्रां
कृत्वा तु शुष्कां विधिना प्रयुञ्ज्यात्॥
प्लीहोदरं श्वित्र हलीमकार्शः
पाण्ड्वामयारोचक शोथ शोषान्।
विसूचिका गुल्मगवाश्मरीञ्च
सश्वासकासान् प्रणुदेत् सकुष्ठान्॥
सौवर्चलं सैन्धवञ्च विड़मौद्भिदमेव च
सामुद्रलवणाच्चात्र जलमष्टगुणं भवेत्।

चारगुड़िका॥ २५१॥

चारगुड़िकायां लवणानि पञ्चेति पञ्चलवणानि अयश्चतुष्कमिति चतुर्विधं लौहं ग्राह्यम्। विड़ङ्गसारं विड़ङ्गतण्डुलम्। मूलकभस्मनः सलिलं पुनःपाकात् घनतामुपगते यवक्षारादिसर्वं प्रक्षेपनीयम्। ५१॥

इति शोथाधिकारः।

सूतभस्म वङ्गभस्म भागैकैकं प्रकल्पयेत्।
गन्धकं मृततास्रञ्च प्रतेत्रकञ्च चतुर्गुणम्॥
अर्कक्षीरैर्दिनं मर्द्यं सर्वन्तद्गोलकीकृतम्।
रुद्ध्वा तु भुधरे पक्ता पुटकेन समुद्धरेत्॥
एष वह्निश्वरोनाम्ना प्लीहगुल्मोदरान् जयेत्।
घृतैर्गुञ्जाद्वयं लिह्यान्निष्कां श्वेतपुनर्नवाम्॥
गवां मूत्रैः पिबेच्चानु रजनीं वा गवां जलैः।
वह्निश्वरः॥

इति शोथाधिकारः।

अथार्बुदरोगचिकित्सा।

शुद्धसूतं समं गन्धं मर्द्यं यामचतुष्टयम्॥
नागवल्लीरसैर्युक्तं मेघनाद पुनर्नवैः।
गोमूत्र पिप्पलीयुक्तं मर्द्यं रुद्ध्वा पुटेल्लघु॥
लिह्यात् क्षौद्रै रसोरौद्रो गुञ्जामात्रोर्बुदं जयेत्।
रौद्रोरसः॥ ३५२॥
रामवाणादिकान् योगवाहिनोत्र प्रयोजयेत्।
इत्यर्बुदाधिकारः।

उत्सेधसाधर्म्यादनन्तरमर्बुदचिकित्सामाह।
रौद्ररसे मेघनादे मारिषः॥ ३५२॥
इत्यर्बुदः।

अथ श्लीपदरोगचिकित्सा।

हिङ्गुलसम्भवं सूतं गन्धकं मृतताम्रकम्।
वङ्गं तालञ्च तुत्थञ्च शङ्खं कांस्यं वराटकम्।
त्रिकटु त्रिफलालौहं विड़ङ्गं पटुपञ्चकम्॥
चविका पिप्पलीमूलं हवुषाच वचा तथा।
शटी पाठा देवदारु एलाच वृद्धदारकम्।
एतानि समभागानि वटिकां कुरु यत्नतः॥
हरीतकीरसं दत्वा पञ्चगुञ्जामितां शुभाम्।
एकैकां भक्षयेन्नित्यं शीतं वारिपिवेदनु॥
श्लीपदं कफवातोत्थं रक्तमांसगतञ्च यत्।
मेदो गतं धातुगतं हन्त्यवश्यं न संशयः॥
श्रीमद्गहननाथेन निर्मितो विश्वसम्पदे।
नित्यानन्दकरश्चायं यत्नतः श्लीपदे गदे॥

नित्यानन्दोरसः॥ ३५२॥

उत्सेधसाधर्म्यात् तथार्बुदेन सह कफसम्बन्धाव्यभिचारसाम्याद्वा-
नन्तरं श्लीपदचिकित्सामाह।—

नित्यानन्दरसे शङ्खं वराटञ्च दग्धव्यम्। हवुषेति स्वनामख्याता
शुष्काम्रमुकुलमितिटीका, तदभावे धान्यकम्। सूतादिवृद्धदारकान्तानि
चैकविंशतिद्रव्यानि समभागानि सञ्चूर्ण्य हरीतकीक्वाथेन संपिष्य
पञ्चगुञ्जाप्रमाणां गुड़िकां कुर्य्यादित्यर्थः॥ ३५२॥

इति श्लीपदाधिकारः।

कणा वचा दारु पुनर्नवानां
चूर्णं सविल्वं सम वृद्धदारकम्।
संमर्द्य चैतस्य निहन्ति वल्लः
सकाञ्जिकः श्लीपदमुग्रवेगम्॥

कणादिवटी॥

इति श्लीपदाधिकारः।

—

अथ भगन्दररोगचिकित्सा।

शुद्धसूतं द्विधागन्धं कुमारीरसमर्द्दितम्।
त्र्यहान्ते गोलकं कृत्वा ततस्तेन प्रलेपयेत्॥
द्वयो समं ताम्रपत्रं हण्डिकान्तर्निवेशयेत्।
तद्भाण्डं भस्मनापूर्य्य चुल्ल्यां तीव्राग्निना पचेत्॥
द्वियामान्ते समुद्धृत्य चूर्णयेत् स्वाङ्गशीतलम्।
जम्बीरस्य रसैः पिष्ट्वा रुद्ध्वा सप्तपुटे पचेत्॥
गुञ्जैकं मधुनाज्येन लेह्याद्धन्ति भगन्दरम्।
मूषली लवणञ्चानु आरनालयुतं पिवेत्॥
भुञ्जीत मधुराहारं दिवास्वप्नञ्च मैथुनम्।
वर्जयेच्छीतलाहारं रसेऽस्मिन् वारिताण्डवे॥

वारिताण्डवोरसः॥ ३५४॥

श्लीपदचिकित्सानन्तरं भगन्दरचिकित्सामाह।—

वारिताण्डवे रसस्य द्विगुणं गन्धं कुमार्य्यारसे त्रिदिनं विमर्द्य

सूतस्य द्विगुणेन शुद्धवलिना कन्यापयोभिस्त्र्यहम् ।
शुद्धं ताम्रमयः समस्त तुलितं पात्रं निधायोपरि ॥
स्वेद्यं यामयुगञ्च भस्मपिठरे निम्बुजलैः सप्तधा ।
पाकं तत्पुटयेद्भगन्दरहरो गुञ्जोन्मितः स्यादिति ॥

भगन्दरहरोरसः ॥ ३५५ ॥

इति भगन्दराधिकारः ।

अथोपदंशचिकित्सा ।

योगवाहिरसान् सर्वान् सर्वरोगोदितानपि ॥
उपदंशे प्रयुञ्जीत ध्वजमध्ये शिराव्यधः ॥ ३५६ ॥

इत्युपदंशाधिकारः ।

हरिद्रकामध्ये निक्षिप्य ताम्रकोठरिकया आच्छाद्य कोठरिकां चल-शरावेणाच्छाद्य च सन्धिं लिप्त्वा तद्भाण्डं भस्मनापूर्य्य कपर्द्यां पचेत् । तत उद्धृत्य चूर्णयेत् ततः जम्बीररसेन पिष्ट्वा सप्तवारं प्रपुटेत् ॥३५४ ।

भगन्दरहररसे वलिना गन्धकेन ॥ ३५५ ॥

इति भगन्दराधिकारः ।

स्यानप्रन्थासक्तेरुपदंशचिकित्सामाह योगराजेत्यादि । —योग-वाहिरसान् रामवाणवारिशोषणादीन् ॥ ३५६ ॥

इत्युपदंशाधिकारः ।

अथ कुष्ठरोगचिकित्सा।

कन्याकोटीप्रदानेन गङ्गायां पितृतर्पणे।
विश्वेश्वरपुरीवासे तत्फलं कुष्ठनाशने॥
गवां कोटी प्रदानेन चाश्वमेधशतेन च।
वृषोत्सर्गे च यत् पुण्यं तत् पुण्यं कुष्ठनाशने॥

रसोवलिस्ताम्रमयः पुरोग्नि-
शिलाजतुश्चाहिविषतिन्दुकोग्रे।
सर्वञ्च तुल्यं गगनं करञ्ज-
वीजं तथा भागचतुष्टयञ्च॥
संमर्द्य गाढ़ं मधुना घृतेन
वल्लद्वयञ्चास्य निहन्त्यवश्यम्।
कुष्ठं किलाशमपि वातरक्तं
जलोदरं वाथ विवद्धमूलम्॥
विशीर्णं कर्णाङ्गुलनासिकोपि
भवेत् प्रसादात् स्मरतुल्यमूर्त्तिः।

गलत्कुष्ठारिरसः॥ ३५७॥

गन्धकेन मृतं ताम्रं दशभागं समुद्धरेत्।
टङ्कणं पञ्चभागं स्यादमृतञ्च द्विभागिकम्॥
श्लक्ष्णचूर्णीकृतं सर्वं रक्तिकैकप्रमाणतः।

त्वग्गतरक्तदुष्टिसाधर्म्म्यादनन्तरं कुष्ठचिकित्सितमुच्यते।

गलत्कुष्ठारिरसे वलि गन्धकं अग्निश्चित्रकं गगनमभ्रं विषतिन्दुकं कुचिला इति ख्याता रसादिवचान्तानि समभागानि गगनं करञ्ज-वीजञ्च रसापेक्षया चतुर्गुणं मधुघृते वटीकरणयोग्यं देये॥ ३५७॥

दातव्यं कुष्ठिने सम्यगनुपानस्य योगतः॥
गलिते स्फुटितेचैव विसूच्यां मण्डले तथा।
विचर्चिका दद्रुपामा कुष्ठरोगप्रशान्तये॥

उदयभास्करः॥ ३५८॥

धात्रीटङ्कणतालानां दशभागं समुद्धरेत्।
धात्रीरसैर्मर्द्दयित्वा शिखरीमूलवारिणा॥
सर्वकुष्ठहरः सेव्यः सर्वदा भोजनप्रियः।

तालकेश्वरोरसः॥

भागैकं मूर्च्छितं सूतं गन्धकन्त्वग्निवागुजौ।
चूर्णन्तु ब्रह्मबीजानां प्रतिद्वादशभागिकम्॥
त्रिंशद्भागं गुडस्यापि चौद्रेण गुडिकाकृता।
अयं ब्रह्मरसोनाम्ना ब्रह्महत्यादिनाशनः॥
द्विनिष्कं भक्षणाद्धन्ति प्रसुप्तिं कुष्ठमण्डलम्।
पातालगरुड़ीमूलं जलैः पिष्ट्वा पिबेदनु॥

ब्रह्मरसः॥ ३५९॥

सूतव्योमाभ्रयस्तुल्यास्त्रिभागो गन्धकस्य च।
काठोडुम्बरिकाचीरैः सर्वमेकत्र मर्द्दयेत॥
माषमात्रं गुडीं कृत्वा कुष्ठरोगे प्रयोजयेत्।

उदयभास्करे केवलं गन्धकेन मृतं ताम्रं दशभांगं, अमृतं विषं तस्य द्विभागम्। सर्वं दिनैकं सम्मर्द्य रक्तिप्रमाणा वटिकाकर्य्या॥ ३५८॥
ब्रह्मरसे अग्नि चित्रकः। पातालगरुड़ी तिक्तालाबु॥ ३५९॥

देहशुद्धिं पुरा कृत्वा सर्वकुष्ठानि नाशयेत्॥
एष चन्द्राननोनाम साक्षात् श्रीभैरवोदितः।

चन्द्राननोरसः॥ २६०॥

गन्धं रसं टङ्कणताम्रलौहं भस्मीकृतं मागधिकासमेतम्।
पञ्चाङ्गनिम्बेन फलत्रिकेन विभागितं राजतरोस्तथैव॥
नियोजयेद्वल्लकयुग्ममानं कुष्ठेषु सर्वेषु च रोगसंघे।

कुष्ठकालानलोरसः॥ २६१॥

शुद्धसूताग्निमरिचं सूताद्द्विगुणगन्धकम्।
काठोडुम्बरिकाचीरैर्दिनं मर्द्यं प्रयत्नतः॥
वराव्योषकषायेण वटीञ्चास्य समाचरेत्।
लिह्याद्वज्रवटीह्येषा पामारोगविनाशिनी॥

वज्रवटी॥ २६२॥

पलत्रयं मृतं ताम्रं सूतमेकं द्विगन्धकम्।
त्रिकटु त्रिफलाचूर्णं प्रत्येकञ्च पलं पलम्॥
निर्गुण्ड्याश्चार्द्रकद्रावैर्वह्निद्रावैर्विमर्द्दयेत्।
दिनैकं तद्विशोष्याथ तुषाग्नौ स्वेदयेद्दिनम्॥
समुद्धृत्य विचूर्ण्याथ वागुजी तैलमर्द्दितम्।
त्रिदिनं भावयेत्तेन निष्कैकं भक्षयेत् सदा॥

चन्द्राननरसे व्योम मभ्रम्॥ २६०॥

कुष्ठकालनले वलि गन्धकं मागधिका पिप्पली पञ्चाङ्गनिम्बैरिति निम्बस्य पत्रपुष्पफलवल्कलमूलैः॥ २६१॥

वज्रवटिकायां अग्निश्चित्रकः वरा त्रिफला॥ २६२॥

चन्द्रकान्तिरसोनाम्ना कुष्ठं हन्ति न संशयः।
तैलं करञ्जबीजोत्थं वह्निगन्धकसैन्धवैः॥
अनुपानं प्रकर्त्तव्यं कल्कं वा बागुजीभवम्।

चन्द्रकान्तिरसः॥

मृतताम्राभ्रकं तुल्यं तयोः सूतश्चतुर्गुणम्।
शुद्धं तन्मर्द्दयेत् खल्ले गोलकं कारयेत्ततः॥
त्रिभिस्तुल्यं शुद्धगन्धं लौहपात्रे चणं प्रचेत्।
तन्मध्ये गोलकं पाच्यं यावज्जीर्णन्तु गन्धकम्॥
एतन्मृद्वग्निना तावत् समुद्धृत्य विचूर्णयेत्।
गुग्गुलुः निम्बपञ्चाङ्गं त्रिफला चामृता विषम्॥
पटोलं खादिरं सारं व्याधिघातं समं समम्।
चूर्णितं मधुना लेह्यं निष्कमौडुम्बरापहम्॥
रसः सङ्कोचनामायं कुष्ठे परमदुर्लभः॥

सङ्कोचरसः॥ २६२॥

हुताशमुखसंशुद्धं पलरेकं रसस्य वै।
पलं लौहस्य ताम्रस्य पलं भल्लातकस्य च॥
अभ्रकस्य पलञ्चैकं गन्धकस्य चतुःपलम्। *
हरीतकी विभीतक्योश्चूर्णं कर्षद्वयं द्वयोः †

सङ्कोचरसे व्याधिघातं समं सममिति गुग्गुल्वादीनां प्रत्येकमेव भागसमम्॥ २६२॥

---

* भल्लातकासहत्वे तु रक्तचन्दनं देयम्। सन्धकस्य चपलं अभ्रकस्य च गन्धकोविल्यनेन वश्यवदन्ति दृद्धाः।

† कर्षद्वयं द्वयोरिति प्रत्येकेन कर्षद्वयमिति।

अष्टमाषाधिकं तत्र धात्र्याः पाणितलानि षट्।
घृतञ्चाष्टगुणं लौहाद्द्वात्रिंशच्चित्रफलाजलम्॥
एकीकृत्य पचेत् पात्रे लौहे च विधिपूर्वकम्।
पाकमेवास्य जानीयात् प्राज्ञो लौहपाकवित्॥
भक्षयेत् प्रातरुत्थाय गुरुदेवद्विजार्चकः।
रक्तिकादिक्रमेणैव घृतभ्रामरमर्दितम्॥
लौहे च लौहदण्डेन कुर्य्यादेतद्रसायनम्।
अनुपानञ्च कुर्वीत नारिकेलजलं पयः॥
सर्वकुष्ठहरं श्रेष्ठं वलीपलितनाशनम्।
अग्निदीप्तिकरं हृद्यं कान्त्यायुर्बलवर्द्धनम्॥

सेव्यो रसो जाङ्गललावकानाम्
विवर्ज्य शाकाम्लमपि स्त्रीयञ्च।
शाल्योदनं षष्टिकमाज्यमुद्गं
चौद्रं गुड़ं चीरमिहक्रियायाम्॥

अमृताङ्कुरलौहम्॥ २६४॥

पलं तालं पलं गन्धं शिलायाश्च पलार्द्धकम्।

अमृताङ्कुरलौहे हुताशमुखसंशुद्ध पलमेकं रसस्यैव इति हुताशमुखेत्यादिविशेषणेन रससिन्दूरं गृह्णन्तीति केचित्। अपरे तु हिङ्गुलोद्भवं पारदं पातनायन्त्रयोगात् गृह्णन्ति। वृद्धास्तु प्रायः रससिन्दूरं व्यवहरन्ति। रसादिसर्वमेकीकृत्य लौहपात्रे त्रिफलाक्वाथेन पचनीयं पाकशेषे तु त्रिफलाचूर्णं प्रक्षिपेत्। अभ्रकस्य पलञ्चैव गन्धकस्य षडःपलमित्यत्र गन्धकस्य पलञ्चैक मभ्रकस्य च गुग्गुलोरिति केचित् पठन्ति सच न भट्टादिसम्मतः पाठः नापिवृद्धवैद्यव्यवहारसिद्धः॥२६४॥

चपलः शुद्धसीसञ्च ताम्रमभ्रमयो रजः॥
एतेषां कोलभागञ्च वटक्षीरेण मर्द्दयेत्।
ततो दिनत्रयं घर्म्मे निम्बक्वाथेन भावयेत्॥
गुडूचो वाल हिन्ताल वानरी नीलझिण्टिकाः।
शोभाञ्जनमुराजाजी निर्गुण्डीहयमारकम्॥
एषां शाणमितं चूर्णमेकोत्य सरित्तटे।
स्मपात्रे कठिने कृत्वा मृदम्बरयुते दृढ़े॥
एकाकी पाकविद्वैद्यो नग्नः शिथिलकुन्तलः।
पचेद्देवहितीरात्रौ यत्नात् संयतमानसः॥
तद्विजानीहि भैषज्यं सर्वकुष्ठविनाशनम्।
सर्पिषा मधुना लौहपात्रे तद्दण्डमर्द्दितम्॥
द्विगुञ्जं सर्वकुष्ठानां नाशनं वलवर्द्धनम्।
शीतलं सारसं तोयं दुग्धं वा पाकशीतलम्॥
आनीतं तत्क्षणादाजमनुपानं सुखावहम्।
वातरक्तं शीतपित्तं हिक्काञ्च दारुणां जयेत्॥
ज्वरान् सर्वान् वातरोगान् पाण्डुं कण्डूञ्च कामलाम्।
श्रीमद्गहननाथेन निर्म्मितो वहुयत्नतः॥

माणिक्योरसः॥ ३६५॥

भस्मसूतसमोगन्धोऽमृतायस्ताम्रगुग्गुलु।
त्रिफला च महानिम्बश्चित्रकश्च शिलजतु॥

माणिक्यरसे चपलः पारदः कोलभागानि कर्षभागानीत्यर्थः।
वानरी शूकशिम्बा अजाजी जीरकम्। हयमारः करवीरः॥ ३६५॥

इतीरतच्चूर्णितं कुर्य्यात् प्रतीकं भागषोड़शः ।
चतुःषष्टिं करञ्जस्य वीजचूर्णं प्रकल्पयेत् ॥
चतुःषष्टिं मृतञ्चाभ्रं मध्वाज्याभ्यां विलोड़येत् ।
स्निग्धभाण्डे स्थितं खादेद्विनिष्कं सर्वकुष्ठनुत् ॥
रसः कुष्ठकुठारोयं गलत्कुष्ठविनाशनः ।

कुष्ठकुठारोरसः ।

गुञ्जाशङ्खकरञ्जचूर्णरजनीभल्लातकाग्निशिखा ।
कन्यासूर्य्यपयः पुनर्नवरजोगन्धस्तथा सूतकम् ।
गोमूत्रे पचितं विड़ङ्गमरिचैः चौद्रञ्च तत्तुल्यकम् ।
हन्यादाशुविचर्चिकारुजमिदं कण्डूं तथाकैटिमम् ।

रसतालेश्वरः ॥ ७६६ ॥

नागस्य भस्म शाणैकं तोलकं गन्धकस्य च ।
द्विनिष्कं शुद्धतालस्य समुद्भूतं गवां जलैः ॥
विपचेत् षोड़शगुणैः पात्रे ताम्रमये शनैः ।
घर्म्मे दिवसं जम्बीरकुमारीवज्रकन्दजैः ॥
रसैर्भङ्गस्य चाम्भोभिर्युतं वल्लद्वयं भजेत् ।
कुष्ठे चास्थिगते चापि साखानासाविभुग्नके ॥
स्वरभङ्गे चतचीणे मण्डलेषु महत्स्वपि ।
औडुम्बरं हन्ति शिवामधुभ्यां कच्छञ्च कुष्ठं
त्रिफलाजलेन ।

तालकेश्वरे शङ्खः शङ्खभस्म । सूर्य्यपयः रक्तदुग्धं गोमूत्रे पाचित-मिति छान्दसत्वाद्रसः सर्वचूर्णापेक्षया षड्गुणेन गोमूत्रेण पाचित-मित्यर्थः ॥ ७६६ ॥

गुड़ार्द्रकाभ्यां गजचर्म्मसिध्मविचर्च्चिकास्फोट
विसर्पकण्डूम् ।
निहन्ति पाण्डुं विविधां विपादीं सरक्तपित्तं
कटुकासिताभ्याम् ॥
खादेद्विजीरमसृतायुतञ्च समुद्गयूषं
सघृतञ्च दद्यात् ।
रोहितकजटाक्काथमनुपानं प्रयच्छति ॥
चतुर्द्दशदिनस्यान्ते कुष्ठं शुष्यति यत्नतः ।
क्षुद्बोधो जायतेऽत्यर्थमत्यर्थं सुभगं वपुः ॥
वर्जयेत् सततं कुष्ठी मत्स्यमांसादि भोजनम् ।

राजतालेश्वरः ।

हरितालं भवेद्भागं द्वादशाच विशुद्धमत् ।
गन्धकोऽपि तथा ग्राह्यो रसः समोत्र दीयते ॥
कृष्णाभ्रकमपिस्तत्त्वं खल्ले कृत्वा विमर्द्दयेत् ।
अङ्कोठमूलनीरेण सेहुण्डीपयसाथवा ।
अर्कदुग्धेन संपिष्य करवीरजलेन च ।
काठोडुम्बरनीरेण पिबणीयो रसो भृशम् ॥
शुद्धताम्रकोठरे च चेपणीयो रसेश्वरः ।
पञ्चगुञ्जाप्रमाणेन काठोडुम्बरवारिणा ॥
कुष्ठाष्टादशसंखेषु देय एष भिषग्वरैः ।
अचिरेणैवकालेन विनाशं यान्ति निश्चयः ॥
पथ्यसेवा विधातव्या प्रणतिःसूर्य्यपादयोः ।
साधकेन तथा सेव्यो रसोरोगौघनाशनः ॥

पिप्पलीभिः समं दद्यात् कुष्ठरोगे रसेश्वरम्।

कुष्ठहरितालेश्वरः ॥ ३६७ ॥

त्रिफला खादिरं सारमसृता बाकुचीफलं।
आतपे मर्द्दयेत् सूतं गन्धकं मृतताम्रकम्।
स्नुहक्षमर्द्दितं तालं यावत्तत्र विलीयते ॥
भृङ्गराजद्रवं दत्वा दिनमात्रं विमर्द्दयेत्॥
प्रत्येकं सूततुल्यं स्याच्चूर्णीकृत्य विमर्द्दयेत्।
मध्वाज्याभ्यां लेहयेच्च कर्षाभ्यां भक्षयेत्ततः॥
दद्रुकिटिमकुष्ठानि मण्डलानि विनाशयेत्।
द्विगुणापि निहन्त्यशु राजराजेश्वरोरसः॥

राजराजेश्वरः।

मूर्च्छितं सूतकं धात्रीफलं निम्बस्य चाहरेत्॥
तुल्यांशं खदिरक्वाथैर्द्दिनं मद्यं च भक्षयेत्।
निष्कं कं दद्रुकुष्ठघ्नः पारिभद्राह्वयोरसः॥

पारिभद्ररसः॥ ३६८॥

गन्धकं मूलकक्षारमार्द्रकस्य रसैर्द्दिनम्।
मर्द्दितं हन्ति लेपेन सिध्मन्तु दिनमेकतः॥
कृष्णधुस्तूरजं मूलं गन्धतुल्यं विचूर्णयेत्।

कुष्ठहरितालेश्वरे स्नेहुण्डी स्नुही पूर्ववत् पच्यते इति ताम्रकोठरे कृत्वा पुटपाकविधिना षड्यामं पचनीयम्॥ ३६७॥

पारिभद्ररसे फलं निम्बस्येत्यन्वयः अपामार्गस्य पञ्चाङ्गमिति मूलपत्रपुष्पफलवल्कलरूपं पञ्चाङ्गम्॥ ३६८॥

मर्द्दं जम्बीरनीरेण लेपनं सिध्मनाशनम् ॥
अपामार्गस्य पञ्चाङ्गं कदलीद्रवसंयुतम् ।
पुटदग्धञ्च गोमूत्रैर्लेपनं दद्रुनाशनम् ।
चक्रामर्द्दस्य वीजञ्च दुग्धे पिष्ट्वा विमर्द्दयेत् ॥
वन्ध्यर्वतैलसंयुक्तं मर्द्दनात् सर्वकुष्टजित् ।

इति प्रलेपः ।

भस्मसूताभ्रशुल्वानि गन्धं तालं शिलाजतु ॥
अम्लवेतस्य तुल्यांशं वाह्यं दत्वा विमर्द्दयेत् ।
मध्वाज्याभ्यां वटीं कुर्य्याद्विगुञ्जां भक्षयेत् सदा ॥
कुष्ठं हन्ति गजं सिंहो रसो लङ्केश्वरो महान् ।
त्रिफलानिम्बमञ्जिष्ठा वचापाटलमूलकम् ॥
कटुकारजनीक्वाथं चानुपानं प्रयोजयेत् ।

लङ्केश्वरोरसः ॥ ३६८ ॥

शुद्धं पञ्चदशावतालकमितं शुद्धस्य षड् गन्धकः ।
सप्ताष्टौनवतिन्तिड़ीयकफलात् काठिल्लकानां दश ॥
सेहुण्डार्कपयोभिरेवसततं सञ्चूर्ण्य तद्भाव्यते ।
रोहितस्य जटारसेन म्रदितं श्लक्ष्णं ततः खल्लितम् ॥
एकीकृत्य समस्तमेतदपि तत्टङ्कैकमेतज्जयेत् ।
पश्चाद्दास विशुद्धवारिसहितं किञ्चिच्च तत् पीयते ॥
ताम्बूलं शशिखण्डमण्डितवटी मिष्टं ततः स्वापयेत् ।
शय्यायां मृगलोचनापरिभृतो कर्म्माणि सम्पादयेत् ।

लङ्केश्वररसे रोहितकजटा रसेनेति रोहितकमूलरसेनेत्यर्थः ॥३६८॥

देहं वीक्ष्यसुखं मुखं न विरसं विज्ञाय सम्यक् सुधीः ।
छागीदुग्धमिह तदेवमुदितं तक्रञ्च तत् पाययेत् ॥
नित्यं शान्तमिदं करोतिनियतं सर्वौषधैर्वर्जितम् ॥
सामग्राम समग्रमग्रिमतरं नीलञ्च पीतारुणम् ।
श्वेतं स्फीतमनल्पकं भ्रममतिप्रायः क्रिमिव्याकुलम् ॥
गन्धालिप्रमितं स्फटिकसदृशं कुष्ठञ्च चोत्साधनम् ।
अष्टाष्टादशभूतभैरव इति ख्यातः चितौ हन्ति च ॥
वातव्याधिनिकृन्तनः कफकृतान् कुष्ठान् विशेषानयम् ।
हन्तीति ज्वरमुग्ररूपमधिकं दाहाभिधानामयम् ॥
कुर्य्याद्रूपमनङ्गरङ्गगुणभृद्भृङ्गास्पदं विग्रहम् ।

एवं समासात् कुरुते समासात् ।
पथ्यञ्च तथ्यं सकलं करोति ॥
भुञ्जीतभुक्तं सततं प्रदिष्टं
घृतं घृतम्वा विकृतं तदेव ।
स्वच्छन्ददुग्धेन सुखेन जग्धं
पथ्यं तदेतत् प्रवदन्ति सन्तः ॥
कुष्ठस्य दुष्टस्य निराकरोति
गात्रञ्च कुर्य्याच्छुभगन्धयुक्तम् ।

भूतभैरवोरसः ॥

बलानीशस्य चत्वारि वलेर्द्दादशतावती ।
ताम्रस्य चक्रिका देया रसस्योर्द्धं शरावकम् ।
दत्वा विवद्धभाण्डस्य पुरयेद्भस्मना दृढ़म् ।
अग्निं प्रज्ज्वालयेद्यामद्वयं शीतं विचूर्णयेत् ॥
पुटे द्वादशधा सूर्य्यादुग्धे नालोड़ितं पुनः ।

वराापावकभृङ्गानां द्रवैस्त्रिभिर्विभावयेत् ॥
अयमर्केश्वरोनाम्ना रक्तमण्डलकुष्ठजित्।

अर्केश्वरः ॥ ३७० ॥

तालताप्यशिलासूतं शुद्धटङ्कणसैन्धवम्।
समं संचूर्णयेत् खल्वे सूताद्द्विगुणगन्धकम् ॥
गन्धाद्द्विगुणलौहञ्च जम्बीराम्लेन मर्द्दयेत्।
ततो लघुपुटे पाच्य स्वाङ्गशीतं समुद्धरेत् ॥
त्रिंशदंशं विषञ्चात्र क्षिप्ता सर्वं विचूर्णयेत्।
माहिषाज्येन संमिश्रं निष्कार्द्धं भक्षयेत् सदा ॥
मध्वाज्यैर्वागुजीचूर्णं कर्षमात्रं लिहेदनु।
सर्वान् कुष्ठान् निहन्त्याशु महातालेश्वरोरसः ॥

महातालेश्वरोरसः ॥ ३७१ ॥

सप्तकञ्चुकनिर्मुक्तमूर्द्धलग्नं रसेन्द्रकम्।
मृत्काटाहान्तरे तत्र स्थापयेच्च समन्तकम् ॥
सूताद्द्विगुणितं तालं कुष्माण्डद्रवशोधितम्।
दोलायन्त्रेण तैलादौ सप्तधा परिशोधितम् ॥
दत्वा प्रवेद्रवैर्भिंण्टरः किञ्चिदाम्लाव्ययुक्तितः।
तथाद्विगुणितं भस्म पलाशस्योपरिक्षिपेत् ॥

अर्केश्वरे—दैशस्य पारदस्य चत्वारि पलानि वलेर्गन्धकस्य द्वादश-पलानि ॥ ३७० ॥

महातालेश्वरे त्रिंशदंशं विषमिति सर्वचूर्णापेक्षया त्रिंशदंशविषम् ॥ ३७१ ॥

पुनर्भिण्टीद्रवेणैव सर्वमाप्लाव्य यत्नतः ।
खाखशाकरसैर्भूयः परिप्लाव्य च पाकवित् ॥
पचेदवहितोवैद्यः सालाङ्गारेण यत्नतः ।
चतुर्विंशतियामन्तु पश्चा शीतलतां नयेत् ॥
अवतार्य्यकाचपात्रे विधाय तदनन्तरम् ।
प्रयत्नेन कृतप्रायश्चित्तः शोधित देहकः ॥
सिता हरीतकीयुक्तं खादेद्रक्तिचतुष्टयम् ।
रक्तिकैकक्रमेणैव वर्द्धयेद्दिनसप्तकम् ॥
मधुदकं पिवेच्चानु नारिकेलजलञ्च वा ।
जिङ्गिनीसम्भवं क्वाथमथवा चौद्रनागरम् ॥
अभ्यङ्गं सुरभिस्तैलैः कुर्य्यात् ताम्बुलचर्वनम् ।
पवनानलसूर्य्यांशु मत्स्यमांसदधीनि च ॥
शाक ककारपूर्वञ्च वर्जयेन्मतिमान् नरः ।
वातरक्तमाममिश्रमामञ्चापि सुदारुणम् ॥
सवकुष्ठञ्चाम्लपित्तं विस्फोटञ्च मसूरिकाम् ।
विजयाख्योरसोनाम्ना हन्ति दोषानसृग्दरान् ॥
विजयभैरवः ॥

काठोडुम्बरिकाचूर्णं अम्लदन्तीवलात्रयम् ।
प्रत्यहं मधुना लीढ़ं वातरक्तं निहन्ति च ॥
खरद्रक्तञ्चरन्मांसं मासमात्रेण सर्वथा ।
गलत् पूयं पतत् कीटं त्रिटङ्कं सेव्यमीरितम् ।
कुष्ठारिरसः ॥ २७२ ॥

कुष्ठारिरसे वलात्रयमिति शीतपुष्पावला श्वेतवला नागवला भेदात् ॥ २७२ ॥

विशोष्य टङ्गणपारदञ्च सगन्धचूर्णञ्च समांसयुक्तम्।
जैपालचूर्णं द्विगुणं गुड़ान्वितं संमर्द्य सर्वं गुड़िकाविधेया॥
विरेचनी सर्वविकारनाशिनी लघ्वीहितादीपनीपाचनीयम्।
कुष्ठेहितातीव्रतरेहि शूले चामाशये चाश्मगने विकारे॥
संशोधनीशीतजलेन सम्यक् संग्राहिणी चोष्णजलेन युक्ता।

षड़ाननगुड़िका ॥ २७३ ॥

चिरिविल्वपत्र पाथ्या शिरीषञ्च विभीतकम्।
काठोडुम्बरिकामूलं मूत्तेरालोड्यफेणितम्॥
कर्षमात्रं पिवेद्रोगी गोस्तन्यासह टङ्गणम्।
सप्तसप्तकपर्य्यन्तं सर्वकुष्ठविनाशनम्॥

कुष्ठनाशनः।

अथ श्वित्रस्य वक्ष्यामि नाशनोपायमुत्तमम् ॥ २७४ ॥
शुद्धसूतस्य भागैकं द्विभागं शुद्धतालकम्।
मृत्कटाहान्तरे पूर्वं स्थापयेच्च समन्वकम्॥
द्वयोःसमं पलाशस्य भस्म तस्योपरिक्षिपेत्।
वक्त्रं मृत्कर्पये लिप्त्वा शोषयेच्च खरातपे॥
चतुर्विंशति यामन्तु पक्त्वा शीतलतां नयेत्।
अवताय्यं काचपात्रे स्थापयेद्दतियत्नतः॥
विधित् सेवितश्चाऽसौ हन्ति श्वित्रं चिरन्तनम्।

षड़ाननगुड़िकायां ऊषणं मरिचं द्विगुणं गुड़ान्वितामिति सर्वं चूर्णापेक्षया गुड़स्य द्वैगुण्यम् ॥ २७३ ॥

कुष्ठविशेषत्वात् कुष्ठाधिकार एव श्वित्रचिकित्सामाह श्वित्रेत्यादि ॥ २७४ ॥

सर्वकुष्ठं निहन्त्याशु भास्करस्तिमिरं यथा ॥
रसोयं श्वित्रनाशाय ब्रह्मणा निर्म्मितः पुरा।
विजयानन्दनामायं निगुढ़ः क्षितिमण्डले ॥

विजयानन्दः।

अश्वहाररजनीहेम प्रत्येकपुष्पी प्रदह्य च ॥
चूर्णञ्च स्वर्जिकाक्षारं नीरं दत्वा प्रपेषयेत्।
प्रघर्षयित्वा ततः स्थानं मण्डलाग्रेण लिम्पति ॥
पाटलानि पतन्त्यङ्गे विस्फोटाश्चातिदारुणाः।
सम्भवन्ति तिलारक्ताः कृष्णावर्णा भवन्ति ते ॥
मिलन्ति सर्व्वशरीरे च दिव्यरूपो भवेन्नरः।

श्वित्रदद्रुपाटलालेपः ॥ ३७५ ॥

सैन्धवं रविदुग्धेन पेषयित्वाथ मण्डलम्।
प्रघर्षयित्वा प्रलेपोयं श्वित्रकुष्ठविनाशनः ॥

श्वित्रहरोलेपः।

मुखे श्वेते च संजाते कुर्य्यादिमां प्रतिक्रियाम् ॥
गन्धकं चित्रकाशीशं हरितालं फलत्रयम्।
मुखे लिम्पेद्दिनैकेन वर्णनाशो भविष्यति ॥

कुष्ठश्वित्रनाशनोलेपः।

गुञ्जाफलाग्निचूर्णञ्च लेपनं श्वेतकुष्ठजित् ॥

श्वित्रदद्रुपाटलालेपे अश्वहा करवीरः हेम धुस्तूरः। एषां करवी-
रादीनां क्षारं ग्राह्यम् ॥ ३७५ ॥

घिताापामार्गभस्मापि लिप्ता श्वित्रं विनाशयेत्।

लेपः॥ ३७६॥

तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत्।
सप्तधा वा त्रिधा वापि दध्नाम्लेन च वा पुनः॥
शोधयित्वा पुनः शुष्कं चूर्णयेत्तण्डुलाकृति।
ततः शरावके पात्रे स्थापयेत् कुशलो भिषक्॥
बदरीपत्रकल्केन सन्धिलेपञ्च कारयेत्।
अरुणाभमधः पात्रं तावज्ज्वाला प्रदीयते॥
स्वाङ्गशीतं समुद्धृत्य माणिक्याभोभवेद्रसः
तद्रक्तिद्वितयं खादेद्घृतभ्रामरमर्द्दितम्॥
संपूज्य देवदेवेशं कुष्ठरोगाद्विमुच्यते।
स्फुटितं गलितं कुष्ठं वातरक्तं भगन्दरम्॥
नाड़ीव्रणं व्रणं दुष्टमुपदंशं विचर्च्चिकाम्।
नासास्यसम्भवान्रोगान् क्षतान् हन्ति सुदारुणान्।
पुण्डरिकं चर्म्मदलं विस्फोटं मण्डलं तथा।

रसमाणिक्यम्॥

इति कुष्ठाधिकारः।

——

कुष्ठेति चम्भिचित्रकः चित्रा मनःचित्रा॥ ३७६॥

इति कुष्ठाधिकारः।

अथ शीतपित्तोदर्दकोठाधिकारः।

यमानीगुड़संमिश्रो सूतभस्मद्विवल्लकः॥
शीतपित्तं निहन्त्याशु कटुतैलविलेपनम्।
सिद्धार्थरजनीकल्कं प्रपुन्नारतिलैः सह॥
कटुतैलेन संमिश्रमेतदुद्वर्त्तनं हितम्।
दूर्वानिशायुतोलेपः कण्डूपामाविनाशनः॥
क्रिमिदद्रुहरश्चैव शीतपित्तहरःपरः।
कुष्ठोक्ताञ्च क्रियां कुर्य्यात् सर्वां युक्त्या चिकित्सकः॥
शीतपित्ते तथोदर्दे कोठेचैव समासतः॥

इति शीतपित्तोदर्दकोठाधिकारः।

—=

अथाम्लपित्तचिकित्सा।

मृतसूताभ्रलोहानां तुल्यां पथ्यां विमर्दयेत्॥
माषमात्रं लिहेत् क्षौद्रैरम्लपित्तप्रशान्तये।

अम्लपित्तान्तकोरसः॥ ३७७॥

रसोवलिर्व्योम रविश्चलोहं
धात्रीचनीरैस्त्रिदिनं विमर्द्य।
तदल्पपुष्टं मृदुमार्कवेण
संमर्दयेदस्य च वल्लयुग्मम्॥

मायुक्तसङ्गत्वेव अम्लपित्तमुच्यते। अम्लपित्तान्तकरसे दद्यां
पथ्यामिति सर्वचूर्णतुल्यां हरीतकीम्॥ ३७७॥

हन्त्यम्लपित्तं मधुनावलीढ़म्
लीलाविनाशो रसराज एषः ।
छर्द्दिं सशूलं हृदयस्य दाहं
निवारयेदेष न संशयोऽस्ति ।

लीलाविलासोरसः । २७८ ॥

त्रिवृतामुस्तकञ्चैव त्रिफलातूषणन्तथा ।
प्रत्येकन्तु पलं भागन्तदर्द्धौ रसगन्धकौ ॥
लौहाभ्रकविड़ङ्गानां प्रत्येकञ्च पलद्वयम् ।
एतत् सकलमादाय चूर्णयित्वा विचक्षणः ॥
त्रिफलायाः कषायेण वटिकां कारयेद्भिषक् ।
एकैकां भक्षयेत् प्रातस्तक्रञ्चापि पिवेदनु ॥
हन्तिशूलं पार्श्वशूलं कुक्षिवस्तिगुदेरुजम् ।
श्वासं कासं तथा कुष्ठं ग्रहणीदोषनाशिनी ।

पानीयभक्तवटिका ।

आश्वभक्तोदकैः पिष्टमभ्रकं तत्र संस्थितम् ॥
कन्दमाणास्थिसंहार खण्डकर्णरसैरथ ।
तण्डुलीयञ्च शालिञ्च कालमारिषजेन च ।
व्रचीरवृहतीभृङ्गलक्ष्मणाकेशराजकैः ।
पेषणं भावनं कुर्य्यात् पुटश्चानेकशोभिषक् ॥
यावन्निश्चन्द्रकं तत्स्याच्छुद्धिरेवं विहायसः ।

लीलाविलासरसे धात्रयक्षीरैरिति आमलकीविभीतकयोः क्वाथैः । २७८ ॥

स्वर्णमाक्षिक सालिश्चध्मातं निर्वापितं जले ॥
त्रैफलेऽथविचूर्ण्यैवं लौहं कान्तादिकं पुनः।
वृहत्पत्र करीकर्ण त्रिफलावृद्धदारजैः ॥
माणकन्दास्थिसंहारशृङ्गवेरभवै रसैः।
दशमुलो मुण्डितिका तालमूलीसमुद्भवैः ॥
पुटितं साधु यत्नेन शुद्धिमेव मयोव्रजेत्।
वशिरं श्वेतवाट्टालं मधुपर्णी म... ...कम् ॥
तण्डुलीयञ्च वर्षाङ्गं दत्वाधश्चोर्द्धमेव च।
पाक्यं सुजीर्णमण्डूरं गोमूत्रेण दिनत्रयम् ॥
अन्त्वर्वाप्समदग्धञ्च तथा स्थाप्यं दिनत्रयम।
विचूर्णितं शुद्धिरियं लौहकिट्टस्य दर्शिता ॥
जतस्वा वर्द्धमानस्य आर्द्रकस्य रसेन तु।
वायस्याश्चानुपूर्वैवं मर्द्दनं रसशोधनम् ॥
गन्धकं नवनीताख्यं चुद्रितं लौहभाजने।
त्रिधा चण्डातपे शुष्कं भृङ्गराजरसाप्लुतम् ॥
ततो वह्नौ द्रवीभूतं त्वरितं वस्त्रगालितम्।
यत्नाद्भृङ्गरसे चिप्तं पुनः शुष्कं विशुध्यति ॥
गगनाद्विपलं चूर्णं लौहस्य पलमात्रकम्।
लौहकिट्टपलार्द्धञ्च सर्वमेकत्र संस्थितं ॥
मण्डूकपर्णीवशिरतालमूलीरसैः पूनः।
वरी भृङ्ग केशराज कालमारिषजैरथ ॥
त्रिफलाभद्रमूस्ताभिः स्थालीपाकाद्विचूर्णितम्।
रसगन्धकयोः कर्षं प्रत्येकं ग्राह्यमेकतः ॥
तन्मस्पपाशिलाखण्डे यत्नतः कज्जलीकृतम्।

वचाचव्य यमानी च जीरके शतपुष्पिका ॥
व्योषं मुस्तं विड़ङ्गञ्च ग्रन्थिकं खरमञ्जरी।
त्रिवृता चित्रकोदन्ती सूर्य्यावर्त्तः सितस्तथा।
भृङ्गमाणककन्दाश्च खण्डकर्णक एव च।
दण्डोत्पला केशराज कालावकरकोऽपि च।
एषामर्द्धपलं ग्राह्यं पटघृष्टं सूचूर्णितम्॥
प्रत्येकं त्रिफलायाश्च पलार्द्धं पलमेव च।
एतत्सर्वं समालोड्य लौहपात्रे तु भावयेत्॥
आतपे दण्डसंघृष्टमार्द्रकस्य रसैस्त्रिधा।
तद्रसेन शिलापिष्टं गुड़िकां कारयेद्भिषक्॥
बदरास्थिनिभां शुष्कां स्वच्छगुप्तां निधापयेत्।
तत् प्रातर्भोजनादौ तु सेवितं गुड़िकात्रयम्।
अम्बोदकानुपानञ्च हितं मधुरवर्जितम्॥
दुग्धञ्च नारिकेलञ्च वर्जनीयं विशेषतः।
भोज्यं यथेष्टमिष्टञ्च वारिभक्ताम्लकाञ्जिकम्॥
हन्त्यम्लपित्तं विविधं शूलञ्च परिणामजम्।
पाण्डुरोगञ्च गुल्मञ्च शोथोदर गुदामयान्॥
यक्ष्माणं पञ्चकासांश्च मन्दाग्नित्वमरोचकम्।
प्लीहाणं श्वासमानाहमामवातं सुदारुणम्॥
गुड़ीक्षुधावतीसेयं विख्यातारोगनाशिनी।

क्षुधावतीवटी॥ ३७८॥

क्षुधावतीगुड़िकायां अभ्रकं कृष्णाभ्रकं ग्राह्यं श्वेतवस्त्रे बद्ध संबद्ध्यं काञ्जिके अहोरात्रं स्थापयित्वा तेनैव मेघ्रणीयम्। ततः

त्रिकटु त्रिफला मुस्तं बीजञ्चैव विडङ्गकम्।
एलापत्रञ्च सर्वञ्च समभागं विचूर्णयेत्।
यावन्त्येतानि चूर्णानि लवङ्गं तत्समं भवेत्।

चन्द्रादिव्यक्तसमस्तानां स्वरसेन पुनः पेषणं भावनं पुटनञ्च बहुधा कुर्वीत यावन्निश्चन्द्रकत्वमभ्रस्य। खण्डकर्णः खाड़कोन इति ख्यातः। तण्डुलीयकालमारिषयोरिति स्वल्पपत्रवृहत्पत्रभेदेन द्विविधमारिषयोः। हस्तीरः श्वेतपुनर्नवा भृङ्गो भृङ्गराजः लक्ष्मणा स्वनामख्याता। विहाय स इत्यभ्रस्य। लौहशुद्धिमाह सर्षमात्त्विकशालिञ्चाभ्यां पिष्टाभ्यां कान्तलौहं लिप्त्वा भस्त्राग्नौ ध्मातं ततः वक्ष्यमाणाष्टतवारविधिना कथितत्रिफलाक्काथे निर्वापितमित्यर्थः। तदेव निरुत्थमारितं लौहचूर्णं प्रक्षाल्य भानुपाकादिना शोधितं हस्त्पत्रकरिकर्णपलाशादिस्वरसैः पुटितं कुर्य्यादित्यर्थः। अत्र पुटनद्रव्येषु मध्ये येषां स्वरसः प्राप्तिस्तेषां स्वरसो ग्राह्यः येषान्तु स्वरसो न लभ्यते तेषां क्काथो ग्राह्यः। मण्डूरशुद्धिमाह वशिरमित्यादि वशिरादीनां मूलत्वकपल्लवान् स्थालीमध्ये पातयित्वा तदुपरिपुराणमण्डूरं दत्त्वा तैरेव पल्लवादिभिराच्छाद्य गोमूत्रं दत्त्वा दिवसत्रयं व्याप्य दग्धं यथा स्यात् तथा पाको विधेयः। रसशुद्धिमाह जयन्त्या इत्यादि वर्द्धमान एरण्डः। गन्धकशुद्धिमाह गन्धकमित्यादि। क्षुद्रितमिति कुट्टितम्। तत्र गगनादिसर्वमेकीकृत्य मण्डूकपर्ण्यादिस्वरसेनैकस्थालीपाकः। ततःशतावर्य्यारसेन द्वितीयः स्थालीपाकः। ततस्त्रिफलादिक्काथेन तृतीयः स्थालीपाकः। भिषक्तु मण्डूकपर्ण्यादितालमूल्यन्तररसेन पुटनमाह तत्तु न सम्यक्व्यवहारसिद्धम्। एतदनन्तरं यद्विधेयं तदाह रसगन्धकयोः कर्षमित्यादि रसगन्धकयोः कर्षमितिच्छेदः तस्मान्मिलितरसगन्धकयोः कर्ष इत्यर्थः। वचाचव्यादीनि प्रक्षेपद्रव्याणि खरमञ्जरी-अपामार्गः। प्रत्येकं त्रिफलयाश्चेति प्रत्येकमर्द्धपलं तेनमिलित त्रिफलायाः सार्द्धं पलं भवतीत्यर्थः॥ ३७८॥

इत्यम्लपित्ताधिकारः।

सर्वंचूर्णं द्विगुणितं त्रिवृच्चूर्णञ्च दापयेत् ॥
सर्वमेकीकृतं यावत्तावच्छर्करयान्वितम् ।
सर्वमेकीकृतं पात्रे स्निग्धभाण्डे निधापयेत् ॥
भोजनादौ ततोऽन्ते च मध्वाज्याभ्यामिदं शुभम् ॥
शीततोयानुपानञ्च नारिकेलोदकं तथा ॥
ततो यथेष्टमाहारं कुर्य्यात् चीररसाशनः ।
अम्लपित्तं निहन्त्याशु विवद्धमलमूत्रकम् ॥
अग्निमान्द्यभवान्रोगान्नाशयेच्चाविकल्पतः ।
बलपुष्टिकरञ्चैव शूलदुर्नामनाशनम् ॥
प्रमेहान् विंशतिञ्चैव मूत्राघातान् तथाश्मरीम् ।
अविपत्तिकरं चूर्णमगस्त्यमुनिभाषितम् ॥

अविपत्तिकरं चूर्णम् ।

इत्यम्लपित्ताधिकारः ।

अथ विसर्पविस्फोटतन्तुकरोगचिकित्सा ।

सूताभ्रकान्तलोहानां भस्मगन्धकमाचिकम् ॥
वन्यकर्कोटकद्रावैस्तुल्यं मद्यं दिनावधि ।
वन्यकर्कोटिकाकन्दे चिप्त्वा लिप्त्वा मृदा वहिः ॥
भूधराख्ये पुटे पश्चाद्दिनैकं तद्विपाचयेत् ।
दशमांशं विषं योज्यं माषमात्रन्तु भक्षयेत् ॥
रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत् ।
पिप्पलीमधुसंयुक्तमनुपानं प्रकल्पयेत् ॥

कालाग्निरुद्रोरसः ।

पित्तनाशकभैषज्यं योगवाहिरसं सुधीः।
कुष्ठोद्दिष्टक्रियां सर्वामपि कुर्य्याद्भिषग्वरः।
गुडूची निम्बजक्काथैः खदिरेन्द्रयवाम्बुना॥
कर्पूरविसुगन्धिभ्यां युक्तं सूतं द्विवल्लकम्।
विस्फोटं त्वरितं हन्याद्वायुर्जलधरानिव॥ ३८०॥
गव्यं सर्पिस्त्र्यहं पीत्वा निर्गुण्डीस्वरसं त्र्यहम्।
विविधं स्नायुकमुग्रं हन्त्यवश्यं न संशयः॥
सप्तपर्णशिफाकल्कपानाद्वा लेपनात्तथा।
मूषलीमूलपानात्तु तन्तुकाख्यो विनश्यति॥ ३८१॥
इति विसर्पविस्फोटतन्तुकरोगचिकित्सा।

अथ मसूरिकाचिकित्सा।

अथ शुद्धस्य सूतस्य मूर्च्छितस्य मृतस्य च॥
त्रिवला पिप्पली धात्री रुद्राक्ष घृतमाक्षिकैः।

अम्लपित्तवत् विसर्पस्यापि पित्तसम्भवस्यावश्यम्भावात् तथा प्रायस्तु-ल्यचिकित्सितत्वात् तदनन्तरं विसर्पादिचिकित्सामाह सूताभ्रे-त्यादि।

गुडूचीत्यादौ सूतं भस्मसूतम्॥ ३८०॥

सप्तपर्णेति सप्तपर्णशिफा सप्तपर्णमूलम्॥ ३८१॥

विस्फोटप्रभेदत्वात्तथा प्रायस्तुल्यचिकित्सितत्वात्तदनन्तरं मसू-रिकाचिकित्सामाह।

पापरोगान्तकोयोगः पृथिव्यामिवदुर्लभः ॥

दुर्लभोरसः ॥ ३८२ ॥

इति मसूरिकाचिकित्सा ।

अथ क्षुद्ररोगचिकित्सा ।

क्षुद्ररोगेषु मतिमान् तत्तदौषधयोगतः ।
भस्मसूतं प्रयुञ्जीत तथात्र योगवाहिकम् ॥ ३८३ ॥

इति क्षुद्ररोगाधिकारः ।

अथ मुखरोगाधिकारः ।

मृतं सूतं मृतं स्वर्णं द्वाभ्यान्तुल्यां मनःशिलाम् ।
विमर्द्दयेच्च तैलेन चातसीसम्भवेन च ।
तद्गोलं वस्त्रतोवद्धा लेपयेच्च समन्ततः ॥
अतसीफलकल्केन दोलयन्त्रे त्र्यहं पचेत् ।
उद्धृत्य धारयेद्वक्त्रे जिह्वादन्तास्यरोगनुत् ।

चतुर्मुखोरसः ॥

दुर्लभरसे द्विवलेति श्वेतपीतपुष्पभेदात् वलाद्वयं ग्राह्यम् ३८२।
क्षुद्ररोगविशेषत्वात् मसूरिकानन्तरं क्षुद्ररोगचिकित्सामाह ।
क्षुद्ररोगेत्यादौ तत्तदौषध योगत इति तत्तद्रोगनाशकौषधयोगत इत्यर्थः ॥ ३८३ ॥

पार्वती काशीसम्भूती दरदो मधुपुष्पकम् ॥
गुडूची शाल्मली द्राक्षा धान्य भूनिम्ब मार्कवम् ।
तिलमुद्गपटोलञ्च कुष्माण्ड लवणद्वयम् ॥
यष्टिका धान्यकं भस्म चान्तर्दग्धं समं समम् ।
मुखरोगं निहन्त्याशु पार्वतीरस उत्तमः ॥
पित्तज्वरं चिरं हन्ति तिमिरञ्च तृषामपि ।
पार्वतीरसः ॥ ३८४ ॥

रसगन्धौ समौ ताभ्यां द्विगुणञ्च शिलाजतु ।
गोमूत्रेण विमर्द्दयाथ सप्तधार्द्रं द्रवेणच ॥
जातीनिम्ब महाराष्ट्रीरसैः सिध्यति पाकहा ।
कणा मधुयुतं हन्ति मुखरोगं सुदारुणम् ॥
गुञ्जाष्टकमिदं तालुगलोष्ठदन्तरोगनुत् ।
महाराष्ट्राश्वगन्धाभ्यां मुखञ्च प्रतिसारयेत् ॥
धारणाद् सेवनाच्चैव हन्ति सर्वान् मुखामयान् ।
मुखरोगहरी ।

सर्वास्यामयजिद्सेव्यो मधुना पर्पटीरसः ॥
पथ्या वालक कष्ठञ्च गोमूत्रेण प्रसाधयेत् ।
एषा च वटिका हन्ति मुखदौर्गन्ध्य सन्ततिम् ॥
पथ्यावटी ॥ ३८५ ॥

इति मुखरोगाधिकारः ।

रोगगणत्व सामान्यात् 'क्षुद्ररोगानन्तरं' मुखरोगचिकित्सितमुच्यते । पार्वतीरसे पार्वतीसम्भूतः गन्धकः । काशीसम्भूतः पारदः । दरदो हिङ्गुलः । मार्कवं भृङ्गराजम् ॥ ३८४ ॥

अथ कर्णरोगाधिकारः।

व्योषभिल्लातवीजञ्च शङ्खभस्म विषान्वितम्॥
मरिचसदृशं खादेत् कफकेतुमहारसम्।

कफकेतुरसः॥

सूतं गन्धं विषञ्चैव टङ्कणं सकपर्द्दकम्।
मरिचेन समायुक्तं आर्द्रतोयेन भावितम्॥
वह्निमान्द्यञ्चामरोगं श्लेष्माणं ग्रहणीगदम्।
सन्निपातं तथा शोथं हन्ति श्रोत्रोद्भवं गदम्॥

भैरवीरसः॥ ३८६॥

योगवाहिरसाः सर्वे प्रयोक्तव्या भिषग्वरैः।
कर्णरोगेषु सर्वेषु पीनसादिषु नित्यशः॥

इति कर्णरोगाधिकारः।

अथ नासारोगाधिकारः।

शुद्धसूतं समादाय गन्धभागद्वयं ततः॥
त्रिभागं टङ्कणञ्चापि विषं भागचतुष्टयम्।
पञ्चभागं तथा देयं मरिचस्य प्रयत्नतः॥

पथ्यावटिकायां सर्वचूर्णमिच्छया अष्टगुणेन गोमूत्रेण पाचितम्॥ ३८२॥

मुखरोगेषु जिह्वाश्रयरोगोभिहितः जिह्वाचेन्द्रियाधिष्ठानमत इन्द्रियाधिष्ठानदुष्टिसाम्यात्तदनन्तरं कर्णरोगचिकित्सितमुच्यते। भैरवे कपर्द्दकं वराटं आर्द्रतोयेनेति आर्द्रकरसेन॥ ३८६॥

शृङ्गवेररसैः पिष्टा गुड़िका पञ्चरत्तिका।
अनुपानं हितं योज्यं सर्वरोगप्रशान्तये॥
जलदोषोद्भवे रोगे भयतुरग्रे जलोदरे।
सन्निपातेषु रोगेषु नासाव्याधौसपीनसे॥
व्रणशोथे व्रणेचैव उपदंशे भगन्दरे।
नाड़ीव्रणे ज्वरेचैव नखदन्तविघातके॥
पञ्चामृतरसो योज्यः सर्वरोगप्रशान्तये।

पञ्चामृतोरसः॥ ३८७॥

इति नासारोगाधिकारः।

अथ नेत्ररोगचिकित्सा।

अभ्रं ताम्रं तथा लौहं माक्षिकञ्च रसाञ्जनम्॥
पातनायन्त्रसंशुद्धं गन्धकं नवनीतकम्।
पलप्रमाणं प्रत्येकं गृह्णीयाच्च विधानवित्॥
सर्वमेकीकृतं चूर्णं वैद्यैः कुशलकर्म्मभिः।
ततस्तु भावना कार्य्या त्रिफला भृङ्गराजकैः॥
ततः प्रक्षेपचूर्णञ्च पिप्पलीमूलयष्टिका।
एला पुनर्नवा दारु पाठा भृङ्ग शठी वचा॥

उक्तसङ्गतैव कर्णरोगचिकित्सानन्तरं नासारोगचिकित्सितमुच्यते। पञ्चामृतरसे गन्धभागद्वयमिति एकभागापेक्षया गन्धकस्य द्विगुणत्वं एवं त्रिभागमित्यादि॥ ३८७॥

नीलोत्पलं चन्दनञ्च श्लक्ष्णचूर्णञ्च दापयेत् ।
माषमेकं प्रदातव्यं घृतक्षौमधुसहितम् ॥
मर्द्दनं लौहदण्डेन पात्रे लौहमये दृढ़े ।
अनुपानं प्रयोक्तव्यमुष्णेन वारिणा तथा ॥
यावतो नेत्ररोगांश्च पानादेव विनाशयेत् ।
सरक्ते रक्तपित्ते च रक्ते चक्षुःस्रुतेपि च ॥
नक्तान्ध्ये तिमिरे काचे नीलिका पटलार्बुदे ।
अभिष्यन्देऽधिमन्थे च पिष्टेचैव चिरन्तने ॥
नेत्ररोगेषु सर्वेषु वातपित्तकफेषु च ।
सर्वनेत्रामयं हन्याद्वृत्रमिन्द्राशनिर्यथा ॥

नेत्राशनिरसः ॥ ३८८ ॥

त्रिकटु त्रिफला शृङ्गी शटी रास्ना महौषधम् ।
द्राक्षा नीलोत्पलञ्चैव काकोली मधुयष्टिकम् ॥
वाट्टालं केशराजञ्च कण्टकारीद्वयं पलम् ।
लौहाभ्रयोः पलं दत्वा भावयेत् वक्ष्यमाणजैः ॥
त्रिफलायाश्च तोयेन भृङ्गराजरसेन वा ।
भावयित्वा वटीकार्य्या वदराखिनिभा शुभा ॥
यावतो नेत्ररोगांश्च निहन्यान्नात्रसंशयः ।

नयनामृतलोहम् ॥ ३८९ ॥

उक्त सम्बन्धादेव नेत्ररोगचिकित्सामाह । नेत्राशनिरसे गन्धं नवनीताह्वयमिति नवनीताह्वयमिति गन्धकविशेषणं आमलसाही गन्धक इतिख्यातः । त्रिफलाभृङ्गराजकैरिति त्रिफलारसैः भृङ्गराजरसैश्च ॥ ३८८ ॥

अयःसयष्टि त्रिफला कणानां चूर्णानि तुल्यानि
पुरेण नित्यम्।
सर्पिर्मधुभ्यां सह भक्षितानि शुक्लानि काचानि
निहन्ति शीघ्रम्।
चतशुक्लहरोगुग्गुलुः॥ ३९०॥

त्रिफलापद्मयष्ट्याह्वयुक्तं सायं निसेवितम्।
लोहं तिमिरकं हन्ति शुधांशु स्तिमिरं यथा॥
तिमिरहरलोहम्॥ ३९१॥

इति नेत्ररोगचिकित्सा।

अथ शिरोरोगाधिकारः।

त्रैलोक्यविजयावीजं वीजमुन्मत्तकस्य च।
कण्टकारीवीजकञ्च इज्जलवीजमेव च।
वीजञ्च वृद्धदारस्य समौ गन्धकपारदौ।
आर्द्रकैर्वटिकाकार्य्या कलायपरिमाणतः॥
एषा तोयानुपानेन प्रातःखाद्या हिताग्निना।

नयनामृतलौहे शृङ्गी कर्कटशृङ्गी वाट्टालं श्वेतवाट्टालम्
कण्टकारीद्वयं कण्टकारी वृहती च॥ ३८६॥

चतशुक्लहरगुग्गुलौ पुरेणेति गुग्गुलुना सच सर्वचूर्णसमः ३९०
तिमिरहरलौहे सर्वचूर्णसमं लौहं प्रदेयम्॥ ३९१॥

चिरजं सर्व्वरोगञ्च सन्निपातं सुदारुणम् ॥
आमवातं शिरोरोगं मन्यास्तम्भं गलग्रहम्।
ग्रहणीं श्लीपदं हन्ति त्वन्त्रवृद्धिं भगन्दरम् ॥
कामलां शोथपाण्डुत्वं पीनसार्शोगुदामयान्।
वटिका चन्द्रिकानाम वासुदेवेन भाषिता ॥

रसचन्द्रिकावटी। ३८२।

पलं सूतं पलं गन्धं पलं लौहं पलं रवेः ॥
गुग्गुलोः पलचत्वारि तदर्द्धं त्रिफला रजः।
यष्टिमधु कणा शुण्ठी गोक्षुर क्रिमिनाशनम् ॥
तोलकं दशमूलञ्च प्रत्येकं परिकल्पयेत्।
क्वाथेन दशमूल्याश्च यथास्वं परिभावयेत् ॥
घृतयोगेन कर्त्तव्या माषैकप्रमितावटी।
छागीदुग्धेन वा सेव्या मधुनापयसाथ वा ॥
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्।
शिरोर्त्तिं नाशयत्याशु वज्रमुक्तमिवासुरम्।
शिरोवज्ररसोनाम चन्द्रनाथेन भाषितः।

शिरोवज्ररसः। ३८३ ॥

कर्णनासानेत्रानामधिष्ठानत्वेन शिरश्चक्षुरोगचिकित्सानन्त शिरोरोगचिकित्सितमुच्यते। रसचन्द्रिकायां त्रैलोक्यविजयाविज मिति इन्द्राशनवीजं उन्मत्तस्य च वीजमिति धूस्तूरंवीजम् ॥ ३८२ ॥
शिरोवज्ररसे रवि स्थाने तदर्द्ध त्रिफलारज इति गुग्गुलोरर्द्ध त्रिफलाचूर्णमित्यर्थः ॥ ३८३ ॥

मृतसूताभ्रकं तीक्ष्णं ताम्रं गन्धं समं समम्।
स्नुहीक्षीरैर्द्दिनं मर्द्यं भक्षयेन्माषमात्रकम् ॥
मधुना मर्द्दितं सेव्यं लौहपात्रे दिने दिने।
सप्ताहात् सूर्य्यवर्त्तादीन् शिरोरोगान् विनाशयेत्।

चन्द्रकान्तरसः ॥

लौहभस्मं विषं मुस्तं फलत्रय कटुत्रयम्।
धस्तूरं वृद्धदारञ्च वीजमिन्द्राशनस्य च ॥
गोक्षुरकद्वयञ्चैव पिप्पलीमूलमेव च।
एतत् सर्व्वं समं ग्राह्यं रसे धूस्तूरकस्य च।
भावयित्वा वटीकार्य्या द्विगुञ्जा फलमानतः।
महालक्ष्मी विलासोयं सन्निपात निवारकः।

महालक्ष्मीविलासः ॥ ३८४ ॥

इति शिरोरोगाधिकारः।

अथ प्रदरचिकित्सा ॥

लौहं ताम्रं हरीतालं वङ्गमभ्रं वराटिका ॥
त्रिकटु त्रिफला चित्रं विडङ्गं पटु पञ्चकम्।

महालक्ष्मीविलासे धूस्तूरं धूस्तूरवीजं एवं वृद्धदारकवीजं इन्द्राशनस्य च वीजं ग्राह्यम्। गोक्षुरद्वयमिति स्वल्पपत्र वृहतपत्र भेदात् गोक्षुरद्वयं ग्राह्यम् ॥ ३८४ ॥

चविका पिप्पली शङ्खं वचा ह्वुषं पाकलम् ॥
शठी पाठा देवदारु एला च वृद्धदारकम् ।
एतानि समभागानि संचूर्ण्य वटिकां कुरु ॥
शर्करा मधुसंयुक्तां घृतेन भक्षयेत् पुनः ।
रक्तं श्वेतं तथा पीतं नीलं प्रदरदुस्तरम् ॥
कुक्षिशूलं कटीशूलं योनिशूलञ्च सर्वगम् ।
मन्दाग्निमरुचिं पाण्डुं कृच्छ्रश्वासञ्च कासनुत् ॥
आयुःपुष्टिकरं बल्यं बलवर्णप्रसादनम् ।

प्रदरान्तकलौहम् ॥ २८५ ॥

शुद्धसूतं तथा गन्धं गन्धतुल्यञ्च रूप्यकम् ।
खर्परञ्च वराटञ्च शाणमात्रं पृथक् पृथक् ॥
तृतीयं तोलकञ्चैव लौहचूर्णं क्षिपेत् सुधीः ।
कन्यानीरेण दिनैकं मर्दयेच्च भिषग्वरः ॥
असाध्यं प्रदरं हन्ति भक्षणान्नात्र संशयः ।

प्रदरान्तकोरसः ॥

यष्टिमधुनिशाचूर्णतोलकेन समन्वितम् ।

स्त्रीपुंसां साधारणविकाराणां तथा पुंप्रतिनियतरोगप्रदर्शनादि चिकित्सोक्ता इदानीं स्त्रीनियतरोगाणां चिकित्सा वक्तव्या तत्र च योनिव्याप्तिविशेषेष्वार्तवप्रवृत्तिसम्भवात् प्रथमं दुष्टार्तवप्रवृत्तिस्वरूपस्य प्रदरस्य चिकित्सितमुच्यते । प्रदरान्तक लौहे वराटिका कपर्दः । षटूपञ्चकं पञ्चलवणं शङ्खं शङ्खनाभि पाकलं कुष्ठम् ॥ २८५ ॥

वङ्गभस्मार्कपत्रस्य रसेनाप्लाव्य पीयते ॥
प्रातः प्रातः प्रतिदिनं प्रदरं हन्ति दुस्तरम् ।
रसाञ्जनं शुभा शृङ्गी चित्रकं मधुयष्टिकम् ॥
धान्यं तालीशं गायत्री हिजीरं त्रिवृता वला ।
दन्तीभूम्यामलकी चापि पलाशं च पृथक् पृथक् ।
चतुःपलं माचिकस्यामलस्य च क्षिपेत्ततः ।
जातीकोषं लवङ्गञ्च कक्कोलं मृद्विकापि च ॥
चातुर्जातकखर्जूरं कर्षमेकं पृथक् पृथक् ।
प्रक्षिप्य मर्दयित्वा च स्निग्धभाण्डे निधापयेत् ॥
एष लेहवरः श्रेष्ठः सर्वरोगकुलान्तकः ।
यत्र यत्र प्रयोज्यः स्यात्तदामयविनाशनः ॥
अनुपानं प्रयोक्तव्यं देशकालानुसारतः ।
सर्वोपद्रवसंयुक्तं प्रदरं सर्वसम्भवम् ।
द्वन्द्वजं चिरजञ्चैव रक्तपित्तं विनाशयेत् ।
कासश्वासाम्लपित्तञ्च क्षयरोगमथापि वा ॥
सर्वरोगप्रशमनो वलवर्णाग्निवर्द्धनः ।
पुष्कराख्यो लेहवरः सर्वत्रैवोपयुज्यते ॥

पुष्करलेहः ॥ २८६ ॥

धात्री च पथ्या च रसाञ्जनञ्च
सर्वं विचूर्ण्य सजलं निपीतम् ।

पुष्करलेहे शुभा वंशलोचना गायत्री खदिरः । हिजीरमिवि-
जीरकं कृष्णजीरञ्च ॥ १८६ ॥

अनन्त रक्तास्रवमुग्रवेगं
निवारयेत् सेतुरिवाम्बुवेगम ॥
रक्तपित्तहरं सर्वं प्रदरे नूतने तथा ।
रक्तातिसारकथितं सर्वमेतत् प्रयोजयेत् ॥

इति प्रदरचिकित्सा ।

अथ योनिव्यापच्चिकित्सा

समस्तं वातजित् कर्म्म योनिव्यापत्सु शस्यते ।
चालनस्वेदलेपांश्च वरानीरेण कारयेतत् ॥
प्रचालयेद्भगं नित्यं पथ्यामलकवल्कलैः ।
वृद्धापि कामिनो कापि वालावत् कुरुते रतिम् ॥२८७॥

इति योनिव्यापत्चिकित्सा ।

अथ सूतिकारोगचिकित्सा ॥

रसगन्धककृष्णाभ्रं तदर्द्धं सुततास्रकम् ।
चूर्णितं मर्द्दयेत् यत्नाद्भिकपर्णीरसेन च ।
छायाशुष्का वटीकार्य्या द्विगुञ्जाफलमानतः ।
जीरकिकटुनायुक्ता सूतिकातङ्कनाशिनो ॥

अधिकाराद्युक्तेः प्रदुष्टात्तं व कार्य्यत्वाच्च तदनन्तरं योनिव्यापच्चिकित्सितमुच्यते । समस्तमित्यादि ॥ २८७ ॥

ज्वरं तृष्णां रुचिं श्वासं शोथं हन्ति न संशयः।

सूतिकारिरसः ॥ ३९८ ॥

रसगन्धकतुल्यञ्च ताम्रं जम्बीरमर्द्दितम्।
त्रिभावितं त्रिकटुना देयं गुञ्जाचतुष्टयम्॥
गर्भिण्याः शूलविष्टम्भज्वराजीर्णेषु योजयेत्।

सूतिकाविनोदरसः॥

तुल्यस्थाने स्वर्णं देयं चिन्तामणिरसे तथा।

गर्भचिन्तामणिरसः॥

शुण्ठ्याभागो भवेदेको द्वौ भागौ मरिचस्य च।
पिप्पल्याश्च त्रिभागं स्यादर्द्धभागञ्च व्योमकम्॥
जातीकोषस्य भागौ द्वौ द्वौभागौ तुत्थकस्य च।
सिन्धुवारजलेनैव मर्द्दयेदेकयामतः॥
मधुनासह भोक्तव्यः सूतिकातङ्कनाशनः।

बृहत्सूतिकाविनोदरसः॥

टङ्कणं मूर्च्छितं सूतं गन्धकं हेमतारकम्।
जातीफलं तथा कोषं लवङ्गैलाच धातकी॥
वत्सकेन्द्रयवं पाठा शृङ्गी विश्वायमोदिका।
गुड़ीप्रसरणी रसैश्चतुर्गुञ्जाप्रमाणतः॥

क्रमप्राप्तत्वात् तथावशिष्टस्त्रीरोगचिकित्साभिधानार्थं सूतिकारोगचिकित्सितमुच्यते। सूतिकारिरसे तदर्द्धं ताम्रभस्मकमिति एकभागापेक्षया ताम्रस्यार्द्धभागत्वं भेकपर्णी थानकुनी॥ ७९८ ॥

भययेत्तद्रसैः प्रातः सूतिकातङ्क शान्तये।
जीर्णज्वरं तथा शोथं ग्रहणी मोह कासनुत्॥

सूतिकारिरसः॥३८८॥

रसगन्धक लौहाभ्रं जातीकोषं सुवर्च्चलम्।
समांशं मर्द्दयेत् खल्ले छागीदुग्धेन पेषयेत्॥
गुञ्जाद्वयप्रमाणेन सूतिकातङ्कनाशनः।
ज्वरातीसाररोगघ्नः सूतिकातङ्कनाशनः।
सूतिकाघ्नो रसोनाम ब्रह्मणा परिकीर्त्तितः॥

सूतिकाघ्नोरसः।

रसाभ्रगन्धकव्योषं सुवर्णमाक्षिकं विषम्॥
सर्व्वमेकीकृतं चूर्णं खादेद्रक्तिचतुष्टयम।
सूतिकाग्रहणीरोगं वह्निमान्द्यञ्च नाशयेत्॥
अतिसारञ्च समयेदपि वैद्यविवर्जितम्।
कासश्वासातिसारघ्नो वाजीकरण उत्तमः॥

सूतिकान्तकोरसः।

जातीफलं टङ्गणञ्च व्योषं दैत्येन्द्ररक्तकम्॥
तच्चूर्णं समभागेन मर्द्दितं प्रहरद्वयम।
जम्बीररसयोगेन वटीं कुर्य्याद्विचक्षणः।
गुञ्जाद्वयप्रमाणान्तु खलु वैद्यः प्रयत्नतः॥

सूतिकारिरसे तारकं रौप्यं कोषं जातीकोषं वल्कलं

कुटजः॥ ७८८॥

आर्द्रकस्य रसेनैव भक्षयेदुष्णवारिणा ।
निहन्ति सर्वरोगञ्च भास्करस्तिमिरं यथा ।

गर्भचिन्तामणिरसः ॥

रसं तारं तथा लौहं प्रत्येकं कर्षमानतः ।
कर्षत्रयं तथा चाभ्रं कर्पूरं वङ्गताम्रकम् ॥
जातीफलं तथा कोषं गोक्षुरञ्च शतावरी ।
बलातिबलयोर्मूलं प्रत्येकं तोलकं शुभम् ॥
वारिणा वटिकाकार्य्या द्विगुञ्जाफलमानतः ।
सन्निपातं निहन्त्याशु स्त्रीणाञ्चैव विशेषतः ॥
गर्भिण्या ज्वरदाहञ्च प्रदरं सूतिकामयम् ।

गर्भचिन्तामणिरसः ॥ ४०० ॥

सूतं गन्धं तथा स्वर्णं लौहं रजतमाक्षिके ।
हरितालं वङ्गभस्माप्यभ्रकं समभागिकम् ॥
भावना खलु दातव्या रसैरेषां पृथक् पृथक् ।
ब्राह्मी वासा भृङ्गराज पर्पटी दशमूलकैः ॥
सप्तधा भावयेद्वैद्यो गुञ्जामानां वटीञ्चरेत् ।
गर्भचिन्तामणिरयं पूर्ववत् गुणकारकः ॥

बृहद्गर्भचिन्तामणिरसः ।

त्रिभागं त्रिकटु देयं चतुर्भागञ्च हिङ्गुलम् ॥
जातीकोषं लवङ्गञ्च प्रत्येकञ्च त्रिकार्षिकम् ।

गर्भचिन्तामणिरसे तारं रौप्यं कोषं जातीकोषं शतावरी शत-
मूली ॥ ४०० ॥

सुवर्णमाक्षिकस्यापि पलार्द्धं प्रक्षिपेद्बुधः॥
जलेन मर्द्दयित्वाथ चणमात्रा वटीकृता।
निहन्ति गर्भिणीरोगं भास्करस्तिमिरं यथा।

गर्भविनोदरसः।

लवङ्गं रसगन्धौ च यवक्षारं तथाभ्रकम्॥
लौहं ताम्रं सीसकञ्च पलमानं समाहरेत्।
जातीफलं केशराजं वरभृङ्गैलामुस्तकम्॥
धातकीन्द्रयवं पाठा शृङ्गी बिल्वञ्च वालकम्।
कर्षमानञ्च संचूर्ण्य सर्वमेकत्र कारयेत्॥
वदरास्थिप्रमाणेन वटिकां कारयेद्भिषक्।
गन्धालिकापत्ररसैरनुपानं प्रदापयेत्॥
सर्वातीसारशमनः सर्वशूलनिवारणः।
सूतिकाहरनामायं रसः परमदुर्लभः॥

सूतिकाहरोरसः॥ ४०१॥

अभ्रकं पुटितं ताम्रं लौहं गन्धकपारदम्।
कुनटी टङ्कणं क्षारं त्रिफला च पलं पलम्॥
गरलञ्च तथा माषचतुष्कञ्चैव चूर्णितम्।
तत्सर्वं भावयेदेषां रसैः प्रत्येकशः पलैः।
ग्रीष्मसुन्दरस्याटरूषकस्य क्रमेण तु॥
रसैस्ताम्बूलवल्याश्च दलोत्थैर्भावितं पृथक्।

सूतिकाहररसे वरा त्रिफला गन्धालिकापत्ररसैः प्रसारणी पत्ररसैः॥ ४०१॥

द्रवे किञ्चित् स्थिते चूर्णं मरिचस्य पलं क्षिपेत् ॥
सर्व्वातीसारशमनं सर्व्वशूलनिवारणम्।
सूतिकाशोथपाण्डुत्वं सर्व्वज्वरविनाशनम् ॥
नाशयेत् सूतिकातङ्कं वृत्रमिन्द्राशनिर्यथा।

महाभ्रवटी ॥ ४०२ ॥

मृतमभ्रञ्च लौहञ्च कुनटी ताम्रकन्तथा।
रसगन्धक टङ्कञ्च यवक्षारं फलत्रिकम् ॥
प्रत्येकं तोलकं ग्राह्य मूषणं पञ्चतोलकम्।
सर्व्वमेकीकृतं चूर्णं प्रत्येकेन विभावयेत् ॥
ग्रीष्मसुन्दरसिंहास्य नागवल्यारसेन च।
चतुर्गुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ॥
योजयेत् सर्व्वथा वैद्यः सूतिकारोगशान्तये।

महाभ्रवटी ॥

अभ्रं ताम्रं तथा लौहं राजपट्टं रसन्तथा।
गन्धटङ्क मरिचञ्च यवक्षारं समांशकम्।
तथाव तालकञ्चैव त्रिफलायाश्च तोलकम् ॥
तोलकञ्चामृतञ्चैव षड्गुञ्जा प्रमितावटी।
ग्रीष्मसुन्दरकस्यापि नागवल्लीरसेन च ॥
भावयेत् सप्तधा हन्ति ज्वरकासाङ्गसंग्रहम्।

महाभ्रवटिकायां कुनटी मनःशिला क्षारं यवक्षारं गरलं विष
ग्रीष्मसुन्दरं गीमा इति ख्याता लता अटरूषकस्य वासकस्य ॥ ४०२

सूतिकातङ्कशोथादिस्त्रीरोगञ्च विनाशयेत् ॥

रसशार्दूलः ॥ ४०३ ॥

अभ्रकं पुटितं ताम्रं स्वर्णं गन्धञ्च पारदम्।
शिला टङ्कं यवक्षारं त्रिफलायाः पलं पलम् ॥
गरलस्य तथा शाद्यमर्द्धं तोलकसम्मितम्।
त्वगेला पत्रकञ्चैव जातिकोष लवङ्गकम् ॥
मांसी तालीशपत्रञ्च माक्षिकञ्च रसाञ्जनम्।
एषां द्विकार्षिकं भागं देयञ्चापि विचक्षणैः ॥
द्रवे किञ्चित् स्थिते चूर्णं मरिचस्य पलं क्षिपेत्।
भावना च प्रदातव्या पूर्व्वोक्तेन रसेन च ॥
निहन्ति विविधान् रोगान् ज्वरान् दाहान् वमिं भ्रमिम्
तथातिसारकञ्चैव वह्निमान्द्यमरोचकम्।
विशेषाद्गर्भिणीरोगं नाशयेदचिरेण च ॥

महारसशार्दूलः ॥ ४०४ ॥

रसस्य द्विगुणं गन्धं शुद्धं संमर्द्दयेत् दिनम्।
प्रतिलौहं सूततुल्यमष्टलौहं मृतं क्षिपेत् ॥
ब्राह्मी जयन्ती निर्गुण्डी यष्टिमधु पुनर्नवा।
नलिका गिरिकर्ण्यङ्कोलशाधूत्तं दुरालभा ॥

रसशार्दूलरसे राजपट्टं कान्तपाषाणं गन्धं गन्धकं अमृतं विषम् ॥ ४०३ ॥

महारसशार्दूले शिला मनःशिला पत्रं तेजपत्रं माक्षिकं स्वर्णमाक्षिकम् ॥ ४०४ ॥

अष्टरूपं काकमाची द्रवैरेषां विमर्द्दयेत्।
गुञ्जात्रयं चतुर्थं वा सर्व्वरोगेषु योजयेत्॥
रोगोक्तमनुपानं वा कवोष्णं वा जलं पिवेत्।

अष्टधातुमाह॥

सुवर्णं रजतं ताम्रं कांस्यं पित्तलमेव च।
नागं वङ्गं तथा लौहं धातवोऽष्टौ प्रकीर्त्तिताः॥

बृहद्रसशार्द्दूलः॥ ४०५॥

इति सूतिकारोगचिकित्सा।

अथ बालरोगचिकित्सा।

पलं शुद्धस्य सूतस्य गन्धकस्य पलं तथा॥
सुवर्णमाचिकस्यापि भागार्द्धं संप्रकल्पयेत्।
ततः कज्जलिकां कृत्वा लौहपात्रमये दृढ़े॥
केशराजस्य भृङ्गस्य निर्गुण्ड्याः स्वरसेन च।
शुभे शिलामये पात्रे लौहदण्डेन मर्द्दयेत्॥
राजिकासदृशीञ्चैव वटिकां कारयेद्भिषक्।
एकैकां वटिकां खादेन्नागवल्लीदलद्रवैः॥

बृहद्रसशार्द्दूलरसे प्रतिलौहमिति वक्ष्यमाणाष्टलौहं गिरिकर्णी अपराजिता। कृष्णधूर्त्तः कृष्णधुस्तूरः द्रवैरेषां विमर्द्दयेदिति एषां प्रत्येकशः स्वरसैः सप्तवारं भावयेदित्यर्थः॥ ४०५॥

हन्ति त्रिदोषसम्भूतं ज्वरञ्चैव सुदारुणम् ।
चिरज्वरञ्च कासञ्च शूलं सर्व्वभवन्तथा ॥
शिशूनां रोगनाशाय शिवेन परिकीर्त्तितः ।

वालोरसः ॥ ४०६ ॥

पलं शुद्धस्य सूतस्य गन्धकस्य च तत्समम् ।
सुवर्णमाक्षिकस्यापि चार्द्धभागं नियोजयेत् ॥
ततः कज्जलिकां कृत्वा लौहपात्रमये दृढ़े ।
केशराजस्य भृङ्गस्य निर्गुण्ड्याः पर्णसम्भवम् ॥
स्वरसं काकमाच्याश्च श्रीषसुन्दरकस्य च ।
सूर्य्यावर्त्तकवर्षाभू भेकपर्णीरसैस्तथा ॥
श्वेतापराजितायाश्च रसं दद्याद्विचक्षणः ।
देयं रसार्द्धभागेन चूर्णं मरिचसम्भवम ॥
शुभे शिलामये पात्रे यामं दण्डेन मर्द्दयेत ।
शुष्कमातपसंयोगाद् गुड़िकां कारयेद्भिषक् ॥
प्रमाणं सर्षपाकारं बालानाञ्च प्रयोजयेत् ।
हन्ति त्रिदोषसम्भूतं ज्वरञ्चैव सुदारुणम् ॥
कासञ्च विविधञ्चैव सर्व्वरोगं निहन्ति च ।

वालोरसः ॥

इति बालरोगचिकित्सा ।

—

बालरोगाणां दुष्टस्तन्येन सम्भवात्तदनन्तरं बालरोगचिकित्सितमुच्यते । बालरसे भागार्द्धं संकल्पयेदित्यर्द्धपलभागम् ॥ ४०६ ॥

अथ विषाधिकारः ।

निशां सटङ्कञ्च सजातीकोषं
तुल्यं समांशं कुरु देवदाल्याः ।
रसेन पिष्ट्वा विषवज्रपातो
रसोभवेत् सर्व्वविषापहन्ता ॥
निष्कोऽस्य संजीवयति प्रयुक्तो
नृमूत्रयोगेन च कालदष्टम् ।
जटाविषेनाकुलितं तथोन्यै
र्व्विषैवरञ्चाशु तथातुरञ्च ॥

विषवज्रपातोरसः ॥ ४०७ ॥

सूतराजस्य तोलैकं गन्धकस्य तथैव च ।
अभ्रात् कर्षं ततोदेयं तोलैकं कान्तलौहकम् ।
परोक्तौषधेनैव भावयेच्च पृथक् पृथक् ।
विशाला वृहती ब्राह्मी सौगन्धिकसुदाड़िमैः ।
मर्कटत्राखात्मगुप्तायाः स्वरसेन पृथक् पृथक् ।
एकरत्तिकमानेन वटिकां कारयेद्भिषक् ॥
वटीमेकां भक्षयित्वा पिवेच्छीतजलन्ततः ।
भीमरुद्रोरसोनाम चासाध्यमपि साधयेत् ॥
कुक्कुरस्य शृगालस्य विषं हन्ति सुदुस्तरम् ।

भीमरुद्रोरसः ॥४०८ ॥

इति विषाधिकारः ।

इदानीं बाह्वरचितचिकित्सापारिशेष्यात् विषचिकित्सामाह ।
विषवज्रपातरसे देवादाल्याः इत्तिषोषकस्य ॥ ४०७ ॥

अथ रसायनाधिकारो वाजीकरणाधिकारश्च।

सुस्थस्योजस्करं किञ्चित् किञ्चिदार्त्तस्य रोगनुत्॥
यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्।
रसगन्धकयोर्ग्राह्यं कर्षमेकं सुशोधितम्॥
अभ्रं निश्चन्द्रकं दद्यात् पलार्द्धं सुविचक्षणः।
कर्पूरं शाणकं दद्याद्वङ्गञ्च कोलसम्मितम्॥
ताम्रं कोलार्द्धकं तत्र निःशेषमारितं क्षिपेत्।
लौहं कर्षं सुजीर्णञ्च वृद्धदारकबीजकम्॥
विदारी शतमूली च क्षुरबीजं बला तथा।
मर्कटप्रतिबलाचैव जातीकोषफले तथा॥
लवङ्गं विजयाबीजं श्वेतसर्जं यमानिका।
एतेषां चूर्णमादाय प्रक्षिपेत् शाणसम्मितम्॥
गुञ्जाद्वयञ्च भुक्ताव्यं कोष्णं क्षीरं पिबेदनु।
गृहे यस्य शतं स्त्रीणां विद्यन्तेतिव्यवायिनः॥
नतस्य लिङ्गशैथिल्यमौषधस्यास्यसेवनात्।
नच शुक्रं क्षयं जाति न बलं ह्रासतां व्रजेत्।
कामरूपि भवेद्दिव्यो वृद्धः षोड़शवर्षवत्॥
रसायनवरो वल्यो वाजीकरण उत्तमः।
रसः श्रीमन्मथोनाम महेशेन प्रकाशितः॥ *

श्रीमन्मथोरसः॥४०८॥

भीमरुद्ररसे—सूतराजस्य पारदस्य मर्कटी शूकशिम्बा॥४०८॥

---

* नरोगो वर्त्तते तत्र प्रयोगस्यास्यसेवनात्। अस्य भक्षणमात्रेण कोष्ठं जीर्य्यति तत्क्षणात्। निहन्ति सन्निपातोत्थान् गदान् घोरान्

रसभस्मीकृतं कोलं गन्धकं शोधितं समम्।
लौहं कर्षद्वयं ताम्रमर्द्धं कोलकसम्मितम्॥
सुवर्णं जारितं दद्याच्छाणार्द्धं सुविचक्षणः।
अभ्रं कर्षद्वयं दद्याच्छाणार्द्धं चन्द्रचूर्णकम्॥
श्यामावीजं वरीच्चैव वलामतिवलातथा।
एलाञ्च शङ्खपुष्पञ्च शाणमानं विनिःक्षिपेत्॥
जलेन वटिकां कृत्वा शुञ्जामात्रां प्रदापयेत्।
सेवनादस्य कन्दर्परूपो भवति मानवः॥
सहस्रं याति नारीणामुत्साहोजायतेऽधिकः।
नित्यं स्त्रीसेवनाद्यस्तु क्षीणशुक्रो भवेन्नरः॥
महाशुक्रोभवेत् सोऽपि सेवनादस्य नान्यथा।
महावलो महावुद्धिर्जायते नात्रसंशयः॥
स्थूलानां कर्षकः श्रेष्ठः कृशानां पुष्टिकारकः।
रसो विनाशयेद्रोगान् सप्तसप्ताहभक्षनात्॥

महेश्वररसः॥ ४१०॥

भेषजं तावद्विविधं आतुरहितं सुस्थहितञ्च सुस्थहितमपि द्विविधं रसायनवाजीकरणभेदात्। अत्र आतुरहितं तावदुक्तमेव संप्रति सुस्थहितं वाच्यं श्रीमन्मथरसे क्षुरवीजमिति कोकिलाक्षवीजं मर्कटी शूकशिम्बी जातीकोषफलेति जातीकोषं जातीफलञ्च। विजया-वीजं शक्राशनबीजम्। श्वेतसर्जः श्वेतधूनकः॥ ४०९॥

महेश्वररसे रसभस्म रससिन्दूरं चन्द्रचूर्णकं कर्पूरम्। श्यामावीजं वृद्धदारकवीजं वरी शतमूली॥ ४१०॥

गुदारुणान् वातोत्थान् कफपित्तोत्थान् अतिसारान गुदारुणान् पाण्डुशोकक्षयश्वासाग्निः क्षयदौर्वल्यमेवच। नाशयेत् ध्वजभङ्गादीन् रोगानपि न संशयः इत्यतिरिक्तपाठः।

सूताभ्रलौहं सशिलाजतु स्याद्विड़ङ्गताप्यम् मधुना घृतेन।
संमर्द्य सर्व्वं खलु पूर्णचन्द्रोमाषोस्य वृष्योभवति प्रयुक्तः॥

पूर्णचन्द्रोरसः॥ ४११॥ *

श्वेतापुनर्नवादन्ती वाजीगन्धा त्रिकत्रयैः:।
शतमूलीबलायुक्तैरेभिर्लौहं प्रसाधितम्॥
छिनत्ति नियतं कार्श्यमपिभृङ्गरसैः सह।
नास्त्यनेन समं लौहं सर्व्वरोगान्तकं मतम्॥
दीपनं बलवर्णाग्नेर्वृष्यञ्चोत्तमोत्तमम्।

कार्श्यहरलौहम्॥ ४१२॥

पलं कृष्णाभ्रचूर्णस्य तदर्द्धौ रसगन्धकौ।
कर्पूरस्य तदर्द्धञ्च जातीकोषफले तथा॥
वृद्धदारकबीजञ्च बीजमुन्मत्तकस्य च।
त्रैलोक्यविजयाबीजं विदारीमूलमेव च॥
नारायणी तथा नागबला चातिबला तथा।
बीजं गोक्षुरकस्यापिनैचुलं बीजमेव च॥

पूर्णचन्द्ररसे ताप्यं स्वर्णमाचिकम्॥ ४११॥
कार्श्यहरलौहे वाजिगन्धा अश्वगन्धा अत्र सर्वसमं लौहं देयम्॥ ४१२॥

---

* मृतसूताभ्रलौहानां शिलाजतु विड़ङ्गकं ताप्यं गन्धं समं सर्पिः चौद्रैः सर्वं विमर्द्दयेत् पूर्णचन्द्ररसोनाम माषैकं भक्षयेत् सदा। शाल्मली पुष्पचूर्णानां चौद्रैः क्वाथं पिबेदनु दुर्बलाः पुष्टिमायान्ति कालकेन यथा शशी इति व्यवहारसिद्धोऽयं पूर्णचन्द्रः।

एतेषां कार्षिकं चूर्णं पर्णपत्ररसेन च।
निष्पिष्य वटिकाकार्य्या त्रिगुञ्जाफलमानतः॥
निहन्ति सन्निपातोत्थान् गदान् घोरान् सुदारुणान्॥
वातोत्थानपि पित्तोत्थान् नास्यत्र नियमः क्वचित्।
कुष्ठमष्टादशाख्यञ्च प्रमेहान् विंशतिन्तथा॥
नाड़ीव्रणं व्रणं घोरं गुदामयभगन्दरम्।
श्लीपदं कफवातोत्थं चिरजं कुलसम्भवम॥
गलशोथमन्त्रवृद्धिमतीसारं सुदारुणम्।
कासपीनसयक्ष्मार्शः स्थौल्यं दौर्गन्ध्यमेव च॥
आमवातं सर्वरूपं जिह्वास्तम्भं गलग्रहम्।
अर्द्दितं गलगण्डञ्च वातशोणितमेव च॥
उदरं कर्णनाशाक्षिमुखवैरस्यमेव च।
सर्वशूलं शिरःशूलं स्त्रीणां गदनिसूदनम्॥
वटिकां प्रातरेकैकां खादेन्नित्यं यथाबलम्।
अनुपानमिहप्रोक्तं मांसंपिष्टं पयोदधि॥
वारिभक्तसुरासीधु सेवनात् कामरूपधृक्।
वृद्धोपि तरुणस्पर्द्धी नच शुक्रस्य संचयः॥
नच लिङ्गस्य शैथिल्यं न केशा यान्ति पक्वताम्।
नित्यं स्त्रीणां शतं गच्छेन्मत्तवारणविक्रमः॥
द्विलक्षयोजनी दृष्टिर्जायते पौष्टिकः परः।
प्रोक्तः प्रयोगराजोयं नारदेन महात्मना॥
रसोलक्ष्मीविलासोयं वासुदेव जगत्पतिः।
अभ्यासादस्य भगवान् ललनासु वल्लभः॥

लक्ष्मीविलासोरसः। ४१३।

कामदेवमथोमूतं कामिनां कामदं सदा।
यस्य प्रसादतो वृद्धो रम्यश्च रमते स्त्रियम्॥
पारदं पलमेकं स्याद्द्विपलं शुद्धगन्धकम्।
रक्तकार्पासतोयेन घृष्टाकाचस्य कुप्यतः॥
निःक्षिप्य टङ्कणेनैव मुखं तस्य निरोधयेत्।
वालुकायन्त्रमध्यस्थं कुप्यञ्च कुरुते दृढम्॥
अहोरात्रं पचेदग्नौ शास्त्रवित् कुशलो भिषक्।
शीतेचादाय पात्रस्थं कूपिकान्तरलम्बितम्॥
दरदेन समं रक्तं सोज्ज्वलं भस्म यद्भवेत्।
भक्षयेत् माषमेकञ्च घृतेन मधुनासह॥
पश्चाद्दुग्धं गुडञ्चाज्यं क्षणेक्षुमपि शर्कराम्।
द्राक्षाखर्जूरमधुकप्रभृतीनथभक्षयेत्॥ *
त्रिफला मधुना शान्तिं याति पित्तं चिरोद्भूतम्।
निर्गुण्डिकारसेनाच दुर्वार वातवेदनाम्॥
प्रशमं यातिवेगेण नूतनञ्च वपुर्भवेत्।
अर्द्धावर्त्तितदुग्धेन स्थाप्यते यद्ययं रसः॥

लक्ष्मीविलासे तदर्द्धं रसगन्धकमिति वचनात् अर्द्धं मिलितरसगन्धक-मित्यर्थः। कर्पूरञ्च तदर्द्धमिति मिलितरसगन्धकार्द्धं तेन रसगन्धक-कर्पूराणि तुल्यभागानि। उन्मत्तस्य बीजं धूस्तूरबीजम्। नारायणी शतमूली॥ ४१२॥

---

* गव्यास्यापि च बाहुल्यं कर्त्तव्यं शुक्रवृद्धये। मनोभि रामा-रामन्ते रमन्तेक्षीणशक्तयः। विदलान्नं भवेत् वर्ज्यं रसवृष्यश्च भक्षयेत्।

वन्ध्यापि च भवत्येव जीववत्सा सपुत्रिका। *

श्रीकामदेवरसः ॥ ४१४ ॥

शुद्धसूतं समं गन्धं त्र्यहं कह्लारजैर्द्रवैः।
मर्दितं बालुकायन्त्रे यामं संपुटके पचेत्॥
रक्तागस्त्यद्रवैर्भाव्यं दिनमेकं सिताम्बुजैः।
यथेष्टं भक्षयेच्चानु कामयेत् कामिनीशतम्॥

अनङ्गसुन्दरीरसः।

मृतसूतस्य पादांशं हेमभस्मप्रकल्पयेत्॥ †
क्षीराज्यदधिसंमिश्रं माषैकं कांस्यपात्रके।
लेहयेन्माषषट्कन्तु जरामरणनाशनम्॥
वागुजीचूर्णकर्षैकं धात्रीफलरसाप्लुतम्।
अनुपानं पिबेन्नित्यं स्याद्रसो हेमसुन्दरः॥

हेमसुन्दरीरसः।

सूतभस्म चतुर्भागं लौहभस्म तथाष्टकम्॥
अभ्रभस्म च षड्भागं गन्धकस्य च पञ्चमम्।

श्रीकामदेवरसः रससिन्दूरवत् बालुकातन्त्रे काचकुपिकायां पचनीयः॥ ११४॥

---

* कामः किं किं न कुर्वीत चन्द्रपीतेषचन्द्रमाः प्रहृष्टोवापि लोकस्य नयनानन्दवर्द्धनः।

* मृतसूतस्य पादार्द्धमिति केचित् पठन्ति।

भावयेत्त्रिफलाक्काथैस्ततसर्व्वं भृङ्गजैर्द्रवैः ॥
शिग्रुवह्नि कटुक्काथैर्भावयेत् सप्तधा पृथक् ।
सर्व्वंतुल्या कणा योज्या गुडैर्म्मिश्रं पुरातनैः ॥
निष्कमात्रं सदा खादेज्जरामृतुग्रनिवारणम् ।
ब्रह्मायुः स्याच्चतुर्मासे रसोयममृतार्णवः ॥
कौरण्टकस्य पत्राणि गुडेन भक्षयेदनु ।

अमृतार्णवोरसः ॥ ४१५ ॥

द्विकर्षं शुद्धसूतस्य गन्धकञ्च द्विकार्षिकम् ।
लौहभस्मपलञ्चाभ्रं जारितञ्च पलांशिकम् ॥
द्वितोलं रजतञ्चैव वङ्गभस्म द्विकार्षिकम् ।
सुवर्णं तोलकञ्चैव ताम्रं कांस्यञ्च तत्समम् ॥
जातीफलञ्चेन्द्रपुष्पमेलाभृङ्गञ्च जीरकम् ।
कर्पूरं वनितामुस्तं कर्षं कर्षं पृथक् पृथक् ॥
सर्वं खल्लतले क्षिप्त्वा कन्यारसविमर्द्दितम् ।
भावयित्वा वरातोयैः केवुकानां रसेन च ॥
एरण्डपत्रैरावेष्ट्य धान्ये रात्रि दिनोषितम् ।
उद्धृत्य मर्द्दयित्वा तु वटिकां चणसम्मिताम् ॥
खादेच्च पर्णखण्डेन संयुक्तां व्याधिनाशिनीम् ।
सर्वव्याधिविनाशाय काशीनाथेन भाषितः ॥
पूर्णचन्द्ररसोनाम सर्वरोगेषु योजयेत् ।
वल्यो रसायनो वृष्यो वाजीकरण उत्तमः ॥

अमृतार्णवे सूतभस्म इति रससिन्दूरम् ॥ ४१५ ॥

अयमष्ठिलिकां हन्ति कासश्वासमरोचकम्।
आमशूलं कटीशूलं हृच्छूलं पित्तशूलकम्॥
अग्निमान्द्यमजीर्णञ्च ग्रहणीं चिरजामपि।
आमवाताम्लपित्तं भगन्दरमपि द्रुतम्॥
कामलां पाण्डुरोगञ्च प्रमेहं वातशोणितम्।
नातःपरतरः श्रेष्ठो विद्यते वाजिकर्म्मणि॥
रसस्यास्य प्रसादेन नरो भवति निर्गदः।
मेधाञ्च लभते वाग्मी सर्व्वशास्त्रसमन्वितः॥
मदस्य समां कान्तिं मदनस्य समं वलम्।
गीयते मदनेनैव मदनस्यसमं वपुः॥
स्त्रीणान्तथानपत्यानां दुर्व्वलानाञ्च देहिनाम्।
क्षीणानामल्पशुक्राणां वृद्धानां वातरेतसाम्॥
ओजस्तेजस्करश्चायं स्त्रीषुकामविवर्द्धनः।
अभ्यासेन निहन्ति मृतुरपलितं सर्व्वामयध्वंसिनी॥
वृद्धानां मदनोदयोदयकरः प्रौढ़ाङ्गना सङ्गमे।
नित्यानन्दकरः सुखातिसुखदोभूपैः सदा सेव्यते॥
दृष्टः सिद्धफलो रसायनवरः श्रीपूर्णचन्द्रोरसः।

बृहत्पूर्णचन्द्ररसः॥ ४१६॥

पलं मृदुस्वर्णदलं रसेन्द्रात्
पलाष्टकं षोड़शगन्धकस्य।

बृहत्पूर्णचन्द्ररसे इन्द्रपुष्पं लवङ्गं वनिता प्रियङ्गुः। वरातोयै-
रिति त्रिफलाक्वाथैः॥ ४१६॥

शीनैः सुकार्पासभवप्रसूनैः
सर्वं विमर्द्दयाथ कुमारिकाद्भिः ॥
तत्काचकुम्भे निहितं प्रगाढ़
मृत्कर्पटैस्तद्दिवसत्रयञ्च ।
पचेत् क्रमाग्नौ सिकताख्ययन्त्रे
ततोरजः पल्लवरागरम्यम् ॥
संगृह्य चैतस्य पलद्वयं सम्यक् *
पलञ्च कर्पूररजस्तथैव ।
जातीफलं मोषणमिन्द्रपुष्पं
कस्तूरिकाया इह शाणकः ॥
चन्द्रोदयोयं कथितोस्य वल्लो
भुक्तोहि वल्लीदल मध्यवर्त्ती ।
मदोन्मदानां प्रमदाशतानां
गर्वाधिकत्वं श्लथयत्यकुण्ठात् ॥
घृतं घनीभूतमतीवदुग्धं
मृदुनिमांसानि च मूस्तकानि ।
माषानि पिष्टानि भवन्ति पथ्या
न्यानन्ददायोन्यपरानिचात्र ॥
रतिकाले रतान्तेवा सेवितोयं रसेश्वरः
मानहानिं करोत्यत्र प्रमदानां सुनिश्चितः ॥
कृत्रिमं स्थावरञ्चैव जङ्गमञ्चैव यद्विषम् ।

---

* संगृह्य चैतस्य पलानि सम्यक् इति क्वचित् पलं कर्पूरमिलित चत्वारि इति पाठः ।

नविकाराय भवति साधकेन्द्रस्य वत्सरात् ॥
यथाऽमृतुञ्जयोभ्यासान्मृत्युं जयति देहिनाम्।
तथायं साधकेन्द्रस्य जरामरणनाशनः ॥
इन्द्रपुष्पं लवङ्गं स्यात् कार्पास कुसुमद्रवैः।
तन्त्रान्तरे प्रसिद्धोयं मकरध्वजनामतः ॥

चन्द्रोदयरसः ॥ ४१७ ॥

स्वर्णस्य भागो वङ्गञ्च मौक्तिकं कान्तलोहकम्।
जातीकोषफलेरूप्यं कांस्यकं रससिन्दूरम् ॥
प्रवालं कस्तूरी चन्द्रमभ्रकञ्चैक भागिकम्।
स्वर्णसिन्दूरतो भागाश्चत्वारः कल्पयेद्बुधः ॥
नातःपरतरः श्रेष्ठः सर्वरोगनिसूदनः।
सर्वलोकहितार्थाय शिवेन परिकीर्त्तितः ॥

मकरध्वजः ॥ ४१८ ॥

हेम्नोभस्मकतोलकं घनं द्विगुणितं लौहात्त्रयः पारदा
श्चत्वारो नियतन्तु वङ्ग युगलञ्चैकीकृतं मर्द्दयेत् ॥
मुक्ताविद्रुमयो रसेन समता गोक्षुरवासेक्षुणा।
सर्वं वन्ध्यकरोषकेण सुदृढ़ं तत्तत् पचेत् सप्तधा ॥
कस्तूरी घनसारमर्द्दितोरसः पश्चात् सुसिद्धोभवेत्।
कासश्वास सपित्तवातकफजित् पाण्डुक्षयादीन् हरेत्।
शूलादिग्रहणीं विषादिहरणो मेहांस्तथा विंशतिम्।

चन्द्रोदयरसे मुक्तापर्णभवप्रसूनैरिति रक्तकार्पासकुसुमैः ॥४१७॥
मकरध्वजे हाटकं स्वर्णं चन्द्रं कर्पूरम् ॥ ४१८ ॥

हृद्रोगादिहरो ज्वरादिशमनो वृष्यो वयोवर्द्धनः॥
श्रेष्ठः पुष्टिकरो वसन्ततिलको रतुरञ्जयेनोदित।

वसन्ततिलकोरसः॥ ४१८॥ *

द्विभागं हाटकं चन्द्रं त्रयोवङ्गाहिकान्तकाः।
चतुर्भागं शुद्धमभ्रं प्रवालं मौक्तिकन्तथा॥
भावयेद्गव्यदुग्धेन भावनेक्षुरसेन च।
वासालाचारसोदीच्य रम्भाकन्दप्रभूनकैः॥
शतपत्ररसेनैव मालत्याः कुङ्कुमोदकैः।
पश्चान्मृगमदैर्भाव्यं सुगन्धिरससम्भवम्॥
कुसुमाकरविख्यातो वसन्तपदपूर्वकः।
गुञ्जाद्वयेन संसेव्यः सितामध्वाज्यसंयुतः॥
यद्दघ्नः कान्तिदश्चैव कामदः पुष्टिदस्तथा।
वलीपलितनाशश्च श्रुतिभ्रंशं विनाशयेत्॥
पुष्टिदो बल्यमायुष्यं पुत्रप्रसवकारणः।
प्रमेहान् विंशतिश्चैव चयमेकादशन्तथा॥
तथा सोमरुजं हन्ति साध्यासध्यमथापि वा।

वसन्तकुसुमाकरोरसः॥ ४२०

वसन्ततिलके घन मभ्रं नियतं गन्धकं वृद्धास्तरसगन्धकयोरभेदं
सर्वसिन्दूरं व्यवहरन्ति। घनसारं कर्पूरम्॥ ४१८॥

वसन्तकुसुमाकरे हाटकं स्वर्णं अहिः सीसकम्। केचित्, वङ्गाहि

---

* वसन्ततिलके केनचित् वैद्येन पुटमदत्वा विभाव्यकस्तूरी
न्दूरं रादिर्मेभिलखिता व्यवहृतः।

सूतकं गन्धकं लौहं विषं चित्रकपद्मकम् ।
वराङ्गरेणुकामुस्त ग्रन्थैला नागकेशरम् ॥
त्रिकत्रयञ्च त्रिफला शुल्वभस्म तथैव च ।
एतानि समभागानि द्विगुणो गुड़ उच्यते ॥
संमर्द्य वटकं कृत्वा भक्षयेच्चणकोन्मितम् ।
कासे श्वासे क्षये गुल्मे प्रमेहे विषमज्वरे ॥
हिक्कायां ग्रहणीदोषे शोथे पाण्ड्वामये तथा ।
मूत्रकृच्छ्रे मूढ़गर्भे वातरोगे च दारुणे ॥
नीलकण्ठोरसोनाम ब्रह्मणा निर्म्मितः पुरा ।
अनुपानविशेषेण सर्वरोगहरो भवेत् ॥

नीलकण्ठोरसः ।

पलैकं नागभस्माथ भावयेत्तिमिपित्ततः ॥
तन्नागं मृतं स्वर्णं तोलैकं वापिमिश्रयेत् ।
द्विपलं भस्मसूतस्य त्रिपलं मृतमभ्रकम् ।
त्रिपलं लौहभस्माथ सर्व्वमेकत्र कारयेत् ॥
भावयेच्च पृथक् कन्या ब्रह्मीनिर्गुण्डिकाशमी ।
मुण्डी शतावरीछिन्ना कोकिलाक्षस्य बीजकैः ॥
मूषली वृद्धदारोऽग्नि द्रवैरेभिर्भिषग्वरः ।
ततः सञ्चूर्णयेत् सर्व्वं तुल्यमेकादशाभिधम् ॥

कान्तकमित्यत्र रसाद्विकान्तकमिति पठन्ति । रम्भाकन्दप्रसूनकैरिति रम्भामूलरसैः पुष्परसैश्च । शतपत्ररसेनेत्यत्र शतपुष्पीरसेनेति केचित् पठन्ति अपरे तु मालत्याः कुङ्कुमोदकैरित्यत्र मालत्याः कुसुमोदकैरिति पठन्ति एतत्तु न सम्यक् व्यवहारसिद्धम् । ४२० ॥

वराव्योषाब्दवह्निएला: जातिफललवङ्गकम्।
पुजयेद्गन्धपुष्पाद्यैर्नीलकण्ठं महेश्वरम्॥
द्विगुञ्जं भक्षयेदस्य सूतुराज्ञयमनुस्मरन्।
क्षयमेकादशविधं ग्रहणीं रक्तपित्तकम्॥
विविधान् वातजान् रोगान् चत्वारिंशच्चपैत्तिकान्।
हन्ति सर्व्वामयानेव कामिनीनां शतं व्रजेत्॥
एकविंशतिरात्राद्वै परिहार्य्यं त्यजेदिह।
यथेष्टाहारचेष्टोहि कन्दर्पसदृशो नर:॥
मेधावी बलवान् प्राज्ञो वह्न्याशो भीमविक्रम:।
पुत्रार्थिनी तथा नारी सैवपुत्रं प्रसूयते॥
अस्य सूतस्य माहात्म्यं वेत्ति शम्भुर्नचापर:।

महानीलकण्ठरस:॥ ४२१॥

पारदं गन्धकञ्चैव टङ्कणं नागकेशरम्।
कर्पूरं जातीकोषञ्च लवङ्गं तेजपत्रकम्॥
एतेषां कर्षभागानि सुवर्णं तत्समंभवेत्।
शुद्धकृष्णाभ्रचूर्णञ्च चतुष्क पिचुभागिकम्॥
तालीशं घनकुष्ठञ्च मांसी पुष्पवराङ्गकम्।
एलावीजं त्रिकटुकं त्रिफला करिपिप्पली॥
एषांकर्षद्वयञ्चैव पिप्पलीक्वाथभावितत।
अनुपानं प्रयोक्तव्यं चोचं चौद्रसमायुतत्॥

महानीलकण्ठरसे नाग: सीसकं सुवर्णी सुविद्धरो शिरा गुडवी। कश्मिश्चित्रक: वरा त्रिफला। अब्दोमुस्तकम्॥ ४२१॥

नानारोगप्रशमनं विशेषात् कासरोगनुत् ।
वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम् ॥
हृच्छूलं पार्श्वशूलञ्च शिरःशूलं विशेषतः ।
स्वरामयं चयं कुष्ठं श्लेष्माणं वातशोणितम् ॥
बृहच्छृङ्गाराभ्रनाम विष्णुना परिकीर्त्तितम् ।
रक्तपित्तञ्च कासञ्च नाशयेन्नात्र संशयः ॥

बृहच्छृङ्गाराभ्रं ॥ ४२२ ॥

इति रसायनाधिकारो वाजीकरणाध्यायश्च ।

समाप्तश्चायग्रन्थः ।

बृहच्छृङ्गाराभ्रे सुवर्णं तत्समभितेरकभागसमम् । घनं मुस्तकं
चोचं गुड़त्वक् करिपिप्पली गजपिप्पली ॥ ४२२ ॥

इति सुबोधिनीटीका समाप्त ।

প্রকাশক—শ্রীযুক্ত ভুবনচন্দ্র বসাক ।
৮ নং নিমতলা ঘাট ইষ্ট্রীট কলিকাতা ।
প্রিণ্টার শ্রীউদয়চরণ পাল ।
কলিকাতা, ৩৯ নং শিবনারায়ণ দাসেরলেন বাহির সিমলা
নূতন বাল্মীকি যন্ত্র ।